No. 55.] [*Price Rupee One.*

THE

CHOWKHAMBÂ SANSKṚIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA.

BY

PAṆDIT SÔMESHWARA BHAṬṬA.

EDITED BY

PAṆDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS VIII.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKṚIT BOOK-DEPÔT:

BENARES.

AGENT:—OTTO HARRASSOWITZ, LEIPZIG:

Printed By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

श्रीः

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तवकः—५५

यागानुरक्तभावनाप्रतीतेर्द्धात्वर्थान्तरानुरागायोगान्न गुणन्यायातिक्रम इत्याशङ्क्य फलवाक्ये धात्वर्थानुरागविवक्षायां भावनायाः फलं प्रत्युपादानविधानगुणभावाद्धात्वर्थं च प्रति उद्देशानुवादप्रधानभावाद्वैरूप्यापत्तेर्द्धात्वर्थानुरागविवक्षा पूर्वपक्षिणो ऽभिमतेति सूचनार्थम् * पूर्वोक्तम् * भाष्योक्तसन्देहकारणानिवृत्त्यर्थो ऽपिशब्दः। अयं चार्थः प्रयोगवाक्यशेषभावेन हि समुदायस्य सत्ता सम्बन्धो गम्यतइत्यादिभाष्यालोचनयोक्तत्वान्न स्वोत्प्रेक्षितत्वेनोपहास्यः परमतेन त्रिविधपूर्वपक्षाभिधानार्थत्वेन भाष्यं व्याख्यातुं पठति * किं तावदिति * संहत्यशब्दं तिस्रो भावनाः संहत्यैकमपूर्वं कुर्वन्तीत्येवं व्याख्यातुमाह * तत्रेति * अदृष्टार्थानामिति भाष्यस्यापूर्वैक्योक्त्यैव व्याख्यातत्वात्तदुपपादनार्थमदृष्ट इतिभाष्यावयवं व्याचष्टे * इयं चेति * विरुध्यमान इति भाष्यावयवार्थमाह * दृष्टेति * उक्ते ऽर्थे भाष्यावयवं योजयति * तदिति * विशेषश्चेदित्यवयवं व्याचष्टे * तत्रापीति * बहुभ्य इत्यवयवं तस्माच्छब्दान्तमुपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * ननु स्वर्गकामो यजेतेति फलवाक्ये यागभावनामात्रविधानात्कथं यागहोमदानादिभावनासमुदायस्य फलापूर्वसाधनतत्याशङ्क्य निरासार्थं समुदाय इतिभाष्यमपनीततस्माच्छब्दकपाठेन सूचितव्याख्यानत्वादव्याख्याय तदुपपादनार्थं न चेति भाष्यमाशङ्कोत्तरत्वेन व्याचष्टे * तत्रेति * फलवाक्यगताख्यातविहितभावनासमुदायावयवभूतैकैकधात्वर्थावच्छिन्नभावनावाचिभिर्सोमादिवाक्यगतैर्यजतिजुहोतिददातीत्याख्यातशब्दैः कल्पनागौरवभयात्प्रतिभावनं भाष्यान्वयमसहमानैरैकभाव्यान्वयाय भावनासमुदायस्यार्थाक्षिप्तत्वेन शाब्दत्वात्फलवाक्ये फलसाधनतया युक्तो विधिरित्यर्थः। अथ वेति भाष्यं पक्षान्तरपरिग्रहार्थत्वेन व्याचष्टे * अथ वेति * उत्तरस्तमेवानुवदतीति भावनानुवादाभिधानेनैकस्यां भावनायां त्रयो यजत्यादय उपाया विधीयन्तइति चोपायतया धात्वर्थविधानाभिधानेन सूचितामुपपत्तिमाह * तस्यापीति * श्लोकं व्याचष्टे * यदि हीति * धात्वर्थानां प्राधान्ये सति फलवत्स्वरूपेणाविधेयत्वापत्तेः फलवाक्यविहितभावनाप्रत्यभिज्ञाने ऽपि सोमादिवाक्येषु तत्तद्धात्वर्थविशिष्टरूपेण विधीयमाना भावनैकधात्वर्थविशिष्टायां धात्वर्थान्तरनिवेशायोगाद् गुणन्यायेन प्रतिधात्वर्थं भिद्यते भावप्रधानमाख्यातमिति स्मृतेस्त्वाख्याते भावनायाः प्राधान्याद्भावशब्दस्य धात्वर्थविषयत्वव्याख्याने ऽपि वा प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति स्मृतेः

प्रत्ययार्थत्वेन भावनायाः प्राधान्यात्फलवाक्यविहितशुद्धभावनानुवादेन सोमादिवाक्यैरनादृतपौर्वापर्यैर्युगपत्सर्वधात्वर्थविधानान्न गुणन्यायो ऽस्तीत्याशयः । ननु सोमादिवाक्येषु भावनाविध्यभावे विशेषणसम्बन्धमात्रार्थं भावनाभिधानावृत्तिः स्यान्न चासौ युक्तेत्याशङ्क्याह * यद्यपीति * असत्यां गतौ गुणानुरोधेनापि प्रधानावृत्तिर्युक्तेत्याशयः । न तु केवलप्रकृतिप्रयोगासम्भवमात्रात्प्रत्ययावृत्तिसिद्धेः केवलप्रत्ययप्रयोगासम्भवः किमर्थमुक्त इत्याशङ्क्याह * यदि त्विति * क्लृप्तचादौ विशेषणान्वयाभिधानावृत्तिर्दृष्टेत्याह * दृष्टा चेति * अनन्यगतिगुणसम्पादनार्था चानुष्ठानावृत्तिरपि दृष्टा किमुताभिधानावृत्तिरित्याह * तथेति * नन्वेवं सति भिन्नवाक्योपादानाद्धात्वर्थानां प्रत्येकमेव भावनाविशेषणता युक्तेत्याशङ्क्याह * तस्मादिति * यस्मात्कल्पनालाघवाय संहत्य विशेषणत्वं प्रतीयते तस्मात्सर्वधात्वर्थविशेष्टैकभावनाभिधानार्थत्वेनानेकार्थत्वात्सर्वं प्रकरणमेकं वाक्यमित्यर्थः । तस्मादित्युपसंहारभाष्यं सङ्क्षिप्य व्याचष्टे * एकमिति * संहत्य विशेषणत्वकल्पनस्यादृष्टकल्पनालाघवहेतुकत्वाभिधानार्थमत इति भाष्यं व्याचष्टे * एकं चेति * तृतीयपूर्वपक्षाभिधानार्थं यद्वेति भाष्यं स्वत्वपरित्यागांशेत्यनेन व्याख्यातत्वादसार्वत्रिकत्वेन चानादृत्य तथोक्तत्वादुपेक्ष्य स्वमते पूर्वपक्षैक्याभिधानायाद्यं पूर्वपक्षं दूषयितुमारभते * अयमेव चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * यदि हीति * अदृष्टार्थभावनाभेदान्यथानुपपत्त्या भावनाभेदवदपूर्वभेदस्याप्यवश्याभ्युपगन्तव्यत्वापत्तेः किमनेन पूर्वपक्षेण सिद्धान्तप्रतिकूलं क्षतं स्यादित्यर्थः कथमेकशब्दोपादानात्समुदायत्वापादनमित्यपेक्षिते समुदायानुवादरूपेण वा * फलादिसम्बन्धेन वेत्युक्तम् * पौर्णमासीमित्येकशब्दोपादानं तावद्यजिनानूद्यमानानां यागानां समुदायत्वापादनार्थमेव राजसूयेनेत्यस्य फलान्वयपरत्वात्समुदायापादनार्थत्वाभावे ऽप्येकशब्दोपादानेनैकफलान्वयात्समुदायत्वापत्तिरित्याशयः । ज्योतिष्टोमशब्दस्य सर्वप्राकरणिकया होमाद्यवच्छिन्नभावनासमूहवाचित्वमाशङ्कते * ननु चेति * यजिसामानाधिकरण्याद्भावनावाचित्वैव तावदयुक्ता धात्वर्थद्वारलक्षणया तु तद्वाचित्वाभ्युपगमे ऽपि यजिमात्रसामानाधिकरण्याद्धोमाद्यवच्छिन्नभावनासमूहवाचिता दुराशङ्केति परिहरति * नेति * उपसंहरति * तस्मादिति * का तर्हि भाष्यस्य गतिरित्याशङ्क्याह * एवं न्विति * यथेन्द्रायुधं लोहितशु-

फलकृष्णैस्त्रिभिर्धातुभिः संहत्यानुरज्यते तथा सर्वधात्वर्थैर्भावनेति प्रतिज्ञाभाष्यव्याख्या भावनैक्योपपादनार्थत्वेनादृष्टार्थानामित्यादिभाष्यं व्याचष्टे * तत्सिद्ध्यर्थास्त्विति * कर्मभेदे हीत्यनेनाबहुभ्य एकमपूर्वमिति अकारप्रश्लेषो भाष्ये सूचितः भावनैक्ये समुदायशब्दानुपपत्तिमाशङ्क्य धात्वर्थसमुदायानुरक्तस्यैकस्य भावनाख्यस्य कर्मणोऽनुरञ्जकस्य समुदायस्यावयवभूतानां धात्वर्थानां समुदायोऽभिप्रेत इत्येवं व्याचष्टे * तस्मादिति * भाष्यं च धात्वर्थानां समुदायाप्रतीतेः कथं संहत्यानुरञ्जकतेत्याशङ्कानिरासार्थत्वे यस्मात्कल्पनालाघवाय भावनैक्यं युक्तं तस्मात्तत्सिद्ध्यर्थं धात्वर्थसमुदायोऽनुरञ्जकः कर्त्तुं वेदस्येष्टोऽवसीयत इत्येवं व्याख्येयम् । अथ वेति भाष्यं पक्षान्तराभावेनायुक्तमाशङ्क्य परमतेनोपसंहारार्थत्वेन व्याचष्टे * अत इति * स्वमतेनोपपत्त्यन्तरार्थत्वेन व्याचष्टे * शङ्क्यं त्विति * अभिन्नार्थत्वामेवोत्तरस्तमेवेति भावनैक्याभिधानेन दर्शयतीत्याह * तदिति * परेषां व्याख्यानं दूषयितुमुपन्यस्यति * एवमिति * दूषयति * तत्त्विति * स्वमतेन भावनापरामर्शितया तच्छब्दं व्याचष्टे *तस्मादिति* पूर्वभाष्यपर्यालोचनयाप्येष एवार्थः प्रतीयतइत्याह * तथा चेति* एतदेवोपपादयति *अतइति* तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमित्युपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्याचष्टे * तस्मादिति * यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमित्युपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्याचष्टे *यद्वेति* ननु नैकांशसाम्यमात्रेण धात्वर्थैक्यं युक्तमथैकांशसाम्येन सादृश्याद् गौणवृत्त्या ददातिजुहोतिभ्यां यजत्यर्थानुवादोऽभिहितः सोऽपि गौणत्वदोषापत्तेरयुक्त इत्याशङ्क्याह * अथापीति * जघन्यत्वसाम्याद् गौणतैव लक्षणा शब्देनोक्ता समुदायवाचिना वा त्यागाख्यैकदेशे वृत्तिर्लक्षणाभिमता गुणसम्बन्धार्थामिति भाष्यावयवं व्याचष्टे * गुणेति * को गुण इत्यपेक्षायामाह *एकत्रेति* प्राकाशावध्वर्यवे ददातीतिवत्सम्बन्धविधानादवाक्यभेदाभिप्रायः दक्षिणाकालत्वलक्षणो गुणो दाक्षिणशब्देनाभिमतः। ननु दक्षिणानयनोत्तरकालमेतद्धोमाविधानात् क्रमेणैव दक्षिणाकालत्वप्राप्तेस्तत्प्रख्यन्यायेन दाक्षिणशब्दस्य नामत्वाद् गुणविधित्वं नास्तीत्याशङ्कते * नन्विति * धात्वर्थानुवादपक्षे गुणविधित्वापत्तिरिति परिहरति * कर्मेति * अस्मिंश्च पक्षे सन्देहभाष्यगता यजत्यादिशब्दा श्रुतिवृत्ता एवेत्याह * तदा चेति * कार्यशब्दस्वरूपक्रमानुरोधात्क्रियासामान्यवाचिना करो-

तिना तद्विशेषोक्तिक्रियालक्षणाद्वाच्यधात्वर्थविषयो ऽर्थाक्षेप्यापूर्वविषयो वेत्याह * एकामिति * संहत्यकारित्वे कार्यैक्य * लाभादेकमित्युक्तम् * एकं धात्वर्थमेकं वापूर्वं त्रयो धातवो गमयन्तीति कुर्वन्तिशब्दार्थे व्याख्याते ददातिजुहोत्योर्गुणसम्बन्धार्थत्वेन धात्वर्थाविधायकत्वात्कथं धात्वर्थसाध्यापूर्वगमकतेत्याशङ्क्य * तदेत्युक्तम् * यजत्यर्थानुग्राहकगुणविधायकत्वेन तयोर्यजत्यनुग्राहकत्वात्तत्सहकृतस्य यजतेरपूर्वगमकत्वमभिप्रेत्य संहत्येत्युक्तमित्याशयः * तस्मादिति * पूर्वपक्षोपसंहारभाष्यं फलतो भावनैक्योपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * उत्तराधिकरणे पूर्वशब्दस्य फलतः कर्मविषयतया व्याख्यास्यमानत्वादिहाव्याख्या सिद्धान्तसूत्रं व्याचष्टे * उच्यतइति * शब्दान्तरस्य धात्वर्थभेदद्वारा भावनाभेदप्रमाणत्वं वक्तुम् * धात्वर्थभेद इत्युक्तम् * धात्वर्थस्य प्रयत्नाख्यभावनाजन्यत्वात्तद्भेदस्य भावनाभेदकत्वासम्भवमाशङ्क्य ज्ञापकहेतुत्वं वक्तुम् * विज्ञेयमित्युक्तम् * संख्यादित्रयस्य भावनाभेदकत्वाभावे ऽपि धात्वर्थभेदाद्भावनाभेदसिद्धिं वक्तुम् *सर्वत्रेत्युक्तम्* कृतानुबन्धत्वव्याख्यानायोत्तरार्द्धम् । ननु भावनावाचिप्रत्ययैक्यात् भावनायाः स्वतस्तावदैक्यप्रतीतेः प्राधान्याच्च धात्वर्थभेदे ऽप्यावृत्त्यनुपपत्तेः कथं धात्वर्थभेदाद्भेद इत्याशङ्क्य निरस्य लोकार्थं प्रपञ्चयति * यद्यपीति * सम्बन्धिनिरूपणाधीननिरूपणस्य सम्बन्धस्य सम्बन्धिभेदेन ज्ञेयनिरूपणाधीननिरूपणस्य ज्ञानस्य ज्ञेयभेदेन भेददर्शनाद्यदधीनं निरूपणं तत्तद्भेदेन भिद्यतइति व्याप्तेर्धात्वर्थाधीननिरूपणत्वाद्भावनाया धात्वर्थभेदेन भेदो ऽनुमीयत इत्याशयः । कथमनुरञ्जकभेदस्यान्नुरज्यभेदाक्षेपकतेत्याशङ्क्याह * न हीति * भावनाया धात्वर्थावच्छेदं विना भावनान्तराद्व्यावृत्त्यप्रतीतेरेकभावनावच्छेदकत्वविरोधप्रसङ्गेनैकस्यां भावनायामनेकानुरञ्जकसमावेशायोगादनुरञ्जकभेदो ऽनुरज्यभेदमाक्षिपतीत्याशयः । त्रयाणामप्येकस्यां भावनायां समावेशो न सम्भवति किमुत प्रकरणगतानां सर्वधात्वर्थानामिति त्रय इत्यनेनोक्तम् । ननु प्रत्येकमनुरञ्जकत्वे माभूत्समावेशः समुच्चितानामेव तु धात्वर्थानामेकभावनानुरञ्जकत्वं घटपटाविति युगपत् घटपटज्ञाने घटपटयोरिवैकज्ञानानुरञ्जकत्वं भविष्यतीत्याशङ्क्याह * न चेति * युगपत् घटपटसंयुक्तेनेन्द्रियेण घटपटविषयैकज्ञानोत्पत्तावपि ज्ञानजन्यार्थप्रकाशाख्यस्य फलस्याश्रयभूतघटपटभेदेन भेदात् घटप्रकाशांशे घटस्यानुरञ्जकत्वं पटप्रकाशांशे पटस्येत्यंशभेदेनोभयोरेकज्ञानानुरञ्जकत्वं युक्तम् । धात्व-

र्थस्यानुकरणांशनिवेशेन भावनानुरञ्जकत्वात्करणांशस्य चैक्यान्ना-
नेकानुरञ्जकत्वापेक्षेत्याशयः । ननु समुच्चितानामेव करणांशनिवेशो
भविष्यतीत्याशङ्क्याह * अन्योन्येति * भिन्नशब्दोपादाने ऽपि धा-
तुसमूहात्प्रत्ययोत्पात्तत्वादग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धा-
तोस्तु प्रकृतित्वेनोपादेयतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययो-
त्पत्तावग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धातोस्तु प्रकृतित्वेनो-
पादेयतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययोत्पत्तिरित्याह * न ४४७।४
चेति * नन्वेकस्मिन्पदे ऽनेकधातूपादानाभावे ऽपि प्राकरणिकानां
सर्वधातूनां प्रयोगवाक्यैकवाक्यत्वात्तद्विहितायां भावनायां प्राकर-
णिकसर्वधात्वर्थानां निवेशो भविष्यतीत्याशङ्क्याह * न चेति *
प्रयोगवाक्ये शुद्धभावनाप्रतीत्यभावात्सोमादिवाक्येषु च भावनावि-
धिनिरपेक्षधात्वर्थविध्ययोगात्साकाङ्क्षत्वाभावेन प्राकरणिकसर्वधा-
त्वर्थानुरक्तैकभावनाविधानरूपैकार्थत्वाभावान्नैकवाक्यता युक्तेत्या-
शयः । ननु कल्पनालाघवायापूर्वैक्यावधारणात्तस्य च भावनैक्यं
विनानुपपत्तेः सर्वप्राकरणिकवाक्यानामेकभावनाप्रयोजनत्वेनैका-
र्थ्यादेकवाक्यता भविष्यतीत्याशङ्क्याह * न चेति * रूपादुत्तर-
काले हि विनियोगप्रयोजने इत्यनेन न्यायेनादृष्टप्रयोजनभेदाभेदयो-
र्मन्त्रभेदाभेदपूर्वकत्ववत्कर्मभेदो भेदपूर्वकत्वावगतेर्नापूर्वैक्येनैकार्थ्ये
ऽप्येकवाक्यकल्पना युक्तेति प्रत्याख्यानप्रकारं प्रकृते योजयितुमाह
* न चेति * ननु फलवाक्ये भावनाया धात्वर्थानुरागविवक्षायां
फलं प्रत्युपादेयविधेयगुणत्वाद्धात्वर्थं च प्रत्युद्देश्यानुवाद्यप्रधानत्वाद्वै-
रूप्यापत्तेः शुद्धाया विधेयत्वात्सोमादिवाक्यैस्तदनुवादेन यागादि-
धात्वर्थानुरागविधानमेकवाक्यत्वाभ्युपगमेन वा सर्वधात्वर्थानुरक्तै-
कभावनाविधानं युक्तमिति पूर्वपक्षाशयमाशङ्क्य निरस्यति * यदि
चेति * ननु भिन्नवाक्यगतैरपि धात्वर्थैरनुरागसम्भवे किमित्यप्र-
तीयमानैकवाक्यत्वकल्पनेत्याशङ्क्याष्टदोषविकल्पपरिहाराय समुच्च-
यसिद्ध्यर्थत्वं सूचयितुम् * युगपद्वेत्युक्तम् * पृथक्शब्देन धात्व-
र्थानुरागनिरपेक्षतोक्ता प्रत्ययेन शुद्धभावनोपादाने ऽप्यशक्यानुष्ठान-
त्वाद् शुद्धाया विधेयत्वासम्भवसूचनार्थो विधिवाच्युत्पत्तिशब्दः।भा-
वनायाश्च धात्वर्थवत् कारकत्वानभ्युपगमात्कर्मकरणत्वाभावेन तन्नि-
मित्तोद्देश्योपादेयत्वाद्यभावाद्धात्वर्थनिरपेक्षायाश्चाविहितत्वेन धा-
त्वर्थान्वये ऽप्यनुवाद्यत्वाभावान्न वैरूप्यापत्तिरित्याशयः। यदा च-
धात्वर्थनिरपेक्षाया भावनाया विधेयत्वं न सम्भवति तदा ददात्या-
दीनां धात्वर्थानां मध्ये केन चिदेकेन धात्वर्थेन समस्तैर्वा धात्वर्थैर-

वच्छिन्नोत्पादयितव्या न शुद्धेत्याह * इतीति *. ननु समस्तधात्वर्था-वच्छिन्नभावनोत्पत्तिपक्षे पूर्वपक्षासिद्धिः स्यादित्याशङ्क्याह. *तन्नेति * समस्तानामपि संहत्यावच्छेदकत्वायोगात्प्रत्येकमवच्छेदकत्वावगतेः प्रतिधात्वर्थं भावनाविधौ विहिताया विध्यसम्भवाद्भेदसिद्धिरित्यर्थः । अथैकेन धात्वर्थेनावच्छिन्ना भावनैकहायन्येव क्रयो विधीयते ऽन्ये तु धात्वर्थास्तस्यामेव भावनायां हिरण्यादीनीव क्रये विधीयमानानि न भावनाभेदमापादयन्तीत्युच्यन्ते तत्राप्येकहायनीवाक्येनैकगुणोपादानरूपकर्मोत्पत्तिचिन्हवदिह कस्मिंश्चिद्वाक्ये भावनोत्पत्तिचिन्हाभावेन व्यवस्थाहेत्वभावादगृह्यमाणविशेषतया सर्वत्र भावनाविध्यापत्तेर्दुर्वारो भावनाभेद इत्याह * अथेति * धात्वर्थान्तरेषु भावनाविध्यभावसूचनार्थं तावच्छब्दः अथागृह्यमाण विशेषत्वे ऽप्यनेकोत्पत्त्यानर्थक्याद्येन केन चिदेकेन धात्वर्थेनानुरक्ताया भावनाया उत्पत्तिरिष्यते तथाप्येकधात्वर्थानुरक्तायां धात्वर्थान्तरस्य गुणन्यायेनानिवेशाद्भावनाभेद एवेत्याह * येन केन चिदिति* धातुशब्दो ऽर्थपरः श्लोकं व्याचष्टे * येनैव हीति * सर्वप्रकरणैकवाक्यत्वविवक्षया वाक्यशब्दप्रत्याख्यातं वाक्यभेदविवक्षया प्र-
४४८।१ करणशब्दः एतदेवोदाहरणनिष्ठं विवृणोति * ददातिर्हीति * सर्वत्र पदश्रुतिगम्यत्वात् तुल्यबलत्वमाशङ्कते * ननु चेति*धात्वर्थान्तरानुक्तभावनाविशेषान्वयस्य श्रुत्यानवगतेरतुल्यबलत्वमाह * सत्यमिति * ननु भावनायाः स्वतो वैलक्षण्यानवभासेन सर्वत्रैक्यात्त्यागानुरक्तान्या दानानुरक्तान्येति भेदव्यवहारो न युक्त इत्याशङ्कते * ननु चेति * भिन्नधात्वर्थानुष्ठाने प्रयत्नाख्यभावनाव्यक्तिवैलक्षण्यस्य स्वसंवेद्यत्वाद्वैलक्षण्यानवभासेन सामान्यस्यैक्यं वाच्यं तत्विष्टमेवेत्युपहासेन परिहरति * केन चेति * धात्वर्थानुरक्तभावनाव्यक्तिवाची कर्मशब्दः व्यक्तेरपि धात्वर्थवैलक्षण्यं विना वैलक्षण्याप्रतीतेर्न भेदो ऽस्तीत्याशङ्किता स्वाशयं दर्शयति * नन्विति * धात्वर्थवैलक्षण्याख्यसामग्र्यपेक्षो ऽपि भावनाव्यक्तिवैलक्षण्यावभासो बाधाभावात्प्रमाणमिति निराकरोति * कथमिति* बाधाभावे ऽप्यन्योपाधिकत्वाच्छब्दभेदप्रत्ययवद्भावनाभेदप्रत्ययो मिथ्येत्याशङ्किना स्वाशयं विवृणोति * नन्विति * अन्यसन्निधिजन्यत्वमात्रं वौपाधिकत्वमभिप्रेतमन्यधर्माध्यासन्निबन्धनत्वं वेति विकल्पं मनसि कृत्वाद्ये कल्पे तावत्प्रतिवर्णव्यञ्जकध्वनिभेदाद्भिन्नध्वनिसन्निधिजन्यत्वस्य सत्त्वे ऽपि गकारो ऽयं ककारो ऽयमित्यादिप्रत्ययभेददर्शनादनैकान्तिकत्वं तदभिप्रायत्वेन दृष्टान्तस्य साध्य-

विकल्पत्वमाह * नैतदिति * अथ द्रुतो ऽयं मध्यमो ऽयं विलम्बितो ऽयमित्यादिभेदप्रत्ययदृष्टान्तेनान्यधर्माध्यासनिबन्धनत्वं भावनाभेदप्रत्ययस्य मिथ्यात्वे हेतुरभिप्रेतः । सा सिद्धः ध्वनिधर्मा हि त्रिचतुःपञ्चकमात्रत्वरूपा द्रुतादिवृत्तयस्तस्मादुच्चारणं तेषां मात्राकालं प्रतीयते द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयमिति शब्दे मात्रानिषेधात् । तत्कल्पनानुपपत्तेर्वस्तुतो सत्वादध्यासेन प्रतीयन्तइति युक्तम्। धात्वर्थधर्मस्त्वनन्तरं नियमेन किं चिदुत्पादनरूपो भावनाफलस्यानन्तरोत्पत्तिनियमाभावाच्च भावनायां प्रतीयते पूर्वापरीभावानिष्पन्नत्वरूपस्तु भावनायामपि व्यापारत्वेन वास्तवत्वान्नाध्यस्त इत्याशयेनाह * न चेति * द्रुतादिधर्मरहिताच्छब्दाद्विलक्षणधर्मतार्थान्तरशब्देनानन्तरं किं चिदुत्पादननियमरूपधर्मराहिताच्च भावनाख्यात्प्रयत्नाद्विलक्षणधर्मता व्यतिरिक्तशब्देन विवक्षिता । पूर्वापरीभावानिष्पन्नत्वरूपधात्वर्थधर्मतुल्यत्वप्रदर्शनार्थो नात्यन्तवाच्यदूरशब्दः उपसंहरति * तस्मादिति * एवं धात्वर्थाधाननिरूपणत्वाद्धात्वर्थभेदे वास्तवं भावनास्वरूपभेदमुक्त्वेदानीं स्वरूपेण भावनाव्यक्त्यैक्ये ऽपि शब्दान्तरादिभिर्विधेयरूपभेदस्य व्युत्पाद्यत्वाद्धात्वर्थानुरक्ताया एव च भावनाया विधेयत्वाद्धात्वर्थानुरक्तरूपेण भेदो भविष्यतीति वक्तुं वृद्धानां श्लोकं पठति *आह चेति* रक्तेन लाक्षादिनोपधानेनावरुद्धे स्फटिके चोदिते सति कृष्णस्फटिकमानयत्यादिचोदनया यद्विहितं तद्रक्तचोदनाविहिते स्फटिके कार्ष्ण्यादेर्निवेशो योगात्तस्मादन्यद्यथा गृह्यते तथैकधात्वर्थावरुद्धा भावना विधाने सति या धात्वर्थान्तरचोदनास्तास्ता भावनान्तरविषयाः स्युरित्यर्थः । नन्वेवं सति गुणन्यायादेव भेदसिद्धेः शब्दान्तरानर्थक्यं स्यादित्याशङ्क्याह * यस्मात्त्विति * पूर्वपक्षनिरुत्तरीकरणायैतदुक्तं । वस्तुतस्तु यस्मात्प्रत्ययः कृतधात्वर्थावच्छेदमेव स्वार्थं वदति तस्मात्फलवाक्ये ऽपि शुद्धभावनानवगतेर्नैकस्यां भावनायामनेकधात्वर्थावच्छेदः सम्भवतीत्येतदिह व्युत्पाद्यमित्याशयः । ननु

प्रकृतिप्रत्ययौ ब्रूतः प्राधान्येन सहेति यत् ।
भेदेनैवाभिधाने हि प्राधान्यं तत्तयोच्यते ॥
स्याच्चेत्स उभयोर्वाच्यः प्रत्ययार्थः कथं भवेत् ।
व्यपदिश्येत नैकेन यद्यर्थ उभयोरसौ ॥
सर्वदा तूच्यते यस्मात्प्रकृत्यर्थोपसर्जनः ।
तेनासावुभयोरर्थः प्रयोजनतयोदितः ॥
यान्यावयवशक्तिभ्यां शक्तिःकाचित्पदाश्रया ।

विद्यते यत एकस्माद्विशिष्टार्थगतिर्भवेद् ॥ इति

शब्दे प्रकृतिप्रत्यययोरप्यन्विताभिधानस्य निरस्तत्वात्कृतानुबन्धमेव स्वार्थं प्रत्ययो वदतीत्ययुक्तमित्याशङ्क्य * प्रकृतीत्युक्तम् *

नित्यं विशिष्टएवार्थे प्रत्ययो यत्प्रवर्त्तते ।
तत्पूर्वतरविज्ञातप्रकृत्यर्थविशेषणाद् ॥

इत्यनेन न्यायेनान्वितानभिधाने ऽपि परश्चेति प्रत्ययस्य प्रकृतिपरत्वस्मृतेर्वृद्धप्रयोगरूपाच्चाचारात्स्वार्थाभिधाने प्रकृतिप्रत्ययक्रमस्य नित्यं विवक्षितत्वावगतेरवर्ज्जनीया विशिष्टार्थावगतिरित्याशयः । इममेवार्थं तद्भूतताधिकरणभाष्येण द्रढयति * यथोक्तमिति * यजेतेत्यनेनेति भाष्येण कृतानुबन्धत्वादिति सूत्रावयवं व्याख्याय ननु धात्वर्थसमुदायेनैवावच्छेदाख्यो ऽनुबन्धो भावनाया भविष्यतीत्याशङ्कानिरासार्थं प्रयोगेति भाष्यमुत्पत्तिवाक्यशेषत्वेनापि धात्वर्थसमूहस्यापि सत्ताशब्दोक्तभावनान्वयोपपत्तेरयुक्तमाशङ्क्योपपादयति * प्रयोगवाक्येति * उत्पत्तिवाक्येनैव सर्वाणि प्राकरणिकानि गुणफलनिमित्तवाक्यानि सम्बन्ध्यन्ते न परस्परेणेतीन्द्रियकामाधिकरणवार्त्तिकवक्ष्यमाणन्यायेन प्रयोगवाक्ये भावनोत्पत्त्यभावान्नान्येषां तच्छेषत्वं सम्भवतीत्याशङ्क्योत्पत्तिलक्षणार्थेन सत्ताशब्देन प्रयोगवाक्ये भावनोत्पत्तिर्विवक्षितेति भावनाशब्देन सूचितम् । समुदायानुरागकल्पनस्यापूर्वकल्पनालाघवार्थत्वात्फलान्वयकल्पत्वाच्चापूर्वस्य फलान्वयस्य च धात्वर्थोत्पत्तिवाक्यानां प्रयोगवाक्यशेषत्वाधीनत्वात्समुदायानुरागकल्पनस्य प्रयोगवाक्यशेषत्वहेतुकतेत्यर्थः । ननु धात्वर्थावच्छेदानपेक्षेण स्वरूपेण भावनाया भाव्यनिष्ठत्वात्फलान्वयोपपत्तेस्तादृश्याश्च धात्वर्थोत्पादकसोमादिवाक्यानपेक्षाद्भावनोत्पादकात् ज्योतिष्टोमवाक्यात्प्रतीतेः किमर्था सोमादिवाक्यानां ज्योतिष्टोमवाक्यशेषत्वापेक्षेत्याशङ्क्याह * नेति* धात्वर्थावच्छेदं विनानुष्ठेयत्वात्फलान्वयो न सम्भवतीत्याशयः । प्रकरणान्तरगतासु राजसूयादिभावनासु ज्योतिष्टोमभावनान्वयातिदेशसूचनार्थं बहुवचनम् । ननु भिन्नानामपि भावनानामेकप्रयोगवाक्यग्रहणात्समुदितानामेवापूर्वसाधनत्वाभ्युपगमेन कल्पनालाघवोपपत्तेः कथं प्रयोगवाक्यशेषत्वाद्धात्वर्थसमूहस्यैकभावनान्वयावगतिरित्याशङ्क्याह * अवधृतेति * अवधृतभेदानामेकवाक्योपादाने ऽप्येकशब्दानुपादानात्समुदायानुवादरूपतयैकीकरणमशक्यमित्यर्थः । स्वर्गकामो यजेतेत्युपश्लेषलक्षणया श्रुत्या धात्वर्थे संपादवदस्य यागस्यैव भावनासम्बन्धो ऽवगम्यतइति श्रुतेति भाष्यो-

४४९।१

कार्थव्याख्यार्थं सन्निहितयोरपीति भाष्ये दानहोमयोः प्रयोगवाक्ये ऽनुपादानान्नैकवाक्योपादानलक्षणः संनिधिरस्तीत्यपिशब्दसूचितमर्थं व्याचष्टे * न चेति * श्रुत्येतिशब्दं यजेरुपलक्षणार्थत्वशङ्कानिराससूचनार्थत्वेन व्याचष्टे * न चेति * ननु यागायागसङ्क्लिङ्गसमवायाद्यजिप्रवृत्तेस्तदन्तर्गतस्य यागस्याप्युक्तत्वान्न स्वार्थत्यागापत्तिरित्याशङ्क्य * अहोभयेति * भावनावद्धात्वर्थानामपि सङ्कापत्तिहेतुत्वभावात्स्वरूपेण यागाभिधाने युगपद् वृत्तिद्वयापत्तिरित्याशयः। तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * भावनावाचिप्रत्ययैक्यात् शब्दान्तरत्वानुपपत्तिमाशङ्क्य शब्दान्तरं चेत्युपक्रमपूर्वकं शब्दान्तरत्वोपपादनार्थं तत्रार्थान्तरमित्यादि च शब्दान्तरहेतुकभावनाभेदोपसंहारभाष्यमेकहेलया व्याचष्टे * अतश्चेति * ननु यथा केवलस्य प्रधानस्य फलसाधनत्वज्ञानमुत्पन्नमपि करणस्येतिकर्त्तव्यतापेक्षत्वात्सेतिकर्त्तव्यताकस्य फलसाधनत्वज्ञानेन बाध्यते तथा केवलस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानमुत्पन्नमपि जन्यत्वेन तस्य भावनावच्छेदकत्वात् कारकानपेक्षेण च प्रत्ययवाच्याख्यभावनामात्रेण धात्वर्थाजननात्सिद्धरूपकारकाभ्युपगमे च तस्य निर्व्यापारस्य कारकत्वायोगाद्व्यापारकल्पनायां गौरवापत्तेर्धात्वर्थरूपकारकावच्छिन्नस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानेन बाधिष्यतइत्याशङ्कानिरासार्थं नन्विति भाष्यं व्याचष्टे * न चेति * दृष्टेनैव द्रव्यसम्प्रदानादिना कारकसङ्केन दानादिधात्वर्थनिष्पत्तेर्न तन्निष्पादकधात्वर्थान्तरापेक्षेत्याशयः। यदा च शुद्धभावनाप्रतीत्यभावाद्धात्वर्थान्तरानपेक्षत्वान्न विभज्यमानसाकाङ्क्षत्वं भावनाभेदे च भावयितव्यापूर्वभेदावश्यम्भावान्न संहत्यैकार्थं तदैकवाक्योपादानाभावादपि धात्वर्थसम्पाद्यस्यैकभावनावच्छेदकता न युक्तेत्यभिधानार्थं तस्मादिति भाष्यं न चैतत्पदत्रयमेकवाक्यतां गच्छतीत्यादिना सा भावयितव्यापूर्वभेदादृते नैव भिद्यतइत्यन्तेन च व्याख्यातप्रायत्वान्न व्याख्यातं यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमित्युपपत्त्यन्तरनिरासार्थं न चेत्यादिभाष्यं व्याचष्टे * न चेति * भाष्यस्थो दानमिति शब्दो धातुलक्षणार्थः परसम्बन्धार्थत्वादित्यनेनासेचनार्थत्वात् जुहोतेरित्युपलक्षितमित्यासेचनशब्देन सूचितम्। ननूद्देशत्यागप्रक्षेपसमुदायवाचिनो जुहोतेस्त्यागपरस्वत्वापादनसमुदायवाचिनश्च ददातेस्तदेकदेशत्यागमात्रलक्षणायैकार्थ्यं भविष्यतीत्याशङ्क्याह * न चेति * देवतोद्देशसद्भावे ऽप्यासेचनपरस्वत्वापादानापेक्षो मात्रशब्दः त्यागमात्रार्थत्वादिति भाष्ये ऽपि मात्रशब्दो ऽनेन सूचितः।

कालार्थे च तद्धितास्मृतेर्दाक्षिणशब्दस्य दक्षिणाकालवाचित्वात्प्रसिद्धेर्विधौ चावाचकशब्दायोगादर्थाक्षिप्तसाध्यांशसामानाधिकरण्याच्च नामत्वावगतेः कर्मण एव विधेयत्वात्सिद्धो भेद इत्याह * न चेति * धात्वर्थभेदाभेदचिन्तायां ददातिवाक्ये गुणविधौ सम्बन्धविधेराघाराग्निहोत्राधिकरणे निराकरिष्यमाणत्वाद्वाक्यभेदापत्तेः पूर्वपक्षायोगादुक्तोदाहरणानुपपत्तिप्रसक्तेर्नेह तच्चिन्तेति प्रसङ्गाद्दर्शयितुमाह * ददातिना त्विति * प्रयोजनभाष्यं धात्वर्थसङ्घस्यैकं भावनावच्छेदकत्वे सर्वेषामेकापूर्वसाधनत्वादङ्गाङ्गित्वाभावः पूर्वपक्षे सिद्धान्ते ज्योतिष्टोमयागाङ्गतेतरधात्वर्थानामित्येवं स्पष्टत्वान्न व्याख्यातम् ।

॥ समिदाद्यपूर्वभेदाधिकरणम् ॥ २ ॥

एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् ॥ १ ॥

ननु शब्दभेदरूपत्वेन सञ्ज्ञायाः शब्दान्तरसादृश्यादनन्तरविचार्यत्वासमाप्तेः कथमभ्याससर्वानन्तरं विचार्यतेत्याशङ्क्याह *शब्दान्तरेति * धात्वर्थविषयत्वेन सञ्ज्ञायास्तन्मात्रभेदकत्वाच्छब्दान्तरस्य तु धात्वर्थवाचित्वे ऽपि धात्वर्थस्य स्पष्टभेदत्वेनाभेदाशङ्कायोगाद्विशेषणशब्दानां च विशेष्यपरत्वेन धात्वर्थमात्रे धातोरपर्यवसानाद्धात्वर्थभेदद्वारा भावनाभेदकत्वाद्वैलक्षण्यमभ्यासस्य तु पुनर्विधानात्मकत्वाद्विधेश्च धात्वर्थानुरक्तभावनाविषयत्वेनोभयभेदकत्वाद्भावनाभेदकत्वांशेन साम्याद्धातुभेदे धात्वर्थभेदाद्भावनाभेदो धात्वर्थभेदे तर्हि धात्वर्थाभेदाद्भावनाया अप्यभेद इति च प्रत्युदाहरणरूपेण पूर्वपक्षसौकार्यादनन्तरसङ्गतिरित्याशयः। उदाहरणासंभवेनाभ्यासचिन्तामाक्षेप्तुं भाष्योक्तं तावदुदाहरणमुपन्यासपूर्वकमाक्षिपति * तत्रेति * ननु प्रमाणान्तरसम्भवे ऽप्यभ्यासो ऽपि प्रमाणं न वेति चिन्ता भविष्यतीत्याशङ्क्याह * षडपीति * एकस्मिन्विषये ऽनेकप्रमाणव्यापृतावेकप्रमाणव्युत्पादनेनैव कर्मभेदसिद्धेः प्रमाणान्तरस्य व्युत्पादने परस्याधिकस्यानन्यलभ्यस्य भागस्य भज्यमानस्य फलस्य लाभो नास्तीत्यर्थः । तर्हि उदाहरणान्तरं भवत्वित्याशङ्क्याह * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * नन्वैन्द्रवायवादिनाम्नः संस्कार्यसोमपरत्वेनोक्तगतिद्वयाभावात्तद्युक्तमाख्यातमुदाहरणं भविष्यतीत्याशङ्क्याह * ऐन्द्रवायवमिति * देवतालक्षणगुणविधानार्थत्वादैन्द्रवायवादिनाम्नो वा ऽपि गुणाद्भेद इत्यर्थः । भिन्नादिनाम्नस्तर्हि निमित्तार्थत्वेनागुणवि-

४५०।६

धानार्थत्वात्तद्युक्तमाख्यातं भेदकं स्यादित्याशङ्क्याह * भिन्न इति* प्रकरणान्तरेण भेदसिद्धेरभ्यासस्य चाभेदकत्वान्नोदाहरणतेत्यर्थः। कैश्चिद्वैशाख्याममावास्यायां सप्तदशमारुतीस्त्रिवत्सरा उपाकरोति सप्तदश पृश्नीनुक्षणस्तान्पर्यग्निकृतानेतरा लभते प्रेतरात्सृज्-न्ति ततः संवत्सरा नवनीतपृश्नारुणा आनयन्ति तांश्चैवोक्षण-स्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरान्सृजन्ति ततः संवत्सरे राजी-वा आनयन्ति तांश्चैवोक्षणन्पर्यग्निकृतानेतरेतरा लभन्ते प्रेतरान्सृ-जन्ति ततः संवत्सरे पिशङ्गीरानयन्ति तांश्चैवोक्षणस्तान्पर्यग्निकृता-नेतरा लभन्ते प्रेतरां सृजन्ति ततः सम्वत्सरे सारङ्गीरानयन्ति तांश्चोवोक्षणस्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरात्सृजन्तीति पञ्च-शारदीयाख्याहीनसम्बन्धिषु पशुषु विहितेषु पञ्चकृत्वः पर्यग्निक-रणाभ्यासमुदाहृतमुपन्यासपूर्वकं निरस्यति * ये त्विति * पञ्च शारदीयास्तथेति चेदित्येकादशाधिकरणे प्राजापत्योत्सर्गवदुक्ष्णाम-प्युत्सर्गः संस्कारनिषेध इति प्राप्ते संस्कारनिषेधे सति त्रींस्त्रीनु-क्ष्णा एकैकस्मिन्नहन्यालभेरन्यं चोत्तम इति प्राप्ते कर्मण्यनेकगुणवि-धानाद्वाक्यभेदापत्तेर्नवमोपान्त्यव्युत्पादितारण्योत्सर्गवत्कर्मशेषनिषे-धेन चोदनैकवाक्यत्वादिति सूत्रेण सिद्धान्तयित्वा संस्काराणां च दर्शनादिति सूत्रान्तरेण प्रतिवर्षं संस्कारानुवाददर्शनात्कर्मैक्ये च द्रव्याभेदेन पुनः पुनः संस्कारानर्थक्यात्प्रतिवर्षं कर्मसमाप्तिरवसी-यतइत्युक्त्वा ननु वचनमेतद्भविष्यतीत्याशङ्क्य पर्यग्नि करोति प-र्यग्निकृतांश्चोत्सर्जन्तीत्यनेकार्थविधौ वाक्यभेदापत्तेर्वत्सतरीषु च प्रकृतिप्राप्तानुवादत्वात्तत्साहचर्येणोक्ष्वस्वप्यनुवादतैव न्याय्येति भा-ष्यकृद्वक्ष्यति। नन्वविधेयत्वात्पर्यग्निकरणस्य पुनर्विधानरूपा-भ्यासाभावे ऽपि यागानां पुनर्विधानेन भेदस्यैकादशे वक्ष्यमाणत्वा-दुदाहरणत्वं भविष्यतीत्याशङ्क्याह * न चात्रेति * द्रव्यदेवतान्व-यकल्पत्वाद्यागानां तद्भेदेन गुणादेव यागभेदावगतेर्नाभ्यासस्य व्यापारो ऽस्तीत्याशयः। उदाहरणासम्भवमुपसंहरतीति भाष्योक्तमे-वोदाहरणं समाधातुमाह * यथोदाहृतेष्वेव त्विति * भिन्ने जु-होतीत्यादेरनुपादेयार्थस्याख्यातान्वितस्यापि नाम्नस्तत्पारतन्त्र्यभा-वात् * प्रायेणेत्युक्तम् * श्लोकं व्याचष्टे * यानीति * ननु सर्व- ४५१।१ वाक्येषु चाख्यातं तेनाकाङ्क्षानिवर्त्यनादित्यनेन न्यायेनाश्रुताख्यात-तत्केतेष्वपि वाक्येषु तत्कल्पनेनाख्यातवत्त्वान्न क्व चित्संज्ञागुणा-योर्भेदकत्वं स्यादित्याशङ्कते * नन्विति * कल्पस्याख्यातस्य कल्प-कपारतन्त्र्येण भेदाभेदयोरव्यापारात् ज्योतिरादौ चैतेन सहस्रद-

क्षिणेन यजेतेत्यादिगुणान्वयव्यापारेणैतेनर्द्धिकामो यजेतेत्यादिफला॰न्वयव्यापारेण च श्रुतस्याप्याख्यातस्य भेदाभेदयोरव्यापारात्तदन्वितस्यापि नाम्नो ऽपि भेदकत्वमविरुद्धमिति परिहरति * तत्रेति * भेदव्यापाराभावमात्रं सम्भवशब्देनोक्तम् । ननु यच्छब्दाद्यनुपबद्धस्याख्यातस्य विधेयान्तरोपादानात्प्राक् प्रकृतनिवेशनिश्चये ऽप्याख्यातसामानाधिकरण्यं विना संज्ञात्वानिश्चयात्कथं तयाभेद इत्याशङ्क्य * तत इत्युक्तम् * यागसंज्ञात्वानिश्चये ऽप्यधिकारार्थाथशब्दान्वयेनानुष्ठेयक्रियासंज्ञात्वनिश्चयाद्भेदकत्वोपपत्तिरित्याशयः । नन्वेवं सत्यैन्द्रवायवं गृह्णात्युद्भिदा यजेतेत्यादिनाम्नामाख्यातपारतन्त्र्याद्भेदकत्वानुपपत्तेः सर्वाणि परस्परासङ्गतोत्पत्तिकगुणयोगाद्भिद्यन्ते नाम्नैव चैवमादीनां भेद इति चायुक्तं स्यादित्याशङ्क्याह * यत्रापीति * आनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेनागत्या तत्र भेदकतेत्याशयः । एकसंज्ञावरुद्धे संज्ञिनि संज्ञान्तरस्याप्यसम्भवाद् गुणशब्देन संज्ञाप्युपलक्षिता आनर्थक्यनिमित्तत्वप्रदर्शनायैवादिशब्देनाक्रियमाणो यागे न शक्यः कर्त्तुमित्यनर्थकः स्यादित्युदाहृतम् । नन्वेवं सत्यत्रापि गुणादेव भेदसिद्धेः किमभ्यासोपन्यासेनेत्याशङ्क्याह * तत्रेति * आख्यातस्य भेदकत्वसम्भवे तत्पारतन्त्र्याद् गुणस्य भेदकत्वं नास्तीत्याशयः । ननु भाष्ये पूर्वभेदाभेदस्य सन्देहाभिधानात्किमेकस्य कर्मणो वाचकमनेकस्येत्ययुक्तमुक्तमित्याशङ्क्य द्वेधा व्याचष्टे * किमिति * यजतिशब्दः किम् यागे ऽभ्यासपूर्वमन्यत्कर्मैकं विधत्ते किं वा प्रतियजतिशब्दाभ्यासमन्येषां कर्मणां भेद इति द्वितीयव्याख्यायां भाष्यार्थः । अपूर्वशब्दो ऽन्यवाची कर्मविशेषणमित्याशयः । पूर्वपक्षं प्रतिजानाति * किमिति * हेतुप्रश्नोत्तरत्वेन शब्दान्तरइति भाष्यं पूर्वोक्तभेदहेत्वभावाभिधानार्थत्वेन व्याचष्टे * कुत इति * इहेति भाष्यं कर्मप्रत्यभिज्ञाख्याभेदहेत्वन्तरार्थत्वेन व्याचष्टे * अपि चेति * शब्दस्य तत्त्वात्पूर्वमेव कर्मबुद्धौ निवेशितमित्यर्थः । श्लोकं व्याचष्टे * यथैवेति * नन्विति भाष्येणानन्यपरविधिपुनः श्रुतविधेयकर्मभेदं विनानर्थक्यापत्तेर्भेदकत्वमाशङ्क्य सत्यमिति भाष्येणार्थशब्दो ऽभिधेयवाची प्रयोजनवाची वेति विकल्प्याद्यपक्षे प्रयोजनाभावे ऽप्यभिधेयसद्भावानर्थक्यमित्युक्तं तद्व्याचष्टे * यथा चेति * वार्त्तिके निष्प्रयोजनत्ववाच्यनर्थशब्दः । ननु वेदस्य प्रयोजनवदर्थाभिधायित्वनियमस्यार्थवादाधिकरणे स्थितत्वान्निष्प्रयोजनत्वापादकः कर्मैक्यपक्षो न युज्येतेत्याशङ्क्याह * न चेति * स्वरूपपरत्वे ऽर्थवादानां प्रत्यक्षादिविरोधेनाप्रामाण्यापत्तेः स्तुत्यर्थतो-

४५२।१

क्ता पुनः श्रुतेश्च पूर्वकर्मविधायित्वे ऽप्यनपेक्षत्वेनाप्रामाण्यानापत्तेः निष्प्रयोजनत्वमात्रेण न भेदकत्वं कल्प्यमित्याशयः। न चेति भाष्येण निष्प्रयोजनतापि नास्तीत्युक्तं तत्र भाष्योक्तस्य देवताविध्यर्थत्वस्य गुणनिमित्तभेदापत्तेरयुक्तत्वेनापरितोषात्स्वयं तावत्प्रयोजनत्रयमाह * अस्ति चेति * मन्त्रवत्कर्मकालप्रयोगितिकं प्रयोजनमित्याशयः। विधिश्रवणात्प्रयोगार्हरूपाभावेन प्रयोज्यत्वानुपपत्तेरपरितोषात्प्रयोजनान्तरमाह * अथ वेति * प्रतिप्रधानप्रयोगमावृत्तिराभीक्ष्ण्यं आदिशब्देनातिशयः। नन्वाभीक्ष्ण्ये द्वे भवतइति स्मृतेः पञ्चकृत्वो ऽभ्यासो न युक्त इत्याशङ्क्याह * अस्ति हीति * सकृत्प्रयुक्तात्प्रतीते ऽप्यर्थे तात्पर्यातिशयद्योतनार्थत्वादभ्यासस्यातिशयातिरेकार्थो ऽभ्यासातिरेक इत्यर्थः। पञ्चकृत्वो ऽप्यभ्यासो दृश्यतइत्याह * तथेति * इन्द्रस्य त्वष्टृपुत्रवधात्तेजोधर्ममाविशद् बलं वायुं रूपमश्विनौ अर्द्धमात्मन्यतिष्ठन्ततः पाण्डुपत्न्यां कुन्त्यां धर्मेण तेजोनिक्षिप्तं युधिष्ठिरो ऽभवद्वायुनिक्षिप्तं बलं भीमः इन्द्रनिक्षिप्तं देहार्द्धमर्जुनः अश्विभ्यां माद्र्यां निक्षिप्तं रूपं नकुलसहदेवाविति पञ्चापीन्द्रावयवप्रकृतित्वादिन्द्रा एवेति पञ्चेन्द्रोपाख्याने कुमार्यैव वृद्धतां प्राप्तया पतिं मे देहीति पञ्चकृत्वो वरमीश्वरः प्रार्थित इति श्रूयतइत्यर्थः। नन्वेवं सति पतिपञ्चकवद्यागपञ्चकमपि स्यादित्याशङ्क्याह * न चेति * अर्थान्तरविवक्षया प्रयुक्तस्य शब्दस्यार्थान्तरकल्पनया प्रत्यवस्थानं छलं निद्रिते ऽन्यमनस्के वा प्रबोध्यमाने बुध्यस्व बुध्यस्वेति यावत्प्रबोधं वृद्धकुमार्याश्च यावद्वरलाभमभ्याससम्भवे ऽप्यपौरुषेयत्वाद्वेदे तादृगाशयानुपपत्तेः। प्रतिप्रधानानुष्ठानमावृत्तेश्च न्यायादेव सिद्धेरनुष्ठानादरस्य च विधित एव सिद्धेरपरितोषात्पञ्चानां विकल्पेन विधातृतेति तृतीयं प्रयोजनमाह * अथ वेति * अध्येतृभेदाभावाद्व्यवस्थितविकल्पानुपपत्तेरेकस्मिन्नध्येतरि विकल्पे सर्वाध्ययनानर्थक्यापत्तेरपरितोषाद्भाष्योक्तं प्रयोजनमभ्युपेत्यवादेनानुसन्धत्ते * अथ वेति * ननु समिदादिशब्दानां देवताविध्यर्थत्वनिरासेन नामधेयत्वस्य वक्ष्यमाणत्वाद्देवताविधानार्थता न युक्तेत्याशङ्क्याह * कर्मेति * विध्यपेक्षितविधेयविशेषसमर्पणार्थत्वान्नामधेयस्य प्राक्सिद्धविशेषापेक्षिण्यनुवादे ऽनुपपत्तेरगत्या गुणार्थत्वापत्तिरित्यर्थः। वैश्वदेवादिनामधेयस्य गुणाद्युपबन्धोपयोगेनार्थवत्त्वादनुवादे ऽप्युपपत्तिरित्याशयः। प्रत्यभिज्ञायाः कर्मैक्यप्रामाण्याभावे ऽपि गुणविधावुपपदाक्रान्तविधिशक्तित्वेन कर्मानुवादावगतेर्गुणविधित्वस्याप्यभ्युपेत्यवादत्वं सूचयितुमाह * त-

स्मादपीति * वस्तुतस्तु प्रत्यभिज्ञैवाभेदे हेतुरित्याह*यत्रापि चेति*
न देशान्तरस्थशब्दार्थप्रत्यभिज्ञानोक्तिरतिशयार्था विधेयभेदज्ञानं च
विना विध्यभ्यासाज्ञानाद्विध्यभ्यासाद्विधेयरूपभेदाभ्युपगमे ऽन्य-
न्योन्याश्रयापत्तेः पुनरुच्चारणरूपाद्वाचकाभ्यासाद्वाच्यभेदो ऽभ्यु-
पगन्तव्यस्तत्र जातेर्भेदायोगाद्व्यक्तेर्वाच्यत्वापत्तेस्तस्याश्चानित्यत्वा-
४५३।२ च्छब्दार्थसम्बन्धानित्यत्वाद्वेदाप्रामाण्यापत्तिरित्याशयेनाह * यदि
चेति * यदा त्वन्ये त्वभेदमाचार्याः कर्मणामेव मन्यन्तइत्येतन्म-
ताश्रयणेनैकैव यागव्यक्तिर्गकारादिव्यक्तिवन्नित्येष्यते तदा तद्व्यति-
रिक्तजात्यभावात्प्रत्यभिज्ञानायास्तद्विषयत्वाशङ्कानुपपत्तेर्व्यक्त्यैक्य-
प्रामाण्यं स्पष्टमेवेत्याशयेनाह *किं चेति* संख्यानिबन्धनस्तु भेदो
द्रव्यादिकारकात्मकव्यञ्जकभेदोपाधिको वर्णस्येव द्रुतादिभेदोपाधि-
क इत्याशयः। अस्मिंश्च पक्षे ऽभ्यासार्थत्वेनापि पुनःश्रुत्युपपत्तेर्न
कर्मप्रतीकतास्तीत्याह * यद्यपि चेति * स एव तर्ह्यस्त्वित्याश-
ङ्क्याह * न चेति * ज्योतिष्टोमे ग्रहणान्वयित्वेन श्रुतानां देवतानां
प्रकरणेन ग्रहणद्वारा योगान्वयात्प्रकरणस्य च युगपत्सर्वाङ्गग्राहि
त्वात्समुच्चयावगतेः प्रत्येकं च ग्रहणान्वयासंहतानां यागान्वया-
योगाभ्यासो युक्तो न त्वत्र देवतासमुच्चयहेतुरस्तीत्याशयः। पूर्वपक्ष-
प्रयोजनं चानेन समर्थितं तस्मादित्युपसंहारभाष्यस्थमपूर्वशब्दम-
यागेभ्यो ऽन्यत्ववाचितया व्याख्यातुमाह*तस्मादिति * भाष्योक्तां
सूत्रव्याख्यां स्पष्टयति * एवमिति * विधेरप्रवृत्तप्रवर्त्तनस्वभाव-
त्वाद्विहितविधावप्रामाण्यापत्तेर्विधिपुनःश्रवणस्य भेदकत्वावश्य-
म्भावात्कर्मैक्यवादिना कर्मानुवादाभ्युपगमेन विधिपुनःश्रवणाभावो
वाच्य इति मत्वा तदेव प्रश्नपूर्वमुपपादयति * कथमिति * नन्व-
न्याक्षिप्तशक्तित्वाभावे ऽपि विपरिवृत्तेरनुवादो ऽवसीयतइत्याशङ्क्या-
ह * यदि हीति * ननु व्रीहिभिर्यजेतेत्यादौ विपरिवर्त्तमानस्यैवानु-
वादाभ्युपगमादवश्यमनुवादे विपरिवृत्तेः किं चित्कारो वाच्यसू-
त्रानुवादत्वं चेत्तथा न क्रियते किं तर्हि क्रियतइति पृष्टवोत्तरमाह
* किं तर्हीति * समान्यतस्त्वनुवादत्वप्रसिद्धिरन्याक्षिप्तविधिश-
क्तित्वादेवेत्याह * तत्सामान्येति * एतदेव व्याचष्टे * यदा हीति*
नन्वनेकविध्यशक्तौ न क्व चिद्विशिष्टविधिः स्यादित्याशङ्क्याह * तां
चेति * विपरिवृत्त्यभावे विशिष्टविधिरगत्या स्यादित्याशयः । ननु
य एवं विद्वान्पौर्णमासीं यजतइत्यादौ रूपालाभादिनाप्युच्चारणदर्श-
नात्किमन्याक्षिप्तत्वेनेत्याशङ्क्याह * यत्वर्थेति * चतुर्जुह्वां गृह्णाति
प्रयाजेभ्यस्तत् गृह्णाति अष्टावुपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तत्

गृह्णातीति वाक्यान्तराभ्यां जौहावोपाभृताज्यद्रव्यलाभान्मान्त्रवर्णिकदेवतालाभाच्चाद्वान्यो नोत्तारणहेतुरस्तीत्याशयः । ननु सामान्यतो ऽनुवादत्वाप्रसिद्धावपि प्रकृतस्यानुवाद इत्यनुवादविशेषत्वमेव तर्हि विपरिवृत्तेरस्त्वित्याशङ्क्याह * सर्वत्रैवेति * शब्दशक्त्यावगतस्य विधित्वस्यासम्भवावधारणं विना नानुवादकता युक्तेत्याशयः।अतो ऽनुवादाकाङ्क्षा प्राप्तिश्चानुवादत्वे हेतुर्न प्राप्तिमात्रमित्युपसंहरति * तस्मादिति * अनुवादत्वावधारणे ऽनुवादाकाङ्क्षाया ४५४।४ हेतुत्वाभिधानस्य प्रकृतोपयोगमाह *तत्रेति* पूर्वं तेनैव शब्देनेत्यनेन प्रत्यभिज्ञानात्कर्मैक्यावगतेर्न तद्विरुद्धो भेदः पुनर्विधानात् सिध्यतीति यदुक्तं तद् दूषयितुमनुभाषते * यस्त्विति * दूषयति* प्रमाणेति * एतदेव विवृणोति * तथा हीति * श्लोकं व्याचष्टे * विधायका हीति * ननु दध्यादिवाक्ये ऽपि तर्हि कर्मान्तरत्वं स्यादित्याशङ्क्याह * यत्र पुनरिति * प्रत्यभिज्ञानस्यापि जातिविषयत्वेनोपपत्तेर्नात्यन्तबाध इत्याह * तस्मादिति * सामान्येनैक्ये चेदविवादः कस्य तर्ह्यत्र भेदश्चिन्त्यतइत्यपेक्षायामाह * तथा हीति * पश्वादीनां यागत्वसामान्यैक्ये ऽपि पशुत्वाद्यवान्तरसामान्यात्मकविशेषरूपेणान्योन्यं पशूनां चाग्नीषोमीयादीनां सोमानां ज्योतिष्टोमादीनाम् इष्टीनां च दर्शपूर्णमासाधानानां विधेयात्मकव्यक्तिरूपेणान्योन्यं भेदश्चिन्त्यत इत्यर्थः । सर्वत्र शब्देन संख्यादिसाधारणतास्याभिधानस्योक्ता । ननु विधिश्रुत्या कर्मान्तरज्ञानवद्यजिश्रुत्यैवैक्यज्ञानान्न बलाबले विशेष इत्याशङ्कते * ननु चेति * यागत्वमात्रज्ञाने तथा नैक्यज्ञानमिति परिहरति * नेतदिति * श्लोकं व्याचष्टे * न हीति * ननु शब्दार्थरूपस्येह भेदाभेदविचाराद्व्यक्तेश्चाशब्दार्थत्वाच्छब्दार्थभूतस्य च सामान्यस्यैक्याद्यजिश्रुत्यैव कर्मैक्यज्ञानसिद्धिरित्याशङ्किता स्वाशयं विवृणोति * नन्विति * शब्दावाच्यत्वेने- ४५५।४ तरासामवाच्यत्वाच्छब्दार्थतायामेवैक्यापत्तेर्विपरीतसाधनो हेतुरित्याशयेन परिहरति * येनैवेति * नन्ववाच्यत्वे सत्यैक्यवद्भेदस्याप्यनवगमात्कथं विपरीतसाधनतेत्याशङ्कां प्रश्नपूर्वं निरस्यति * कथमिति * विधेयरूपस्येह भेदाभेदविचाराज्जातेश्चाननुष्ठेयत्वेनाविधेयत्वात्तल्लक्षितानां व्यक्तीनामेव विधेयत्वावगतेर्विधेयसमर्पकस्य यजेस्तात्पर्यवृत्त्या व्यक्तिविषयत्वेनैक्यज्ञाने व्यापाराभावाद्विहितविधानायोगेन विधिपुनःश्रुत्या सन्नधिकृतैक्यज्ञानबाधाद्भेदज्ञानसिद्धिरित्याशयः । श्लोकं व्याचष्टे * यदिति * गत्वादिवन्न चैतेष्वित्यनेन व्यक्त्याकृतिभेदाभावमुक्तं दूषणायानुभाषयते * यत्त्विति *

दूषयति * सत्यमिति * कर्मव्यक्तीनां स्वरूपेण क्षणिकत्वाद्व्य-क्त्याकृतिभेदादिप्रमेयस्य विधेयरूपस्य विधिनित्यत्वेन नित्यत्वाद्विधे-यरूपव्यक्त्याकृतिभेदो ऽपन्होतव्यः स च शब्दान्तरादिभेदप्रमाणं विना नास्तीत्येतावता न तत्सद्भावे ऽप्यपह्नोतुं शक्य इत्याशयेन श्लोकं व्याचष्टे * यथैवेति * व्रीहियवद्रव्यभेदे ऽप्याग्नेयादेरभ्युदयनि-मित्तदेवताभेदे ऽपि चाभेदसूचनार्थं यजमानादीत्यादिशब्देन द्रव्य-
४५६।२ देवतोपादानम्। एतदेव व्यवहारेण द्रढयति * तथा हीति * याग-होमादिकर्मव्यक्तिवद्यागव्यक्तीनां स्वरूपवैलक्षण्यानुपलब्धेर्भेदानुप-पत्तिशङ्कानिरासार्थत्वेन प्राक् तस्मादिति व्याचष्टे * न चेति * यन्मात्रमिति श्लोकार्थमुपसंहरति * अतो ऽत्रेति * अतः शब्दप-रामृष्टप्रामाण्याविशेषमुपपादयति * न हीति * इष्ट्यादिषु सम-स्तेषु प्रत्येकं वा भेदप्रत्ययस्यानौपाधिकत्वाद् बाधाभावाच्च न प्रा-माण्ये विशेष इत्यर्थः । देशादिभेदे ऽपि विधेयरूपेण व्यक्त्यभेदो-पसंहारमेवकारसूचितं विवृणोति * तेनेति * येन कारणेन श-ब्दान्तरादिषट्कावधिरेव भेदस्तेन व्यक्तिभेदे शब्दान्तरादिप्रमाणा-भावाच्छब्दव्यक्तिवद्यागव्यक्तिषु नित्याभिव्यञ्जकभेदाद्भेदप्रतीतिरि-त्याशयः।ननु कर्मणः पूर्वापरीभूतानिष्पन्नत्वरूपत्वान्नित्यत्वं न सम्भ-वतीत्याशङ्क्य कूटस्थनित्यत्वाभावे ऽपि नित्यविधिविषयत्वरूपेण प्रवाहनित्यत्वसूचनार्थम् * तासु विधेयरूपास्वित्युक्तम् * एकवि-धिविषयभूतव्यक्तिवद्भिन्नविधिविषयभूतेष्विष्ट्यादिषु भेदप्रत्ययस्या-भिव्यञ्जकभेदनिबन्धनत्वनिरासायैवकारः । ननु सङ्कल्पात्मक-यागस्वरूपस्य मानसप्रत्यक्षगम्यत्वाद्विधेयरूपस्य च विधिगम्यत्वा-त्कथं देशाद्यभिव्यङ्ग्यतेत्याशङ्क्याह * तेभ्यश्चेति * विधेयरूपा-श्रयस्य यागस्वरूपस्य देशादिभिर्निष्पादनादनिष्पन्ने चाश्रयरूपे त-दाश्रयविधेयरूपाप्रतीतेर्देशादिना विधेयरूपाभिव्यक्तिरित्याशयः । द्रव्यदेवतामात्राद्यागसिद्धेर्न देशादिभ्यो यागसिद्धिरित्याशङ्क्य * फलेत्युक्तम् * देशादीतिकर्त्तव्यतारहिताद्यागात्फलासिद्धेर्विधे-यरूपोपलक्षितफलसाधनत्वरूपेण यागस्य देशादिभ्यः सिद्धिरित्या-शयः । यदा त्वथ प्रत्यक्षे नित्ये एवेति शब्दाधिकरणभाष्यानुसारा-द् बुद्धिकर्मणोरपि वर्णवत् कूटस्थनित्यतेष्यते तदा यागनित्यत्वे पूर्वकल्पनानुपपत्त्या शङ्कानिरासार्थत्वेनायं ग्रन्थो ऽनुष्ठानं नित्ययागा-भिव्यञ्जकमाश्रित्य शब्दाभिव्यञ्जकादुच्चारणाच्छब्दफलार्थप्रतीति-सिद्धिवत्तेभ्यो नित्ययागाभिव्यञ्जकेभ्यो ऽनुष्ठानेभ्यो यागफलस्य सिद्धिस्तेषां क्षणिकत्वाद्युक्ता ऽपूर्वकल्पनेत्येवं योज्यः । नन्वनित्याना-

मपि व्यक्तीनां नित्यसामान्योपलक्षितानां नित्यविधिविषयत्वोपपत्तेर्व्यक्तिनित्यत्वाभ्युपगमो वृथेत्याशङ्क्याह * यागत्वमेव चेति * विध्यन्तरविषयव्यावृत्तावान्तरसामान्यं विनानन्यविहितविधिविषयोपलक्षणायोगाद्यागत्वातिरिक्तस्य वावान्तरसामान्यस्याभावाद्व्यक्तीनामेव प्रवाहरूपेण कूटस्थत्वेन वा नित्यताभ्युपगन्तव्येत्याशयः। ननु भिन्नासु ज्योतिष्टोमादिव्यक्तिषु अभिन्नस्यैकाहादिशब्दस्य तज्जन्यस्य च प्रत्ययस्य यागत्वातिरिक्तावान्तरसामान्याभावेऽनुपपत्तेस्तान्येष्टव्यानीत्याशङ्कते * नन्विति * एकोपाधियोगादुपपत्तेः हरिहराति * नेति * एकाहशब्दस्योपाधिमाह * एकेनेति* अहीनशब्दस्याह * द्व्यादिभिरिति * यजिचोदिताहर्गणयोगस्योपाधित्वं प्रागित्यनेन सूचितम्। ननु द्वादशाहस्यापि यजिचोदिताहर्गणयोगेनाहीनत्वात्तस्मात्प्रागिति कस्मादुक्तमित्याशङ्क्याभ्युपैति चोदितत्वसत्त्रलक्षणस्यापि सद्भावेन तस्य केवलाहीनत्वासम्भवादित्याह * स त्विति * आसीरन्नित्यसिचोदितगतस्योपेयुरित्युपैतिचोदितगतस्य वा सततानुष्ठानस्य सत्त्रशब्दोपाधित्वमाह * तदवधिकमेवेति * द्वादशाहस्याप्यवधित्वेन सत्त्रतोक्ता सहस्रसम्वत्सरं तदायुषामसम्भवान्मनुष्येष्वित्यत्र षष्ठाधिकरणे सहस्रसम्वत्सरशब्दस्याहः सहस्रवाचितया वक्ष्यमाणत्वात्षड्त्रिंशत्सम्वत्सरादेस्तदवधिककालत्वेऽपि पूर्वपक्षे स्थित्वा सहस्रसम्वत्सरपर्यन्ततोक्ता सर्वसत्रान्ते विधानाद्वा यागगतपशुसोमातिरिक्तहविष्कत्वमिष्टिशब्दस्य पशुहाविष्कत्वं पशुशब्दस्य सोमहविष्कत्वं होमशब्दस्योपाधिमाह * हविर्विशेषेति * वस्तुवृत्तिकथनार्थं चेदमेकाहत्वाद्यवान्तरजात्यभावाभिधानं तत्सद्भावेऽपि त्वनेकज्योतिष्टोमविश्वजिदादिविधेयसाधारण्येनैकाहत्वादेरसाधारणविधेयोपलक्षणत्वायोगाद्व्यक्तिनित्यताभ्युपगन्तव्येत्याह * अथापीति * स्वमतेन शब्दान्तरादिषट्कस्य विधेयरूपभेदे व्यापारमभिप्रेत्य भिन्नानामपि व्यक्तीनां यजिवाच्ययैकयागत्वजात्योपलक्षितानामेकविधिविषयत्वोपपत्तेर्विधिविशेषाविषयत्वाच्च विधेयान्तरेभ्यो व्यावृत्त्युपपत्तेर्यागत्वातिरिक्तावान्तरजात्यभावोऽभिहितः स्वरूपभेद एव तु शब्दान्तरादिषट्कव्यापाराभ्युपगमे विधेयान्तरव्यावर्त्तकप्रतिविध्यसाधारणावान्तरज्योतिष्टोमत्वादिजात्या विना विधेयान्तरेभ्यो व्यावृत्त्यनुपपत्तेर्ज्योतिष्टोमादिव्यक्त्याकृतिभेदेऽप्यदोषाद्गकारादिवद्व्यक्त्याकृतिभेदो नास्तीति यदुक्तं तदयुक्तमित्याशयेन * आहैवमिति * एकाहत्वादिज्योतिष्टोमत्वादीनि प्रतिविध्यसाधारणान्यवान्तरसामा-

न्यानि यदि कल्पन्ते ततश्च स एवायं ज्योतिष्टोम इत्यादिप्रत्यभिज्ञा-याः सामान्यविषयत्वोपपत्तेर्देशादिभेदाद्व्यक्तयो यदि भिन्ना भवन्ति तथा प्यदोष इत्यर्थः ॥ स्वरूपभेदाभेदचिन्तापक्षे भिन्नानां व्यक्ती-नामेकविधिविषयत्वरूपेणैक्यस्यानादरसूचनार्थो ऽत्यन्तशब्दः परा-भिमतत्रैलोक्यवर्त्तियागव्यक्त्यैक्याभ्युपगमे ऽप्यनुष्ठानभेदविषयत्वेन भेदप्रमाणानां व्यापाराद् प्रौढ्या दर्शयति * तथेति * कर्मभेदं कु-र्यादिति भाष्यमस्मिन्पक्षे न युज्येतेत्याशयेनाशङ्कते * नन्विति * भाष्यस्यायुक्तत्वे ऽपि भेदचिन्ताप्रयोजनं तावत्सिद्ध्यतीति परिहर-ति * सर्वथा तावदिति * भाष्यमप्युपपादयितुमाह * तथापि त्विति * ग्रहयागेषु ज्योतिष्टोमवाक्येन ज्योतिष्टोमरूपतयानुष्ठान-विधानात् ज्योतिष्टोमरूपतायाश्च सर्वाभ्यासेष्वैक्यान्नानुष्ठानभेदचो-दनेति विशेषानिमित्तमित्याशयः विशेषनिमित्तान्तरमाह * अभ्या-सेष्विति * ज्योतिष्टोमरूपावयव्युत्पादनात्तदपेक्षया ग्रहयागाभ्यासे-ष्ववयवबुद्धिर्न प्रयाजाभ्यासेष्वित्यतो ऽपि निमित्ताद्विशेषः । वैषम्य-मित्यपिशब्दाभ्याहारेण योज्यम् । नन्वेवमपि कर्मभेदशब्देनैवंविधवैष-

४८७।४ म्यसूचनस्य किं प्रयोजनमित्याशङ्क्याह *एतत्ज्ञानस्य चेति* प्रया-जाभ्यासवत् ग्रहाभ्यासेष्वप्यनुष्ठानभेदचोदनायां धर्मग्रहणशक्त्या-पूर्वभेदात्पशुसोमाधिकरणपूर्वपक्षवत्सिद्धान्ते ऽपि सोमविकारेष्वे-कस्यैव ग्रहणस्य धर्मैः सकृदनुष्ठानेन च भवितव्यमिति प्रकृतितुल्या-नुष्ठानं पशुसोमाधिकरणसिद्धान्तप्रयोजनं न सेत्स्यतीत्याशयः । प्रौढेरेव सबीजत्वार्थं भाष्यसम्मतिमाह * तस्मादिति * अस्यैव स्व-मतत्वशङ्कानिवृत्त्यर्थं वक्ष्यमाणमेव भाष्यं स्वमतेनान्यथा व्याच-ष्टे * अथ चेति * बहुकृत्वो ऽपीति पूर्वपक्षभाष्योक्तार्थानुभाषणार्थं नन्विति भाष्यं विहिताविधानानर्थक्यापत्तेर्वाधिपुनः श्रुतेः कर्मान्तर-विधिशक्त्यवगमादयुक्तमाशङ्क्य व्याचष्टे * नन्विति * उच्यतइ-त्यादिभाष्यं समिदादिशब्दानां देवताविधित्वस्य नवमे निराकरि-ष्यमाणत्वादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * तत्रेति * की-दृशो ऽभ्युपेत्यवाद इत्यपेक्षायां पुनःश्रुतेर्देवताविधानाक्षिप्तशक्तित्वा-त्कर्मभेदकत्वाभावे ऽपि गुणाद्भेदो भविष्यतीत्येवं रूपं वक्तुं समि-द्वाक्येन शुद्धे यागे विहिते तनूनपादादिवाक्ये देवताविध्युपपत्तेर्न गुणाद्भेद इत्याशङ्कानिरासार्थं समिधो यजतीत्यादिभाष्यं व्याचष्टे * यत्तावदिति * भाष्यस्थस्य देवताशब्दस्योपलक्षणार्थत्वज्ञापनार्थो द्र-व्यशब्दः गुणस्य भेदकत्वाय पूर्वकर्मसंयोगासम्भवाभिधानार्थं तत्रेति भाष्यं व्याचष्टे * उभयमपि चेति * अभ्युपेत्यवादस्वरूपार्थं स

एष इति भाष्यं व्याचष्टे * अवश्यं चेति * समिद्वाक्यन्यायमुत्त-रेषु वाक्येष्वतिदिशति * एवमिति * अस्याप्यभ्युपेत्यवादत्वोपपा-दनार्थं गुणविधित्वं द्रव्यविधित्वेन देवताविधित्वेन चेत्येवं विक-ल्प्याद्यं पक्षं तावन्निरस्यति * गुणेति * द्वितीयान्तेन शब्देन द्रव्य-विधिर्निरस्त इत्यर्थः। गुणविधित्वमपि कीदृगित्यध्याहृत्य योज्यं होमे च प्रतिपत्तिकर्मणि प्रस्तरप्रहरणादौ प्रक्षिप्यमाणांशेन कर्मभू-तद्रव्यान्वयसम्भवे ऽपि यागे कथंचिद् द्रव्यस्य प्राधान्यलक्षणकर्म-त्वायोगान्न कर्मभूतद्रव्यान्वयः सम्भवतीत्याह * विशेषणा चेति * प्रयाजे ऽपि चेदित्यत्राधिकरणे श्रुत्यविनियुक्तानां मन्त्राणां स्वा-र्थसमवायकल्पकत्वासम्भवान्मान्त्रवर्णिकदेवताप्राप्त्यभावेन तत्प्रख्य-न्यायाभावान्नामधेयत्वानुपपत्तेर्विष्णुं यजतीतिवत्समिदादिशब्दानां द्वितीयान्तानां देवानां विधित्वं पूर्वपक्षयित्वा यजेः पूजावाचित्वा-भावेन देवतायाः पूज्यमानकर्मत्वायोगात्तदुद्देशांशस्य वा समाप्तित्वे-नाशब्दार्थत्वात्तत्कर्मणो ऽभिभूतत्वेन विवक्षानुपपत्तेरुद्देश्यत्वे ऽपि चानीप्सितत्वात्प्राधान्यलक्षणकर्मत्वानुपपत्तेः श्रुत्यविनियुक्तानामपि मन्त्राणामुपांशुयाजवद्यागाकाङ्क्षितदेवताकल्पकत्वोपपत्तेर्देवतावि-धित्वस्य निराकरिष्यमाणत्वाद्देवताविधित्वेनापि गुणविधित्वं न स-म्भवतीति द्वितीयं पक्षं निरस्यति * नचायमिति * तस्मादिति सिद्धान्तोपसंहारभाष्यं फलतो यागभेदोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * अनेन च यस्मात्समिदादिवाक्यैः प्रधानयागानुवादे पुनः पुनर्यागस्याभिधानापत्त्याद्देवतान्तरान्वयकरणाच्छक्तेर्विध्यानर्थ-क्यापत्तेरित्याद्यागविधित्वमभ्युपगम्य विहितविध्ययोगात् भिन्ना यागाभेदेन कार्या इत्येवं भाष्यं व्याख्यातम्। ननु यागभेदे ऽपि प्रयाज-समाख्ययैककार्यत्वावगतेर्विकल्पस्य न्याय्यत्वान्नाभ्यासो युक्त इत्या-शङ्कानिरासार्थं प्रत्यभ्यासं चेति भाष्यं तद्विवरणार्थं च न च यत्स-मिद्यागान्वयेन क्रतोरदृष्टमुपकाररूपं क्रियते तदेव तनूनपाद्यागा-न्वयेन तयोर्यागयोर्भिन्नत्वेन तदनुनिष्पाद्यदृष्टभेदावगतेः समाख्या-याश्च प्रधानप्राग्भावमात्रनिमित्तत्वेन कार्यभेदे ऽप्यविरोधादित्य-भिधानाय यागैक्ये ऽप्यनेकदेवतान्वयसम्पादनाद्यनुष्ठानाभ्यासोप-पत्तेः पूर्वपक्षप्रयोजनाभावाशङ्कानिरासार्थं च प्रयोजनभाष्यं स्पष्ट-त्वान्न व्याख्यातम्।

४५८।२

॥ आघाराद्याग्नेयादीनामङ्गाङ्गिभावाधिकरणम् ॥ ३ ॥

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ २ ॥

समप्राधान्याङ्गाङ्गिभावचिन्ताया लक्षणासङ्गतिं पौनरुक्त्यं चाशङ्कते * समस्तानीति * एवं समामनन्तीति प्रकारवाचिनैवंशब्देनानूयाजादिसूचनात् * समस्तानित्युक्तम् * आघारसमिष्टयजुषोर्होमत्वे ऽपि यागेष्वेव समप्राधान्यशङ्कोपपत्तेर्भूम्ना यागशब्दः अवघातादौ गुणप्रधानकर्मत्वचिन्ताया लक्षणार्थत्वाभावे ऽपि यथा प्रासङ्गिकसङ्गतिस्तथापीह नास्तीति केन * नामे त्युक्तम् * विशेषतश्चेयं चतुर्थोपान्त्ये करिष्यमाणत्वात्पुनरुक्तेतीयमित्यनेनोक्तम्।असङ्गतिं तावद्विवृणोति * अभ्यासेति * लक्षणार्थत्वशङ्कामुपन्यासपूर्वं दूषयति * कांचिदिति * पौनरुक्त्यं विवृणोति * महतेति * श्लोकार्थमुपसंहरति * तस्मादिति * चिन्ताद्वयं चैकस्मिन्नधिकरणे न युक्तमित्याह * य एवमिति * शब्दान्तरत्वादित्यपि भा-

४५९।३ ष्यमयुक्तमित्याह * अपि चेति * श्लोकं व्याचष्टे * शब्दान्तरत्वादिति * ननु प्रयोगचोदनाभावादर्थैकत्वमविभागादितिवत्तन्त्रेण चिन्ताद्वयं भविष्यतीत्याशङ्क्य * आह न चेति * समप्राधान्याङ्गाङ्गिभावयोः पक्षयोर्हेतू न दृश्येते इत्याशयः ।विध्यनुवादचिन्तैवाधिकरणार्थो नाद्येति समाधत्ते * तस्मादिति * द्वयोरेवोदाहरणत्वे वाक्यान्तरानर्थक्यमाशङ्क्याह * तत्रेतरेषामिति * कस्मात्समप्राधान्याङ्गाङ्गिभावो नाधिकरणपक्षावित्याशङ्क्य पौनरुक्त्या सङ्गतिहेत्वभावात्मकयुक्तित्रयपरामर्शायोक्तशब्दः ।नन्वेवमपि प्रकृतानां कर्मणामनुवदितारावपूर्वयोर्वा कर्मणोर्विधातारावि॑ति; प्रकृतापूर्वशब्दाभ्यां भेदाभेदयोरपि चिन्त्यत्वप्रतीतेश्चिन्ताद्वयापत्तिरित्याशङ्क्याह * तदिहेति * विध्यनुवादसिद्धौ पूर्वन्यायादेव भेदाभेदयोः सिद्धेः पृथगचिन्त्यत्वात्त्रिकस्य त्रिकस्यैकपक्षतेत्यर्थः । किमर्थं तर्हि त्रयोपन्यास इत्याशङ्क्य * उत्तरफलत्वेनेत्युक्तम् * विधातृत्वे ऽपि कर्मभेदाभावे पुनर्विधानार्थवत्त्वाय फलवाक्यस्थद्विवचनान्तदर्शपूर्णमासशब्दापेक्षितद्वित्वसम्पादनार्थमाग्नेयादिसमुदायद्वयविविधातृत्वापत्तेः सिद्धान्तवत्तेषामेव फलान्वयेनेतरेषामङ्गत्वात्समप्राधान्यासिद्धेरनुवादत्वे ऽपि चाग्नेयाद्यतिरिक्तकर्मानुवादित्वात्तेभ्यो ऽन्यत्वे सत्याग्नेयादिसमुदायद्वयाक्लृप्तेः फलवाक्यस्थदर्शपूर्णमासशब्दस्याग्नेयादिषट्कविषयत्वाप्रसिद्धेर्यजिविशेषकत्वायोगात्समप्राधान्यापत्त्याङ्गाङ्गिभावासिद्धेरुत्तरोत्तरस्य फलत्वज्ञापनार्थं त्रयोपन्यास इत्याशयः । नन्वेवमप्याभ्यासलक्षणभेदातिप्रसङ्गापवादार्थत्वेनाधिकरणस्य सङ्गतिसिद्ध्यर्थं भेदाभेदाभ्यां च विना विध्यनुवादत्वमात्रात्समप्राधान्याङ्गाङ्गिभावासिद्धेः प्रयोजनाभावेनाधिकरणानारभ्यत्व-

प्रसङ्गाद्भेदाभेदावेवोपन्यसनीयावित्याशङ्क्याह * त्रितयस्य चेति * ४६०।१
भेदाभेदयोः प्राधान्येन विचार्यत्वे ऽप्युपायभूतविध्यनुवादद्वारा फलभूतसमप्राधान्याङ्गाङ्गिभावद्वारा चेष्टभेदाभेदसिद्धिं मत्वा न श्रुत्योपन्यास इत्याशयः। पश्चात्तर्हि प्रकृतापूर्वशब्दाभ्यां तयोः श्रुत्योपन्यासः किमर्थमित्याशङ्क्याह * तत्र चेति * नन्वादौ भेदाभेदावुपन्यस्य तत्सिद्ध्यर्थत्वेन विध्यनुवादचिन्ताकस्मान्न कृतेत्याशङ्कते * किमर्थं पुनरिति * फलद्वारोपन्यासो भाष्यकृत्प्रक्रियेति केषांचित्परिहारमाह * एषा हीति * स्वमतेन लिङ्गदर्शनानुसारेणैवं कृतिमिति परिहरति * अथ वेति * नन्वेवमपि तत्रेति सन्देहभाष्यावयवो ऽनर्थक इत्याशङ्क्याह * तत्रेति * आग्नेयादिवाक्यानां कर्मविधायकत्वे सत्येव विद्वद्वाक्ययोस्तद्व्यतिरिक्तकर्मविधायित्वादेकः पूर्वपक्ष इत्युक्तशब्दान्तरत्वादिति भाष्यान्नेदृक् पूर्वपक्षः प्रतीयत इत्याशङ्क्य * समप्राधान्यद्वारेणेत्युक्तम् * द्वितीयपूर्वपक्षाभिप्रायसूत्रेति भाष्यावयव इत्याशयः। अनेन च विद्वत्संयुक्तावव्याख्यातप्रत्ययौ विधातारावित्यपिशब्दाध्याहारेणाद्यपूर्वपक्षवचनव्यक्तौ तावेवेत्येवशब्दाध्याहारेण चावृत्त्या द्वितीयपूर्वपक्षवचनव्यक्तावथ वेति भाष्यावयवं व्याख्याय विद्वद्वाक्याभ्यामेव कर्मविधावाग्नेयादि वाक्यानर्थक्याशङ्कानिरासार्थत्वेन तत्रेति भाष्यावयवो व्याख्यातो भवति * किं तावदिति * पूर्वपक्षभाष्यं व्याचष्टे * प्रथमं तावदिति * व्यतिरेकशब्देनाद्यपूर्वपक्षार्थतोक्ता भेदे च दृष्टसामर्थ्यावित्यनेनोक्तमाक्षेपं परिहरति * यद्यपि चेति * अभ्यासलक्षणभेदातिप्रसङ्गापवादार्थत्वे ऽप्यधिकरणस्य समप्राधान्ये सत्यङ्गाभावात्किमपेक्ष्य प्रधानतेत्याशङ्क्यायागानामाघारादीनां राजसूयवदङ्गत्वसूचनार्थं शब्दान्तरेणायागेभ्यो भेदः पूर्वपक्षितः। ननु विद्वद्वाक्ययोरनुवादत्वेन विधातृत्वाभावान्न पूर्वन्यायद्वयविषयतेत्याशङ्क्याह * न चेति * प्रकृतयागानुवादे च प्रयाजादेरपि प्रकृतत्वाविशेषेणानुवादापत्तेः सञ्ज्ञायाश्चाप्रसिद्धत्वेनाविशेषकत्वात्फलवाक्यस्य द्विवचनापेक्षिताग्नेयादिसमुदायद्वयसम्पादनमपि प्रयोजनं न सम्भवतीत्याशयेनाह * न चैषेति * न च लिङाद्यभावेनाविधातृतेत्याह * वर्त्तमानेति * यावदुक्थ्यो नोपाप्नोति तावदुपाप्नोतीत्यर्थवादात् पौर्णमासीवाक्यस्य यावदतिरात्रेणोपाप्नोति तावदुपाप्नोतीत्यर्थवादाच्चामावास्यावाक्यस्य विधित्वनिश्चयः यच्छब्दोपबन्धो ऽपि न विधिशक्तिं व्याहन्तीत्याह * सत्यपि चेति * विधायकत्वे च सत्यभ्यासाद्भेदसिद्धिरित्याह * न चेति * नन्वर्थवादता- ४६१।१

नयोः कस्मान्न कल्पितेत्याशङ्क्याह * न चेति * नन्वरूपत्वात्कर्मविधिर्न सम्भवतीत्याशङ्क्ते * किं पुनरिति * परिहरति * तदिति * हेत्वर्थतया साधारणशब्दं व्याचष्टे * सर्वस्मै वा इति * ननु विहिताज्यद्रव्यकेष्वेवानेन ध्रौवत्वमात्रविधिरित्याशङ्क्योपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतत्वाद्यथा कामी प्रतीयेतेति सूत्रेण दशमे हविर्विशेषाश्रवणेनोपांशुयाजे द्रव्यानियमं पूर्वपक्षयित्वा ध्रौवाद्वा सर्वसंयोगादित्यनेनाविहितद्रव्यकेषु ध्रौवविधिर्वक्ष्यमाणो दृष्टान्तितः। यच्च तत्र भाष्यकृता आज्यस्यैव नावित्यनेनाज्यविधिमाशङ्क्यैवमप्यनियमो यत्किं चिदाज्यमिति वक्ष्यते तदभ्युपेत्यवादमात्रमित्याशयः । ननु तृतीये मिथश्चानर्थसम्बन्ध इत्यत्राज्यभागक्रमाम्नानेन वार्त्रघ्नीवृधन्वत्याख्यमन्त्राणां तदङ्गत्वस्य वक्ष्यमाणत्वात्कथमनयोः कर्मणोस्तद्वशाद्देवताप्राप्तिरित्याशङ्कां निरस्यन्मात्रवर्णिकं व्याचष्टे * तथेति * आग्नेयादेर्निज्ञातदेवतात्वनार्थान्तरवाचिमन्त्रान्वयायोगात्तादर्थ्येन वाक्यविनियोगानुपपत्तावपि विद्धद्वाक्यविहितयोः कर्मणोरनिर्ज्ञातदेवतात्वेनैतन्मन्त्रान्वयाविरोधात् वाक्येन क्रमं बाधित्वैतदङ्गतया विनियोगोपपत्तिरनयोरित्यनेन सूचिता । नन्वनुवाक्याविधिस्थयोः पौर्णमास्यमावास्याशब्दयोः कालवाचित्वात्कथं वाक्येन कर्माङ्गतेत्याशङ्क्याह * न हीति * ननु कर्मणिलक्षणापत्तेः श्रुत्या कालार्थतैवोचितेत्याशङ्क्ते * नन्विति * कालस्याननुष्ठेयत्वेन मन्त्रानाकाङ्क्षत्वात्तदङ्गत्वे मन्त्रस्यानर्थक्यापत्तेरर्थवत्त्वाय लक्षणाप्युचितेति परिहरति * किं हीति * ननु कर्मणो ऽधिकरणत्वायोगात्तद्वाचित्वे सप्तमी न युज्येतेत्याशङ्क्याह * दृष्टश्चेति * अधिकरणस्याधेयसंस्कार्यत्वेनागारं गावो वास्यन्तामित्यादौ प्राधान्यदर्शनाल्लक्षणयाधिकरणवाचिन्याः सप्तम्याः प्राधान्यार्थता युक्तेत्याशयः । नन्वेकस्मिन्कर्मण्यनुवाक्याद्वयानर्थक्यं याज्यानुपलब्धेश्च यागानुष्ठानासिद्धिरित्याशङ्काद्वयं चतुर्द्धा परिहरति * तेनेति * अनुवाक्याद्वयस्यैकयागार्थत्वाद्विकल्पो याज्यापि चाश्रुता देवतलक्षणयाज्यानुवाक्या इत्यसमाम्नातयाज्यानुवाक्याविषये यागाङ्गदेवतावाचियाज्यानुवाक्याकल्पनस्मृतेराग्नेय्यनुवाक्यापक्षे याज्याप्याग्नेयी सौमीपक्षे सौमीकल्पेत्येकः परिहारः इतरेतरयोर्विहितद्वन्द्वापवादत्वेनैकशेषस्यापीतरेतरयोगावाचित्वादनुवाक्याद्वयस्य समुच्चयप्रतीतेस्तद्वशेनाग्नीषोमयोर्देवतात्वकल्पनाद्वयोरर्थवत्त्वं याज्या च तदानुरूप्येणैवाग्नेयी सौमी चान्या कल्पेति द्वितीयः । कर्मद्वयाभिप्राया

वीप्सा कल्पनालाघवे ऽप्येकैव द्विदेवत्या याज्येति तृतीयः । एकस्मिन्कर्मण्यनुवाक्याद्वयानर्थक्याद्याज्यानुवाक्यात्वे ऽपि चेतरेतेतरयोगोपपत्तौ अनुशब्दस्य च याज्यायामपि प्रैषपश्चाद्भावेनाविरोधात्समुच्चितयोश्चाङ्गत्वेनाग्नीषोमदेवत्यकर्माध्यवसानान्मनोतान्यायेनैकदेशद्वारा तत्प्रकाशनेनोभयोः सम्वादोपपत्तेरश्रुतकल्पनापरिहाराच्च श्रुतयोरेवं मध्ये ऽनुवाक्यैका याज्यैकेति चतुर्थः। आज्यभागयोस्तर्ह्यनुवाक्याकल्पदेवतानुपपत्तेः साकाङ्क्षत्वं स्यादित्याशङ्क्याह * आज्यभागयोस्त्विति * तौ होचतुरग्नीषोमौ किमावयोस्ततः स्यादित्यग्नीषोमयोः प्रक्रान्तयोः नाविति द्वितीयया यजिकर्मत्वानिर्देशाद्विष्णुं यजतीत्यादिवद्देवतात्वावधारणेत्याशयः । जुषाणो ऽग्निराज्यस्य वेतु जुषाणः सोम आज्यस्य वेत्विति याज्यायास्तु केन चित्साकाङ्क्षतानाशङ्क्येत्याह * याज्येति * नन्वनुवाक्ययोर्बाधितत्वात्तत्साकाङ्क्षत्वं स्यादित्याशङ्क्याह * अनुवाक्येति * रूपवन्तावित्युत्तरार्द्धं व्याचष्टे*तस्मादिति * पूर्वपक्षभाष्यार्थं व्याख्यातमुपसंहरति * अतश्चेति * ननु भेदे ऽपि चतुर्थोपान्त्यन्यायेन दर्शपूर्णमासाख्यानामेव यागानां प्राधान्यान्नेतरेषामङ्गत्वात्समप्रधान्यसिद्धिरित्याशङ्कते * भेद इति * तमेव न्यायं प्रश्नपूर्वकमाह *कुत इति* पृथक्त्वेनाभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं तत्सन्निधावसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुतान्यसम्बन्ध इति सिद्धान्तसूत्रावयवं केषु चिदेवेत्यध्याहारेण व्याख्यातुं पूर्वार्द्धं दर्शपूर्णमासाभ्यामिति द्विवचनश्रुतेर्दर्श इत्यभिधानस्य पूर्णमासशब्दवाच्यात्पूर्णमास इत्यस्य च दर्शशब्दवाच्यात्पृथक्त्वेन निवेशः प्रतीयते स च प्रकृतयागमात्रवाचित्वे पृथक्त्वायोगात्केषु चिदेव यागेषु युक्तो न सर्वेष्वित्यर्थः।दर्शशब्दस्याप्रसिद्धार्थत्वात्पूर्णमासशब्दवच्च केन चिद्यागनाम्ना सारूप्याभावात्कथं यागविशेषे निवेश इत्याशङ्क्यारम्भणीयाख्यशेषे दर्शो वा एतयोः पूर्वः पूर्णमास उत्तरो ऽथ यत्पूर्णमासं पूर्वमारभते तद् यथापूर्वं क्रियते तस्मात्पूर्णमासमारभमाणः सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावास्या वै स्वती पूर्णमासः सरस्वानुभावेतौ यथा पूर्वं कल्पयित्वा ऽऽरभत इत्यमावास्याख्ययागविशेषस्य दर्शव्यपदेशाच्चन्द्रदर्शनाद्वामावास्यायां तिथौ दर्शव्यपदेशात्प्रतिपद्दर्शषष्ठीषु न कुर्याद्दन्तधावनमित्यादौ चामावास्यायां दर्शव्यपदेशात्प्रसिद्धार्थतोक्ता अतो यागविशेषाणां फलवत्त्वात्फलवत्त्वस्यैव च प्राधान्यापरपर्यायमुख्यलक्षणत्वात्सन्निहितस्य फलासंयुक्तस्यासंयुक्तं प्रकरणादिति कर्त्तव्यतार्थित्वादिति तृतीयाधिकरणन्या-

४६२।१

येनाङ्गत्वकारणभागित्वादश्रुतान्यफलान्वयकल्पने च गौरवापत्तेर-ङ्गतैव युक्तेति सूत्रार्थः सङ्क्षेपेणोत्तरार्द्धेनोक्तः । श्लोकं व्याचष्टे * दर्शेति * विद्वद्वाक्याभ्यां समुदायद्वयाकरणे दर्शपूर्णमासनाम्नो प्रसिद्धार्थत्वेन यज्यर्थाविशेषत्वान्न चतुर्थान्त्यन्यायमुदाहरति * यथेति * ज्योतींषि वा एतानि य एते स्तोमा इत्यर्थवादे त्रिवृदादिस्तोमेषु ज्योतिष्ट्वव्यपदेशात् ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति च विधौ सोमयागस्य त्रिवृदादिस्तोमयोगावगमात्प्रसिद्धार्थेन नाम्ना यज्यर्थो विशेष्यतइत्यर्थः । यजिना नामार्थविशेषणे चतुर्थस्यैव चतुर्थपादाद्यन्यायमुदाहरति*तथेति * राजसूयेन स्वाराज्यकामो यजेतेति फलविधिपरे वाक्ये यजेः प्रकृतेष्टिपशुसोमयागमात्रानुवादित्वावधारणात्प्रसिद्धार्थेन यजिना नाम विशेष्यतइत्यर्थः । उत्तरार्द्धं व्याचष्टे * तदिहेति * ननु प्रकृतयागमात्रविषयत्वे दर्शपूर्णमासशब्दस्य तदवयवभूतयोर्दर्शपूर्णमासशब्दयोर्द्विवच-

४।३।४ नस्य च को ऽर्थ इत्याशङ्क्याह * ततश्चेति * अवयवार्थो समासार्थश्च द्वित्वं चाविवक्षितानि यस्मिन्पद इति विग्रहः। समासार्थेतरेतरयोगविवक्षायामवयवार्थाविवक्षानुपपत्तेस्तदविवक्षाभिधानम्।अर्थान्तरविवक्षायामपि करणत्वविवक्षया यजिसामानाधिकरण्याद्राजसूयनामवद्यागनामतेत्युक्ते ऽवयवार्थाविवक्षायां प्रवृत्तिनिमित्ताभावात्कथं यागनामतेत्याशङ्क्य वर्णपङ्क्तिमात्ररूपत्वेन रूढितोक्ता।ननु-रूढिर्योगमपहरतीति न्यायेनावयवार्थाविवक्षायामपि द्विवचनार्थाविवक्षा न युक्तेत्याशङ्क्याह * सुपामिति * नन्वमावास्यापौर्णमासीकालवाचिनोर्दर्शपूर्णमासशब्दयोस्तद्योगिष्वाग्नेयादियागेषु द्विवचनस्य च द्वित्वयोगिष्वाज्यभागादिषु लक्षणया प्रसिद्धिसम्भवान्नाप्रसिद्धार्थतेत्याशङ्कते * कथं पुनरिति * नन्वेवमपि प्रकृतिप्रत्ययसमुदायात्मकस्य पदस्याप्रसिद्धार्थत्वाद्यज्यनुरोधवृत्तित्वमपरिहार्यमित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * तन्नामेति * लब्धार्थप्रतिपादकानुरोधेनेवाविभक्तिव्याख्याविभक्त्यनुरोधेन वा प्रातिपदिकव्याख्या भविष्यतीत्याशयः । स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तरानन्वयवत्पदस्यापि स्वार्थासमाप्तस्य पदान्तरानन्वयान्नैकैकांशप्रसिद्धिमात्रेण यजिविशेषकता युक्तेति परिहरति * तदिति * श्लोकं व्याचष्टे * यद्यपीति * नन्वाग्नेयवाक्येनासम्भवत्समुच्चयपौर्णमास्यमावास्याकालद्वयगुणकर्मविधानाद् गुणानुरोधेन च प्रधानावर्त्ययोगाच्चशब्दयोगाच्च कालविकल्पानुपपत्तेरेककर्मासम्भविगुणद्वययोगेनाग्नेययागद्वित्वावगतेस्तयोश्चैकवाक्यविहितत्वावा-

न्तरसामान्यावच्छेदेनामावास्यापौर्णमासीकालयोगिषु यागान्तरेषु स-त्स्वपि द्वित्वसंख्यावृत्त्युपपत्तेर्द्वयोरपि प्रकृतिप्रत्ययार्थयोस्तत्र सद्भा-वाद्दर्शपूर्णमासशब्दस्याग्नेययागद्वयवाचित्वेन प्रसिद्धत्वाद्यजिविशे-षकत्वं भविष्यतीत्याशङ्क्याह * न चेति * विद्वद्वाक्ययोः प्रकृतया-गानुवादित्वाभावे पौर्णमास्यमावास्याशब्दयोस्तद्वाच्यकालयोगिप्रकृ-तयागनामत्वानवगतेस्तयोर्वा लक्षणया प्रकृतयागप्रवृत्तावपि दर्श-पूर्णमासशब्दयोस्तात्पर्यावधारणहेतुसामानाधिकरण्याभावात्पूर्णमा-सशब्दस्य किं चिद्वर्णसाम्याद्वाचकपौर्णमासीशब्दोपस्थापनेनाख्या-भूतपौर्णमासीशब्दविकारमात्रत्वाद्वा ततो ऽनन्यत्वेन दर्शशब्दस्य ज-घन्यवृत्तिसाम्याद् गौणत्वशब्दोक्त्या विरुद्धलक्षणयामावास्याशब्दै-कार्थ्यकल्पनाद्दर्शपूर्णमासशब्दस्य प्रकृतपौर्णमास्यमावास्याकालयो-गियागविषयत्वाध्यवसानं न भवतीत्यर्थः। ननु ज्योतींषि वा एतानि य एते स्तोमा इतिवद्वाचकशब्दसामानाधिकरण्याभावे ऽप्ययैते मोदमाना इवेत्यत्र धान्यशब्दस्य दीर्घशूकविषयत्वमाग्नेय्याग्नीमित्य-त्र चाग्नेयीशब्दस्य प्रकृताग्नेयीविषयतावसीयतइत्याशङ्क्य *अर्थेत्यु-क्तम् * शब्दान्तरवदर्थप्रकरणाभ्यामपि सामानाधिकरण्याध्य-वसानं न भविष्यतीत्याशयः । नन्वाग्नेययागयोः पौर्णमास्य-मावास्यानामत्वानवगतेर्दर्शपूर्णमासशब्दस्य तद्विषयत्वाध्यवसा-नाभावे ऽपि विद्वद्वाक्यस्थयोः पौर्णमास्यमावास्याशब्दयोरर्थाक्षिप्त-साध्यांशसामानाधिकरण्येनापूर्वयागनामत्वावगतेर्दर्शपूर्णमासशब्द-स्य तद्विषयत्वाध्यवसानात्प्रसिद्धार्थत्वेन यजिविशेषकत्वोपपत्तेर्वि-द्वद्वाक्यविहितयोरेव यागयोः फलवत्त्वेन प्राधान्यादितरेषामङ्गत्वं भविष्यतीत्याशङ्कते * कस्मात्पुनरिति * एतदेव सिद्धान्तन्यायतु-ल्यत्वापादनेनोपपादयति * तथा हीति * शङ्कोत्तरत्वेन श्लोकं व्याचष्टे * यदीति * पौर्णमास्यामावास्याशब्दयोर्यागनामत्वे ऽपि दर्शपूर्णमासशब्दस्य यागनामत्वानवधारणात्कालयोगेन च वृत्तेरा-ग्नेयादिष्वपि तुल्यत्वेन विद्वद्वाक्यविहितयोर्यागयोराग्नेयवदेक-वाक्यविधानाभावे भावान्तरसामान्यावच्छेदाभावाद्द्वित्वसंख्यापरि-च्छेद्यत्वानुपपत्तेर्नाष्टानां मध्ये तयोर्निष्कर्षः सम्भवतीति परिहरति नैतदिति श्लोकं व्याचष्टे * न हीति * ननु निष्कर्षायोगे ऽपि ययोः कयोश्चिद्वयोः फलान्वयो भविष्यतीत्याशङ्कते * स्यादिति * नित्यं वाष्टानां मध्ये ययोः कयोश्चिद्वयोः फलवत्त्वाय दर्शपूर्णमास-शब्देन ग्रहणं विकल्पेन वेति विकल्पाद्यपक्षे निर्द्धारणहेत्वभावा-त्प्रमाणाभावो द्वितीये चैकस्याङ्गप्रधानत्वविरोधापत्तिरिति परिह-

४६४।१

ति * तदिति * श्लोकं व्याचष्टे * विनेति*अतिदेशो सन्देहापत्ति-श्च द्वितीये पक्षे स्यादित्याह*·उभयात्मनां चेति * अभ्युपेत्यवादेन चैतदुक्तं वस्तुतस्त्ववान्तरसामान्यावच्छेदं विना द्वित्वानवधार-णान्नैको ऽपि पक्षः सम्भवतीत्याह * सर्वेति * ननु सिद्धान्ते ऽपि

४६५।४ षण्णां कथं द्वित्वापत्तिरित्याशङ्क्याह * सिद्धान्ते त्विति*नन्वेवं द्वि-वचनोपपत्तावपि प्रातिपदिकयोरप्रसिद्धार्थत्वाद्यजिविशेषकता न यु-क्तेत्याशङ्क्याह * तद्वशेन चेति * पूर्वपक्षे समुदायत्वानापादनाद्वै-षम्यमाह * नन्विति*ननु समुदायगताद्वित्वाभावे ऽपि कालगताद्वि-त्वापेक्षं द्विवचनं भविष्यतीत्याशङ्कते * अथेति * विद्वद्वाक्या-भ्यां फलवाक्यस्थदर्शपूर्णमासशब्दगतद्वित्वसम्पत्त्यर्थं समुदायद्वया-नापादने दर्शपूर्णमासशब्देन तात्पर्यप्रमाणाभावादाग्नेयादिविषयत-यानवधारितेनाख्यातं न विशेष्टुं शक्यमिति परिहरति * नेदृशेने-ति * कालगतायाः संख्याया यागान्वयकल्पना न शक्येत्याह * न चेति * समुदायगतसंख्यान्वयस्तु समुदायिनां युक्त इत्याह * समुदायेति * पूर्वपक्षप्रयोजनमुपपादितमुपसंहरति * तस्मा-दिति * सूत्रं द्वेधा योजयन् तत्सिद्धान्तमाह * तथेति * पौर्ण-मासीशब्देनोदाहरणीभूतविद्वद्वाक्ययोरुपलक्षणं प्रकरणशब्दस्य क-र्मव्युत्पत्तावालम्बनपदाध्याहारो भावव्युत्पत्तौ सहकारिपदाध्याहार इत्यर्थः । द्वितीयव्याख्याने ऽपि प्रकृतानामिति भाष्यानुसारं व-क्तुम् * ततश्चेत्युक्तम् * रूपावचनस्य प्रकृतानुवादहेतुत्वोपपाद-नार्थं य एवं विद्वानित्यादिभाष्येण सञ्ज्ञया कर्मविशेषाभिधानाद्रूपं च विनाविशेषाप्रतिपत्तेर्विध्यसम्भवो ऽभिहित आघाराग्निहोत्रादि-करणे सञ्ज्ञोपबन्धादित्यस्मिन्सूत्रे व्याख्यास्यमानत्वादुपेक्ष्य स्वयं विधिस्वभावमेव तावत्प्रश्नपूर्वमुपपादकमाह * कुत इति * भा-ष्योक्तामप्युपपत्तिमनुसन्दधानः श्लोकं व्याचष्टे * न हीति * वि-

४६६।२ ध्यनुरोधो ऽननुष्ठेयसामान्यवाचित्वनिरासायानेनेति विशेषणेनोक्तः अव्यक्तासु तु सोमस्येत्यनेन न्यायेनातिदेशाद्रूपलाभमाशङ्क्याव्यक्त-चोदितत्वेन सोमधर्मातिदेशस्य वक्ष्यमाणत्वादिह च श्रुतस्याख्यातस्य यच्छब्दोपबन्धेनाविधायकत्वाद्विध्यध्याहारस्यैव विधानयोग्यरूपव-त्कर्मावगतिसापेक्षत्वादातिदेशिकरूपालाभाद्विध्यध्याहारे विध्यध्या-हाराच्च विधेयत्वेनातिदेशिकरूपलाभे ऽन्योन्याश्रयापत्तेर्नातिदे-शाद् रूपलाभः सम्भवतीति सूचनार्थो ऽपूर्वशब्दः। नन्वनुवादो ऽप्य-ज्ञातरूपस्य न सम्भवतीत्याशङ्क्यानुवादस्य बुद्धिविपरिवृत्तिनिमित्त-त्वेन प्रकृतविषयत्वात्प्रकृतानां च ज्ञातरूपत्वेनानुवादसम्भवाभिधा-

नार्थम् अथ त्विति भाष्यं व्याचष्टे * प्रकृतेति * पूर्वपक्षोक्तं द्रव्यदेवतमनुभाष्येण पूर्वं निरस्यति * नन्विति * सत्यमित्युपहासः सूचितः। यागमात्रसाधारणत्वेन स्थितस्य ध्रौवस्य सञ्ज्ञाविशेषावच्छिन्नयागविशेषानवच्छेदकत्वात्सत्यपि लाभेनावच्छेदकत्वाख्यारूपतास्तीत्याशयः । यथाकथं चिदित्यनेन ध्रुवावाक्यस्यार्थवादसरूपस्याप्यन्यथानुपपत्त्या क्लेशेन ध्रौवत्वविशिष्टाज्यप्रापकत्वात्प्राप्तिक्लेशः सूचितः । मान्त्रवर्णिकदेवताप्राप्तिमाशङ्कितां निरस्यति * न हीति * न केवलं विरोधापत्तेः कर्मवाचित्वं न युक्तं किं तु लाक्षणिकत्वादपीत्याह * किं चेति * ननु लक्षणापि शब्दवृत्तिप्रकार एवेत्याशङ्क्याह * यदि हीति * सप्तमीनिर्देशादपि कालवाचितैव युक्तेत्याह * अपि चेति * कालस्य मन्त्रान्वयायोगात्तद्वाचित्वानुपपत्तिर्योक्ता तामप्यनुभाष्य निरस्यति * यत्त्विति * नन्वाज्यभागयोः कालयोगाश्रवणात्प्रधानद्वारा कालयोगाश्रयणे वा पौर्णमासीस्थप्रधानाङ्गभूतयोरिति च युगपच्छ्रुतिलक्षणाविरोधापत्तेः कालतश्च व्यवस्थाश्रयणे विकृतिषु य इष्टचेति वाक्येन कालविकल्पविधानात् पौर्णमासीकालोपांशुयाजाग्नीषोमीयविकारो यदामावास्यायां क्रियते ऽमावास्याकालसान्नाय्यविकारो वा पौर्णमास्यां तदा पौर्णमासकालप्रधानाङ्गभूतयोराज्यभागयोर्वृधन्वतीप्राप्तेरमावास्याकालप्रधानाङ्गभूतयोश्च वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधप्रसङ्गात्प्रधानसादुगुण्यार्थत्वाच्चाङ्गगुणानुष्ठानस्य तद्बाधे प्रधाने वैगुण्यापत्तेः कर्मवाचित्वेना ऽपि च पौर्णमास्यमावास्याशब्दयोः पौर्णमास्याख्यकर्माङ्गभूतयोराज्यभागयोर्वार्त्रघ्न्यौ अमावाख्यस्याकर्माङ्गभूतयोर्वृधन्वत्यौ इति कर्मकृतव्यवस्थार्थत्वेन वाक्यस्याविरोधोपपत्तेस्तत्र जयानिति यच्चाज्यभागव्यतिरेकजनितप्राधान्यार्थतैव युक्ता नापूर्वयोः कर्मणोः मन्त्रविधानार्थतेति स्वमतेन मान्त्रवर्णिकदेवताकल्पनानुपपत्तिप्रकारमाह * किं चेति * श्लोकं व्याचष्टे * सर्वत्रैवेति * यत्वनुवाक्याद्वयानर्थक्यपरिहारायाश्रुतयाज्याकल्पनपरिहाराय च श्रुतयोरेव वार्त्रघ्न्योर्वृधन्वत्योश्च मध्ये ऽनुवाक्यैका याज्या चैकेत्युक्तं तदनुभाष्य दूषयति * यच्चेति * अज्ञातदेवतात्वादेवापूर्वयोः कर्मणोः प्रकाश्येन देवतारूपेण प्रकाशकतया मन्त्रस्यानपेक्षितत्वात्प्रकाशनाख्ये याज्यानुवाक्याकार्ये वार्त्रघ्न्योर्वृधन्वत्योर्वा विनियोगाद्याज्यात्ववदनुवाक्यात्वमपि न स्यादित्याशयेनाह * अपि चेति * मन्त्रार्थस्य कर्मसमवाये सिद्धे मन्त्रस्यालिङ्गविनियोज्यत्वापत्तेस्तदभावाभिधानेन मन्त्रार्थस्य कर्मसमवायासिद्धिः प्रकाशकानपेक्षत्वायोक्ता वाक्यी-

४६७।१

यविनियोगान्यथानुपपत्त्या मन्त्रार्थस्य कर्मसमवायकल्पनामाशङ्क्य * वाक्ये चेत्युक्तम् * कर्मसमवेतार्थप्रकाशकत्वं विना मन्त्रस्य करणात्वायोगात्करणत्वश्रवणे तदन्यथानुपपत्त्या मन्त्रार्थस्य कर्मसमवायकल्पना नान्यथेतित्याशयः । अनुपूर्ववाचियोगेनानुवाक्यात्वमाशङ्क्याज्ञातदेवते कर्मणि विहितायां वैष्णव्यां व्यभिचारो ऽभिहितः । ननु सन्निपत्त्योपकारित्वसिद्धये ऽनुवाक्यात्वं कल्पयिष्यतइत्याशङ्क्याह * मान्त्रवर्णिकेति * समवेतार्थत्वसम्भवे सन्निपत्योपकारित्वेनारादुपकारित्वं बाध्यते नान्यथेत्याशयः । यच्चापूर्वकर्मविषयत्वे ऽनुवाक्याद्वयानर्थक्यं लिङ्गाविनियोज्यत्वाच्चादृष्टार्थत्वमुक्तं तदुभयमप्याज्यभागविषयत्वेन प्राप्नोतीत्याह * आज्यभागयोः पुनरिति * यागद्वित्वाद्देवताद्वित्वाच्चानुवाक्याद्वयस्यार्थवत्त्वं लिङ्गविनियुक्तत्वाच्च दृष्टार्थतेति दृष्टार्थशब्देनार्थवत्त्वस्यापि सूचनादित्यर्थः । यश्चानेकार्थविधिप्रसङ्गो ऽपूर्वकर्मविषयत्वे ऽस्तीत्याह * तत्र चेति * अपेक्षितविधानं त्वादावेवोक्तम् । नन्वाज्यभागाङ्गत्वस्य लिङ्गक्रमाभ्यामेव प्राप्तेस्तदर्थशास्त्रानर्थक्यमित्याशङ्क्याह * न चेति * लिङ्गस्य व्यवस्थापकत्वाशङ्कानुपपत्तेः क्रममात्रस्य निरासः मान्त्रवर्णिकदेवताप्राप्त्यभावमुप-

४६८।१ संहरति * तस्मादिति * सूत्रार्थमुपसंहरति * अतश्चेति * आनर्थक्यापत्त्यानुवादत्वानुपपत्तिमाशङ्कते * किं पुनरिति * आनर्थक्यमेवोपपादयति * पश्येति * दध्ना जुहोतीतिकरणत्वेन दधिविधानात्पदार्थचोदना दण्डी प्रैषानन्वाहेति दण्डप्रातिपदिकार्थविधानातद्भागार्थचोदना सोमेन यजेतेति विशिष्टविधानाद्वाक्यार्थचोदनेति यथाग्नेयादिवाक्येष्वनेन कर्तृसमीहितं कुर्यादित्यवगमे ऽपि कर्तृविशेषानुपादानात्सामान्यस्य चाकर्तृत्वात्कर्तृसमीहितसाधनत्वलक्षणधर्मबोधाशक्तत्वे ऽपि स्वर्गकामवाक्यस्य कर्मकर्तृविशेषोपादानेन धर्मबोधोपयोगित्वात्तच्छेषत्वेनाग्नेयादिवाक्यानां धर्मप्रमोपयोगस्तथा विद्वद्वाक्ययोरपि प्रयोगवचनाङ्गत्वाद्धर्मप्रमोपयोगो भविष्यतीति परिहरति * उच्यत इति * कथमनयोः प्रयोगवचनाङ्गतेत्याशङ्क्य द्वित्वासिद्ध्या * प्रयोजनभूतयेत्युक्तम् * द्वित्वसम्पादकत्वे ऽप्यनयोः कः प्रयोगवचनस्योपकार इत्यपेक्षिते प्रयोगवचने द्वित्वस्योपादानादित्युक्तम् । श्लोकतात्पर्यं व्याचष्टे *वाक्येति* अविधायकत्वेनानयोराग्नेयादिवाक्यवैषम्यमाशङ्क्याह * न हीति * ननु समुदायद्वयावचने ऽपि पौर्णमास्यमावास्याख्यकालद्वययोगेनाग्नेयादीनां द्वित्वासिद्धेर्नानयोर्द्वित्वासिद्धिप्रयोजनतेत्याशङ्क्याह * न

चात्रेति * कालकर्मणोरत्यन्तभेदात्कालगतसंख्यायोगः कर्मणो न सम्भवतीत्याशयः । विद्वद्वाक्याभ्यां विनाग्नेयादीनां द्वित्वासिद्धिं भाष्यकाराभिप्रेतत्वेन द्रढयति * एतदेव चेति * आग्नेयादीनि पयोन्तानि प्रधानानि आघारादीन्यारादुपकाराकाण्यङ्गानीत्यनुवादपक्षे प्रयोजनस्याङ्गप्रधानत्वस्यादावुपन्यासात्तत्सिद्ध्यर्थद्वित्वसिद्ध्यर्थतानुवादस्यावसीयतइत्याशयः । नन्वङ्गप्रधानत्वस्य प्रयोजनोपन्यासे ऽधिकरणान्ते कार्यता स्यादित्याशङ्क्याह * इतरथा हीति * प्रयोजनमप्यनुवादत्वनिर्वाहायादावुपन्यस्तमित्याशयः । अनुवादानर्थक्यपरिहारमुपसंहरति * तस्मादिति * कथं पुनरित्यादिभाष्येणैकवचनान्तयोः पौर्णमास्यमावास्याशब्दयोरनेकाग्नेयादिवाचित्वानुपपत्तिमाशङ्क्य समुदायशब्दतयैकवचनावक्लृप्तिमुक्त्वा कथं भिन्नवाक्यविहितानामाग्नेयादीनां साहित्यात्मकः समुदाय इत्याशङ्क्य रूपवन्तो हीत्यनेन प्रपञ्चेनानेकस्यैकधर्मान्वयेन शिष्टः कृतः समुदायो ऽस्तीत्युक्तं तद्व्याख्यातुमाशङ्कते * कथं पुनरिति * अभेदे समुदायायोगाद्भिन्नवाक्यविधानाभिप्रायो भिन्नशब्दः । प्रकृतत्वाविशेषाद्यजेः सर्वप्रकृतयागविषयत्वप्रतीतेः सर्वेषां चैककालयोगाभावात्तन्निमित्तो ऽपि समुदायो न सम्भवतीति सूचनायात्यन्तशब्दः व्याचष्टे * शक्यमिति * कालयोगनिमित्तनामधेयावच्छेदेन यजेः कालयोगियागविषयत्वावसायाद्भिन्नवाक्यविहितानामप्येककालान्वयात्समुदायः सम्भवतीत्याशयः।श्लोकं व्याचष्टे * यथैव हीति*ननु सत्यपि समुदाये पौर्णमास्यमावास्यानामधेययोः सामानाधिकरण्येन यागविषयत्वात्तेषां च बहुत्वान्नैकवचनोपपत्तिरित्याशङ्कानिरासार्थं भवति हीति भाष्यं व्याचष्टे * तद्गतेति * समुदायगतस्यैकत्वस्य समुदायसमुदायिनोरत्यन्तभेदाभावेन लक्षणया वा समुदाय्यन्वयावधारणादित्यर्थः । यदाग्नेयादीनां समुदायवचनावेताविति समुदायानुवादप्रयोजनाङ्गाङ्गिभावाभिधानार्थादुत्तरभाष्यात्पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वशङ्कां निराकर्त्तुमाह * समुदायीति * तच्छब्देन समुदायिनः परामृष्टाः एतदेवोपपादयति * तथा हीति * नञ् पूर्वेण सम्बद्ध्य किं त्वित्यद्ध्याहारेणोत्तरावयवो योज्यः । श्लोकं व्याचष्टे * पौर्णमासीमिति * समुदायस्य च कालयोगाभावात्तन्निमित्तयोर्नाम्नोः समुदायवाचिता न युक्तेत्याह * न चेति * पौर्णमास्यां पौर्णमास्या यजेतेत्यत्र समुदायस्य कालयोगमाशङ्क्यानयोर्नाम्नोस्तद्वाक्यविहितकालयोगनिमित्तत्वेन नामप्रवृत्तौ सत्यां तन्नामकानां

४६९।१

यागानां कालविधिः कालविधौ च सति नामप्रवृत्तिरितीतरेतरा-श्रयापत्तेरुत्पत्तिवाक्यविहितकालयोगनिमित्तस्यापि समुदायनाम-त्वात्फले विधानापत्ते (रितियुक्तेति सूचनायोत्पत्तिशब्दः समुदाय-नामत्वे ऽवयवानामसाधनत्वापत्तेः प्रत्येकमपूर्वककल्पनप्रमाणाभा-वाद्धात्वभेदेन भावनाभेदाभावे सत्यनेकधात्वर्थानुरक्तत्वे चानयोर्द-र्शपूर्णमासशब्देनैतएवाभिधीयन्त इति भाष्यं विरुध्येतेत्याह*यदि चेति*समुदाययोश्च फलसाध्यैकैकभावनापत्तेः[1]) कर्मभेदवाचोयुक्ते-रभिधेयाभावाद्विगतार्थत्वं स्यादित्याह * अत इति*तेषामर्थाधिकर-णवक्ष्यमाणा च धर्मव्यवस्थापूर्वैक्ये भज्येतेत्याह*सर्वेति*एकादशग-ता तन्त्रावृत्तिचिन्तादिशब्दोक्ता च द्वादशगता प्रसङ्गचिन्ता ऽपूर्वैक्ये भज्येतेत्याह*न चेति*समस्तान्वये चेतिकर्त्तव्यतायाः प्रत्येकाविकारे सौर्यादावतिदेशायोगादैकार्थ्याद्वा नियम्येन पूर्ववद्वा विकारो हीत्य-ष्टमाधिकरणसिद्धान्तो भज्येतेत्याह * नन्विति* दशमान्त्ये च प्राक्-सोमादेकपुरोडाशा पौर्णमासी सान्नाय्यरहितामावास्येति व्यवहारः पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वे न युज्येतेत्याह * सहस्रेति * नवमे च त्सरा वा एषा यज्ञस्य तस्माद्यत्किं चित्प्रा-चीनमग्नीषोमीयात्तेनोपांशु चरन्तीति उदाहृत्य यज्ञभागधर्मो वैत दुपांशुत्वं पदार्थधर्मो वेति सन्दिग्धे यज्ञस्य फलवत्त्वेन धर्मप्रयुक्तसा-मर्थ्याद्यज्ञस्य यत्प्राचीनेति व्यवहितेनापि यज्ञशब्देन प्राचीनशब्द-स्यान्वयप्रतीतेः श्रुत्या च प्राग्देशवाचिनः प्राचीनशब्दस्य लक्षणया तद्देशपदार्थपरत्वायोगाद्यज्ञभागधर्मत्वं पूर्वपक्षयित्वा प्राचीनशब्दस्य वीप्सा किं चित्किं चिच्छब्दसमभिव्याहृतयच्छब्दान्वयाद्वीप्सायाश्च बहुविषयत्वेनैकस्मिन्देशे ऽनुपपत्तेर्लक्षणयाग्नीषोमीयप्राग्देशपदार्थ-परत्वस्यैव न्याय्यत्वात्पदार्थधर्मतेति सिद्धान्तयितुं तद्देशानां वा सङ्घातस्याचोदितत्वादिति सूत्रे ऽङ्गप्रधानसङ्घातस्य यज्ञशब्दवाच्य-त्वाभावात्साङ्गप्रधानसङ्घातापेक्षया च प्राग्भाविनो ऽङ्गजातस्य य-ज्ञावयवत्वायोगेन प्राचीनयज्ञशब्दान्वये ऽप्यवयवव्यतिरेकजनितष-ष्ठ्यनुपपत्तेः । तत्सम्बन्धितयोपांशुत्वस्याचोदितत्वान्न यज्ञभाग-धर्मतेति वक्ष्यमाणत्वात्सप्तमान्त्ये च गवामयनिकेषु ज्योतिरादि-ष्वहस्सु नाम्नैकाहरूपज्योतिरादिधर्मेषु चोदकाच्च द्वादशाहधर्मे-षु प्राप्तेषु चोदकबलीयस्त्वात्तद्व ादशाहधर्माः कार्या नामबलीयस्त्वा-द्वैकाहधर्मा इति सन्दिग्धे प्रत्येकं फलसाधनत्वाभावेन नामावगत-प्रात्यात्मिकधर्म्मानाकाङ्क्षत्वादविरुद्धाधिकधर्मातिदेशकत्वे च ना-

---

[1] अयं पा० ढ० प्राचयः प्रतिभाति ।

मोपपत्तेर्द्वादशाहिकद्वादशोपसत्त्वैकादशिनीविहारदर्शनाभ्यां च लिङ्गाभ्यां चोदकानुग्रहेण द्वादशाहिकधर्मातिदेशे प्राप्ते फलवाक्यसाधनभूतानामह्नां साहित्यावगमे ऽप्युत्पत्तिवाक्येषु प्रत्येकमेव साधनत्वावगमाद्धर्माकाङ्क्षोपपत्तेर्नाम्नां च प्रत्यक्षत्वेनानुमानिकाद्यागत्वाव्यक्तचोदितत्वाहर्गणत्वाद्यनेकलिङ्गापेक्षाच्चोदकाद् बलीयस्त्वात् ज्योतिरादिनाम्नां च यागवाचित्वेनाधिकधर्मातिदेशकत्वायोगादेकाहरूपज्योतिरादिधर्मातिदेशं सिद्धान्तयित्वा लिङ्गं सङ्घातधर्मः स्यात्तदर्थापत्तेर्द्रव्यवदिति सूत्रेणाहःसङ्घातात्मकस्य गवामयनस्याहःसङ्घातात्मकद्वादशाहकार्यापन्नत्वेन नीवारादौ व्रीहिधर्मवत्तदीयद्वादशोपसत्त्वैकादशिनीविहारप्राप्तेर्लिङ्गद्वयोपपत्ति परमतेनोक्तां निराकर्त्तुं न वार्थधर्मत्वात्सङ्घातस्य गुणत्वादित्यत्र द्वादशशब्देन संख्यावाचितार्थादुक्तस्यापि सङ्घातस्य फलसाधनीभूताहःशब्दोक्तयागविशेषणत्वेन गुणभूतत्वात्साधनत्वाभावेन धर्माग्राहकत्वान्न सङ्घातकार्यापत्त्या धर्मप्राप्तिर्युक्तेति वक्ष्यमाणत्वात्सूत्रकृतो ऽपि समुदायवाचित्वाभावाभिप्रायो ऽवगत इत्याह * सङ्घातस्येति * यद्यप्यङ्गप्रधानसङ्घातसम्बन्धितयोपांशुत्वस्याचोदितत्वमनेनोक्तं तथापि यथाङ्गप्रधानानां समुदितानां फलसिद्धिहेतुत्वे ऽपि समुदायस्य शब्दवाच्यत्वाभावात्तत्सम्बन्धित्वेनोपांशुत्वस्याचोदनात्तथा प्रधानानां समुदितानामपि फलसाधनत्वे तत्समुदायस्य शब्दवाच्यत्वाभावेनाचोदनेति प्रकृतोपयोगसिद्धेरुदाहृतम् । कथं तर्हि समुदायवचनावेताविति भाष्यमित्याशङ्क्याह * तस्मादिति * सकृदुच्चरिते चास्मिन्विवक्षैकैव दृश्यतइत्यनेन न्यायेनानेकार्थस्यापि शब्दस्य सकृदुच्चारणेनैकार्थपरत्वायोगात्पौर्णमास्यमावास्याशब्दयोरनेकयागनामत्वायोगशङ्कानिरासार्थं सकृदुच्चरितस्याप्यन्योन्यसापेक्षानेकार्थपरत्वोपपत्त्यै समुदायस्योपलक्षणाख्योपसर्जनत्वोक्त्यर्थत्वेन समुदायो बचनमाग्नेयाद्युक्तावुपलक्षणीकृतो निमित्तमेतयोरिति कृत्यल्युटो बहुलमिति निमित्ते ल्युटं व्युत्पाद्य समुदायवचनशब्दो व्याख्येय इत्याशयः । समुदायशब्दतयेति भाष्यस्य का गतिरित्याशङ्क्याह * तेषां त्विति * समुदायिवाचिनोरपि पौर्णमास्यमावास्याशब्दयोर्वाच्यसमुदायी लक्षितसमुदायगतसंख्याद्वारैकवचनयोगाभिधानार्थं समुदायशब्दतोक्तेत्यर्थः॥ कथं समुदायशब्दत्वोक्त्यायमर्थो लभ्यतइत्याशङ्क्य समुदायापेक्षः शब्दः समुदायशब्द इति शाकपार्थिववन्मध्यमपादलोपिसमासत्वं भाष्यकृतोक्तमिति सूचयितुमाह * तथा चेति * नन्व-

नयोः समुदायवाचित्वाभावे समुदायवाचियूथादिशब्ददृष्टान्तोपा-
४७०।२ दानमयुक्तमित्याशङ्क्याह * यूथेति * कुलपर्षच्छब्दयोराकृतिवा-
दे ऽनुदाहृतत्वादस्त्येव सङ्गतिश्चात्र वृक्षा हि बहवो वनमित्यादिना
समुदायोपलक्षितमुदायिवाचिता यूथादिशब्दनां तत्रोक्तेति सूच-
नार्थं द्विवचनं तन्त्राविरोधात्तु तेषां समुदायवाचित्वे ऽपि समुदा-
यनिमित्तैकवचनलाभमात्रसाम्याद्दृष्टान्तत्वोपपत्तिर्यदा त्वित्यनेनो-
क्ता दर्शपूर्णमासशब्देन तएवाभिधीयन्तइति भाष्यावयवपर्यालो-
चनयापि समुदायवचनशब्दस्य समुदायिवाचित्वेन तत्पर्यायतया
दर्शपूर्णमासशब्दयोस्समुदायिभिधानत्वार्थत्वं गम्यतइति सूचयितुं
वेदेति भाष्यमर्थतो व्याचष्टे * एतेनेति * पौर्णमास्यामावास्या-
शब्दयोः समुदायिवाचित्वे त्वद्व्याख्योपपत्तेः समुदायिवाचितैव
समुदायवचनशब्देनोक्तेत्याशयः । तत इति भाष्यं समुदा-
यानुवादप्रयोजनाभिधानार्थत्वेन व्याख्यातुं पूर्वोक्तमेव स-
मुदायानुवादप्रयोजनं स्मारयति * तस्मादिति * इदमे-
कमिदं चैकमित्येकत्वद्वयविषयं प्रत्ययमपेक्ष्य द्वित्वोत्पत्तेर्द्वित्व-
स्य निमित्तकारणं यो द्वित्वे ऽनपेक्ष्यमाणत्वादपेक्षाख्य एकत्वद्वय-
प्रत्ययस्तस्य सिद्धिरित्यर्थः । एतदेव चतुर्थोपान्त्यन्यायाभिधानेनो-
पपादयितुं तदीयसिद्धान्तसूत्रावयवं तावत्पठति * यथेति *
न्यायमभिधत्ते * तद्द्वित्वेति * पौर्णमास्यमावास्याशब्दोक्तसमुदाय-
द्वित्वानुसारित्वाद्दर्शपूर्णमासशब्दयोः समुदायविषयत्वे ऽभिहिते
ननु द्विवचनान्तत्वमात्रेण प्रपौर्णमास्यमावास्याशब्दविलक्षणयोर्दर्श-
पूर्णमासशब्दयोस्तत्सम्पादितसमुदायद्वित्वानुसारित्वानवसायात्कथं
तद्विषयत्वावगतिरित्याशङ्क्याह * अस्ति चेत्याद्युक्तं * दर्शशब्दस्य
विरुद्धलक्षणया दर्शनविपर्ययादर्शनगमकत्वात्स्पष्टामावास्याविष-
यत्वप्रतिपत्तिरित्यर्थः। शक्यते चेति तत्रत्यं भाष्यं पठितं दर्शो वा
एतयोः पूर्व इत्युपक्रम्यामावास्या वै सरस्वतीत्युपसंहाराद्दर्शामावा-
स्ययोः सामानाधिकरण्यावगतिः। भाष्यं व्याचष्टे * तेनेति * पौ-
नरुक्त्यं शङ्कते * ननु चेति * विद्वद्वाक्ययोः समुदायानुवादत्वे
स्थिते ऽपि दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वाद्यागमात्रे ग्रहणशङ्का-
निरासायैतदधिकरणस्य प्रयोजनाधिकरणं तदिति पौनरुक्त्यं परि-
हरति * नैष दोष * इति हिशब्दो ऽपिशब्दार्थे पौर्णमास्यधिकरणं
विनेज्याधिकरणपूर्वपक्ष एव स्यादितीज्याधिकरणस्य पौर्णमास्यधि-
करणाधीनत्वात्पौर्णमास्यधिकरणप्रयोजनत्वेनारम्भ इत्यर्थः । भा-
ष्योक्तं फलवाक्यस्थद्वित्वसिद्धिप्रयोजनत्वमुपपाद्य स्वयं कालवा-

क्यस्थयोस्तृतीयान्तयोः पौर्णमास्यमावास्याशब्दयोराग्नेयादित्रिकद्वयनामत्वसिद्धिप्रयोजनताप्यस्तीत्याह * इदमिति * विद्वद्वाक्याभ्यामनयोः शब्दयोस्त्रिकद्वयनामत्वाकरणे का पौर्णमासी कामावास्येत्यज्ञानान्नैतद्वाक्यविहितस्त्रिकस्य त्रिकस्य कालयोगः सिद्ध्यतीत्याशयः। वाक्यान्तरैरेवाग्नेयादीनाङ्कालविधानेनैतस्य कालवाक्यस्यानर्थक्यान्नैतद्वाक्यापेक्षितनामनामिसम्बन्धसिद्धिप्रयोजनत्वं विद्वद्वाक्ययोः सम्भवतीत्याशङ्कते * तत्रेति * एतद्वाक्यविहितस्त्रिकस्य त्रिकस्य परस्परसहितस्य साङ्गस्य कालयोगो न वाक्यान्तरैः सिद्ध्यतीति परिहरति * उच्यतइति * श्लोकं व्याचष्टे * उत्पत्तीति * परस्परसहितश्चेत्यनेनैकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात्स्यादित्येकादशाधिकरणवक्ष्यमाणा प्रधानकालतन्त्रतोक्ता साङ्गशब्देनाङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मादेकदेशत्वमिति तदन्तरा गर्भिणीन्यायवक्ष्यमाणाङ्गाङ्गानां प्रधानकालतोक्ता यस्मिन्नित्यनेन तुल्यानां तु यौगपद्यमेकशब्दोपदेशात्स्याद्विशेषाग्रहणादित्येकादशाधिकरणवक्ष्यमाणस्याङ्गानुष्ठानतन्त्रत्वस्य प्रधानप्रयोगतन्त्रत्वमन्तरेणासिद्धेरर्थाक्षिप्ता प्रधानप्रयोगतन्त्रतोक्ता कालयोगान्यथात्वप्रयोगान्यथात्वापादकतौत्पत्तिकेत्यनेनोक्ता नन्वितरेतरयुक्तानां साङ्गानां च करणत्वावगमात्तादृशानां कालसंयोगे सति समुदायद्वयस्यापीतरेतरसाहित्यापत्तिः कालद्वये प्रयोगः स्यादित्यनिष्टापत्तिं शङ्कते * ननु चेति * पौर्णमासीकाले ऽमावास्याख्यसमुदायप्रयोगो ऽमावास्याकाले वा पौर्णमास्याख्यसमुदायप्रयोगो ऽन्यसाहित्यलभ्यत्वेनौपाधिकत्वादौपाधिकस्य त्वाकाङ्क्षां विना विधानायोगात्कालद्वयप्रयोगे चोत्पत्तिवाक्यविहितैककाल्यविरोधापत्तेर्नास्माद्वाक्यात्प्रयुज्यतइति परिहरति *अत्रेति* श्लोकं व्याचष्टे *अमावास्या हीति * कालद्वयप्रयोगे व्यवस्थितकालत्वानिमित्तद्विवचनान्तदर्शपूर्णमासशब्दवाच्यत्वायोगाद्यजिविशेषकत्वं न स्यादित्यदर्शत्वमित्यनेन सूचितम्। ननु फलं भवतु भावयेदनेनेत्थमिति प्रयोगविधिनाङ्गप्रधानयोर्युगपदनुष्ठानविधानात्प्रयोगविधिवशेनैवाङ्गानां प्रधानकालत्वसिद्धेरेतद्वाक्यमनर्थकमित्याशयेनाशङ्कते * आहेति * फलभवनकालस्याप्रत्यक्षत्वेनाङ्गप्रधानकालपरिच्छेद्यत्वात्प्रधानानां चोत्पत्तिवाक्यालोचनेन प्रत्येकं कालयोगात् षट्सु पौर्णमास्यमावास्यासु प्रयोगावगमात्तावत्कालाबहिर्भावमात्रेणाङ्गानां प्रयोगवाक्यावगतप्रधानकालत्वोपपत्तेरेकस्यां पौर्णमास्याममावास्यायां वा साङ्गप्रधानप्रयोगो नैतद्वाक्यं विना लभ्यतइति वक्ष्यमाणाशयेन प

४७१।१

४७२।१

रिहरति*उच्यतइति*मान्त्रवर्णिकमित्युपहासः कालस्य प्रयोगाङ्गत्वात्प्रयोगस्य च साङ्गप्रधानविषयत्वादुत्पत्तिवाक्यावगतकालयोगेनैवाङ्गप्रधानयोरेककालत्वावगतेरित्यन्तैककालत्वायोगाच्च सन्निकृष्टकालत्वप्रतीतेर्दूरस्थानामङ्गानामनुपकारित्वावसायादेकस्यां पौर्णमास्याममावास्यायां वा साङ्गप्रधानप्रयोगो ऽस्माद्भिनैव लभ्यतइत्याशयेनाशङ्कते * नन्विति * उत्पत्तिवाक्यस्थस्य कालस्य प्रयोगाङ्गत्वात्साङ्गप्रधानविषयत्वानवगतेः सन्निकृष्टैरुपकर्त्तव्यमिति विधितो ऽनवगमान्न दूरस्थानामनुपकारित्वे किं चित्प्रमाणमस्तीत्याशयेन परिहरति * सन्निकृष्टैरिति * ननु य इष्ट्या पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां वेत्यनेनैव पश्वादेः सद्यस्कालत्वायाग्नेयादीनां प्रकृतौ पूर्वेद्युरन्वाधानाद्यङ्गविचारितद्वैयहकाल्याद्विकृतिष्वपि तत्प्राप्तेः सद्यस्कालत्वायेष्टिशब्दार्थवानित्याशयेन परस्परसाहित्याङ्गसाहित्ययोः सिद्धेरेतद्वाक्यमनर्थकमित्याशङ्कते *ननु चेति * षण्णामप्यनेन साहित्यं स्यान्न त्रिकस्येति परिहरति * सत्यमिति * श्लोकं व्याचष्टे * न तावत्त्रिकस्येति * रूढित्वप्रदर्शनाय सोमाङ्गेषु दीक्षणीयादिषु दार्शिकपौर्णमासिकाविद्ध्यन्तप्रवृत्तेः सोमे ऽपीष्टेर्दर्शपूर्णमास्याख्याया विध्यन्तस्य प्रवृत्तिरिति पूर्वपक्षाभिधानार्थं सूत्रं पठितम्।नन्वेवं सति पौर्णमास्यमावास्यावा-

४७३।२ क्याभ्यामेवेष्टप्रयोगासिद्धेरिष्टयेत्यनर्थकं स्यादित्याशङ्क्य * प्रकृताविष्युक्तम् । नन्विष्टिवाक्येनेष्टप्रयोगासिद्धावपि देशवाक्ये त्रिकद्वयस्योत्पत्तिवाक्यावगतकालयोगनिमित्तभिन्नशब्दोपादानेनेतरेतरयोगावगतसाहित्याविवक्षया स्वसमुदायिस्वाङ्गसाहित्यमात्रसिद्धेरिष्टप्रयोगः सेत्स्यतीत्याशङ्कते * नन्विति * देशान्वयनिमित्तेन साहित्येन कालान्वयसाहित्यानवगतेर्नैकैकस्य त्रिकस्य साङ्गस्यैककालत्वं सिद्ध्यतीति परिहरति * तत्रेति * श्लोकं व्याचष्टे * भेदेनापि हीति * भेदेनापि प्रयुज्यमानानां देशं प्रतिसाहित्योपपत्तेरितरेतरयोगानुरोधात्कालतन्त्रत्वाभ्युपगमे च षण्णामेवैककाल्यापत्तेरुत्पत्तिवाक्यानुरोधात्वितरेतरयोगाविवक्षायामन्योन्यानपेक्षाणां निरङ्गानां च कालयोगापत्तेर्न देशवाक्येनाप्यभिप्रेतप्रयोगासिद्धिरित्यर्थः । षट्स्वित्यनेन पूर्वं दृष्टान्तव्याजेनाग्नेयादेःप्रत्येकानुष्ठानापत्तिमङ्गानां च षट्पक्षान्तराले सकृदनुष्ठानापत्तिमुक्तामत्रापि योजयित्वा प्रयोगभेदविधानाभावादिहापि वा कर्मपृथक्त्वात्तेषां तन्त्रविधानात्साङ्गानामुपदेशः स्यादित्येकादशवक्ष्यमाणप्रतिप्रधानावृत्तिन्यायाभावे ऽप्यभ्युपेत्यवादेनाथ वेत्युक्तोत्पत्तिवाक्यावगतस्य पौर्णमा-

सीकालत्वस्यामावास्याकालत्वस्य चैकस्यामपि पौर्णमास्याममावास्यायां वा प्रयोगे विरोधाभावाद्विरुद्धसमुदाययौगपद्यबाधे ऽप्यनुपादेयसमदेशान्वयावगतस्वसमुदायियौगपद्यबाधायोगमथ त्वित्यनेनाशङ्क्य तत इत्यनेनैवमप्यावृत्त्योभयसमीपे ऽङ्गप्रयोगस्येष्टस्यासिद्धिरित्युक्ते करणविभक्तिवशेनोभयोरपि समुदाययोरङ्गसामीप्यावगतेस्तत्सम्पत्त्यर्थमावृत्तिम् *आशङ्क्याथ वेत्युक्तम् * सकृदष्टाभ्यां नवम्यां वाङ्गप्रयोगे समुदायद्वयस्य तुल्याङ्गसामीप्यसम्पत्तेरत्यन्तसामीप्यस्य चैकस्मिन्नप्यशक्यत्वान्नावृत्तिसिद्धिरित्याशयः । ननु फलवाक्येन साध्यसाधनेतिकर्त्तव्यताविशिष्टभावनाविधायिनाङ्गप्रधानयोर्युगपत्प्रयोगविधानाद्यावता विलम्बेन विनानुष्ठानाशक्तिस्ततो ऽधिकस्य विलम्बस्य निवारणात्प्रधानकालएवाङ्गानुष्ठानप्रतीतेरौत्पत्तिककालाविरोधाच्च समुदायद्वययौगपद्यानुपपत्तेः कालवाक्याभ्यां विनापीष्टप्रयोगसिद्धिरित्याशङ्क्याह * अनेनैवेति* फलवाक्यस्य स्वरूपेण फलविधिमात्रार्थत्वाभ्युपगमादुत्पत्तिविनियोगवाक्यैकवाक्यतया च प्रयोगविधानार्थत्वाभ्युपगमात्फलाविधित्वरूपेणेष्टप्रयोगसाधकत्वं प्रयोगविधित्वरूपेण वेति विकल्प्य आद्यपक्षे ऽयमतिदेशः एतदेव विवृणोति * फलस्यापीति * सिद्धे ऽपीत्यपिशब्दस्योत्कर्षो ऽन्यस्य वाध्याहारः प्रयोगपरत्वं विना प्रयोगतन्त्रासाधकत्वात्कालतन्त्रासाधकतेत्याशयः । द्वितीयपक्षाश्रयणेनाशङ्कते * अथेति * प्रयोगविधिमात्रालोचने षण्णामपि युगपदुपादानादिति पूर्वोक्तमेव न्यायेन समुदायद्वययौगपद्यापत्तेस्तस्याश्चौत्पत्तिवाक्यविरोधेन दोषत्वात्तदनुरोधे तु प्रत्येकं कालयुक्तानामित्यादिपूर्वोक्तेनैव न्यायेन प्रत्येकं प्रधानप्रयोगो ऽङ्गानां च षट्पक्षान्तराले क्व चिदहनि प्रयोगः साङ्गस्य वैकैकस्य प्रधानस्य प्रयोगस्त्रिकयोर्वा कालभेदेन प्रयुज्यमानयोरेकस्य कस्य चित्समीपे ऽङ्गप्रयोगः पक्षान्तराले वा क्व चिदहनीत्यत्रापि योजनापत्तेः प्रयोगविधिरूपेणापि नेष्टप्रयोगसिद्धिरित्याशयेन परिहरति * तत्रापीति * ननु फलभवनकाले ऽङ्गप्रधानयोर्युगपदनुष्ठानावगतेस्त्रिकद्वयस्यौत्पत्तिककालाविरोधार्थं कालभेदेनानुष्ठाने त्रिकद्वयस्याप्यङ्गयौगपद्याङ्गावृत्तेर्न्याय्यत्वादिष्टप्रयोगसिद्धिरित्याशङ्क्याह *न चेति*फलभवनकालेनाङ्गप्रधानकालपरिच्छेदे फलस्वरूपोत्पत्त्या कालान्तरभाविन्यैककाल्यायोगात्फलापूर्वोत्पत्तिकालेन परिच्छेद्यत्वापत्तेस्तस्य च क्षणिकत्वेनाङ्गप्रधानयोरेकक्षणे ऽनुष्ठेयतापद्येताङ्गप्रधानकालेनैव तु फलापूर्वोत्पत्तिकालस्य परिच्छेद्यत्वात्तस्य चाद्यप-

४७४।२

दार्थारम्भात् प्रभृत्यासमाप्तेरेकत्वादुत्पत्तिवाक्यावगतपौर्णमास्यमावास्याकालालोचनया यावन्तं षट्पक्षपरिमितं पक्षपरिमितं वा कालं प्रधानानि व्याप्नुवन्ति तावतः फलभवनकालत्वात्तावत्कालत्वात्तावत्कालमध्ये ऽङ्गेष्वनुष्ठितेष्वङ्गप्रधानाविषययौगपद्यासिद्धेरङ्गावृत्त्यनाक्षेपान्नेष्टप्रयोगसिद्धिरित्यभिधानायाङ्गप्रधानानीत्यङ्गशब्दे प्रयुक्ते निरङ्गानां प्रधानानामुत्पत्तिवाक्ये कालविधानात्कथमङ्गानां प्रधानकालतेत्याशङ्क्य * प्रयोगेत्युक्तम् * प्रयोगविधिविहितस्य साङ्गप्रधानप्रयोगस्यापि कालान्तराश्रवणादौत्पत्तिक एव कालो ऽवसीयतइत्याशयः । प्रत्येकं प्रयोगादियोजनां विवृण्वनुपसंहरतीतीति उत्पत्तिवाक्यमात्रानुरोधे तिसृषु पौर्णमासीषु त्रयाणां तिसृष्वमावास्यासु त्रयाणां प्रधानानां प्रतिप्रधानमङ्गावृत्तिपक्षे साङ्गानामन्यथा यत्र क चनान्तराले चशब्देनाङ्गप्रयोगसूचनाच्छुद्धानामपवर्गः प्रयोगोत्पत्तिद्वयालोचने द्वयोः पौर्णमास्यमावास्ययोस्त्रिकद्वयप्रयोगो ऽङ्गप्रयोगश्चैकसमीपे पक्षान्तराले वेति योज्यम्। कालवाक्यानर्थक्यपरिहारमुपसंहरति * तस्मादिति * कालवाक्याभ्यामेव तर्हीष्टप्रयोगसिद्धेरुत्पत्तौ कालविध्यानर्थक्यमिति शङ्कते * नन्विति * पौर्णमास्यमावास्याशब्दविषयज्ञानं प्रयोजनमित्याशयेन परिहरति * कथमिति * एतदेव विवृणोति * पश्येति * श्लोकं व्याचष्टे * पौर्णमासीति * उपसंहरति * तस्मादिति * भाष्यकृतो ऽप्येतदेव प्रयोजनमभिमतमिति सूचयितुमाह * अत एवेति *

४७५।१

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥ ४ ॥

यदि चेति भाष्येण समप्राधान्यनिरासार्थत्वेनैतत्सूत्रं पूर्वेषां प्राकृतानां प्रयाजादीनां विकृतौ कृष्णलहोमादिविशेषदर्शनान्न सर्वेषां समप्रधान्यमित्येवं व्याख्यातं तच्च शब्दात् पूर्वसूत्रोक्ते ऽनुवादत्वे हेत्वन्तरसमुच्चयार्थत्वप्रतीतेरयुक्तमाशङ्क्योपपादयति * यदि चेति * पूर्वपक्षप्रयोजनसमप्राधान्यनिरासद्वारा पूर्वपक्षनिरासेनार्थात्सिद्धान्तसिद्धेश्च शब्दोपपत्तिरित्याशयः । समप्राधान्ये कथं विकृतौ प्रयाजादिदर्शनानुपपत्तिरित्याशङ्क्याह * ततश्चेति * कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वादित्यष्टमाधिकरणे फलस्य स्वर्गस्य नियमस्य यावज्जीवतायाः कर्त्तुः स्वर्गकामस्य समुदाययोराग्नेयादित्रयसाहित्यात्मकयोर्विकृत्यनन्वये कर्मणः करणभूतस्य विकृतावप्रवृत्तेर्हेतुतया वक्ष्यमाणत्वात्प्रयाजादेरपि करणत्वे सत्यप्रवृत्तिः स्यादित्याशयः । अत इत्युपसं-

द्वारभाष्यं सिद्धान्तप्रयोजनोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति *

गुणस्तु श्रुतिसंयोगात् ॥ ५ ॥

नैतदिति भाष्येण सिद्धान्तनिरासार्थतया तु शब्दो व्याख्यातस्तत्स्पष्टत्वादव्याख्याय श्रुतिसंयोगव्याख्यानार्थं तथेति भाष्यं व्याचष्टे * पौर्णमासीति * स्वयं श्रुतिसंयोगं व्याचष्टे * प्रत्यक्षेति * अस्मिन्व्याख्याने श्रुतिसंयोगशब्देन सिद्धान्ते कल्पनागौरवाभिधानात्पूर्वपक्षपक्षे तदभावमाह * सो ऽपि चेति * नानुमातव्यो भविष्यतीत्यनुषङ्गः। अनेकमित्यत्र नानुमातव्यमिति विपरिणतानुषङ्गः गुणशब्दं स्वयं तावद्विधित्वे ऽधिको गुणो ऽस्तीत्येवं व्याचष्टे * समुदायेति * नन्विति भाष्येणारूपत्वेनापूर्वयोः कर्मणोर्विध्यसम्भवं पूर्वसूत्रोक्तमनुभाष्य वाक्यान्तरेणेत्यादिना गुणो रूपं वाक्यान्तरस्थपौर्णमास्यमावास्याश्रुतिसंयोगादवगम्यतइत्येवमावृत्तश्रुतिसंयोगशब्दसहितो गुणशब्दो रूपत्वपरिहारार्थत्वेन व्याख्यातस्तद्व्याचक्षाणो ऽस्मिन्नपि पक्षे विद्वद्वाक्ययोर्दर्शपूर्णमासशब्दतात्पर्यावधारणार्थत्वाभावात्तात्पर्यावधारणं च विना लाक्षणिकशब्दप्रवृत्त्ययोगादर्शपूर्णमासशब्दयोराग्नेयवाक्यविहितकर्मद्वयनामत्ववद्विद्वद्वाक्यविहितकर्मद्वयनामत्वस्याप्रसिद्धेर्यजिविशेषकत्वायोगात् विशेषतश्चास्मिन्पक्षे ऽष्टाकपालादिवाक्यैः कालाविधानात्पौर्णमास्यां पौर्णमास्येति वाक्यद्वयविहितकालयोगेन दर्शपूर्णमासशब्दप्रवृत्त्यभ्युपगमापत्तेस्तत्र च तृतीयानिर्देशात्करणकृतयोः पौर्णमास्यमावास्ययोः कालान्वयप्रतीतेः करणत्वस्य च फलवाक्याधीनत्वात्फलवाक्यस्थाभ्यां दर्शपूर्णमासशब्दाभ्यां विद्वद्वाक्यविहितयोः कर्मणोः फलान्वयावगमे करणत्वात्कालान्वयः। कालान्वये सति फलान्वयात्करणत्वावगतिरितीतरेतराश्रयापत्तेर्दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वेन यजिविशेषकत्वायोगात्प्रकृतयागमात्रस्य फलान्वयात्समप्राधान्यापत्तेर्विकृतौ प्रयाजादिदर्शनानुपपत्तिरित्याशङ्कां निरस्यति * प्रयाजादीति * लक्षणोपान्त्ये सौर्यादौ लौकिकी पार्वणस्थालीपाकेतिकर्त्तव्यताग्रयणस्थालीपाकादौ दृष्टप्रवृत्तित्वेनातिदेष्टव्येति पूर्वपक्षिते बार्हस्पत्ये ऽर्द्धं बर्हिषो लुनातीति बर्हिषो लवनदर्शनं पितृयज्ञे च न होतारं वृणीतइति होतृवरणनिषेधदर्शनं सौर्ये च प्रयाजे प्रयाजे कृष्णलं जुहोतीति प्रयाजदर्शनं वैदिकेतिकर्त्तव्यतानतिदेशेन युज्येतेत्याशङ्क्यापि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति सूत्रेण यत्र बर्हिर्लवनं प्रत्यक्षविहितं तत्रार्द्धविधिर्होतृवरणनिषेधो नित्यानु-

वादः प्रयाजवाक्यं कृष्णलविशिष्टप्रयाजविधानार्थमिति पूर्वपक्षी परिहरिष्यति सम्भवमात्रेण त्वत्र प्रकृतिस्थप्रयाजगुणविधिपक्षाभिधानम् । यद्वावगतार्थविषयत्वाद्वीप्सायाः प्राप्ताभावे ऽनुपपत्तेरस्य वचनोदाहरणत्वं भाष्योक्तं दूषयित्वा स्वयं प्रकृतिस्थप्रयाजानुवादत्वस्य लक्ष्यमाणत्वात्स्वाभिप्रायेणैतदुक्तम् । आद्यात्पूर्वपक्षात् भेदाभिधानायैतावेवेत्येवकारः । नन्वष्टाकपालादिवाक्येषु पौर्णमास्यमावास्याशब्दयोः कालवाचित्वेन विद्वद्वाक्यविहितकर्मानुवादिशब्दाभावान्न तैरत्र गुणविधिः सम्भवतीत्याशङ्कानिरासार्थं यदिति भाष्यं व्याचष्टे * अष्टाकपालादीति *

४७६।२ **चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ ६ ॥**

चोदनाशब्दव्याख्यानार्थं कर्मचोदनाशब्दं गुणविधित्वनिरासार्थतया व्याचष्टे * नैत इति * सूत्रशेषव्याख्यानार्थं कुत इति भाष्यं तात्पर्यतो व्याचष्टे * कुत इति* अप्राप्ते कर्मणि दृष्टस्यानेकगुणविधिप्रकारस्य प्राप्ते कर्मण्यसम्भवाभिधानायोत्तरार्द्धं तावद्व्याख्यातुं पीठिकां करोति * कर्मोत्पत्तीति * फलाद्यनुपादेयपरे वाक्ये कर्मविधावप्यनेकगुणविध्यसम्भवसूचनायोत्पत्तिशब्दः । ननु कारकैर्विना भावनाविध्यपर्यवसाने ऽग्निहोत्रादिवाक्ये कारकाश्रवणान्न विधिः स्यादित्याशङ्क्याह * तत्रेति * आत्मनो निष्पादकत्वेनांशभूततयावगतानिं यानि कारकसामान्यानि तदन्यथानुपपत्त्या कारकविशेषाक्षेपात्स्ववाक्ये कारकाश्रवणे ऽपि विधिपर्यवसानं सम्भवतीत्याशयः । अर्थापत्त्या कारकविशेषाक्षेपे तद्वाचिपदानर्थक्यमाशङ्क्य * कारकविभक्त्यन्तेत्युक्तम् * तत् ईदृशं ह्येकं वाक्यं श्रुतानुमितैकदेशे निष्पन्नमग्नीषोमीयेण पशुना यजेतेति पशुसोमाधिकरणवार्त्तिकवक्ष्यमाणन्यायेनाग्नेयेनाष्टाकपालेन यजेतेत्यादिप्रकारवचनव्यक्त्याश्रयणात्सर्वत्र कारकविभक्त्यन्तताभिप्रेता यः कश्चिद्विशेषो ऽतीत्यनिर्द्धारितविशेषाक्षेपे ऽपि विशेषनिर्द्धारणार्थानि पदान्तराणीत्याशयः । वाक्यादेवेत्यनेन स्ववाक्योच्चारणस्योत्पत्तिशिष्टबलीयस्त्वं प्रयोजनं सूचितम् । विशेष्यते भावनेत्यन्वयः । नन्वेवं सत्यमूर्त्तत्वेन जात्यादेः कारकत्वायोगाद्भावनान्वयो न स्यादित्याशङ्क्याह * प्रतिपदं चेति * द्रव्याश्रितत्वेनामूर्त्तस्यापि द्रव्यद्वारा कारकत्वोपपत्तिरुक्ता । ननु पशुत्वादिजातेरादिशब्दोक्तस्य चारुणा-

दिगुणस्याभिक्रमणादिक्रियायाश्च श्रुतिलक्षणद्वारैकशब्दोपादानल-
क्षणया श्रुत्या लिङ्गसंख्ययोश्चैकपदोपादानलक्षणया श्रुत्या द्रव्या-
न्वयात्तादर्थ्यप्रतीतेः कथं भावनार्थतेत्याशङ्क्य * एकेत्युक्तम् *
जात्यादेर्द्रव्येण सह विशेषणविशेष्यभावे ऽपि जातिगुणयोः प्राति-
पदिकार्थत्वात्प्रातिपदिकार्थकारकत्ववाचिन्या विभक्त्या संख्याया-
श्च प्रत्ययार्थत्वेनैकाभिधानलक्षणया श्रुत्या लिङ्गस्यापि टाबादिप्र-
त्ययार्थत्वात्प्रातिपदिकार्थत्वाद्वा यथासम्भवं कारकत्ववाचिन्या
श्रुत्या कारकत्वेन भावनार्थत्वप्रतीतेरभिक्रमणादेश्च धातुसम्बन्धा-
धिकारविहितणमुल्श्रुत्या धात्वर्थान्तरान्वयाभिधानात्तत्र वीप्सो-
क्ता। वृत्त्यन्यथानुपपत्त्यवगतसन्निपत्योपकारित्वेन कारकत्वावगत्या
भावनार्थत्वप्रतीतेर्न द्रव्यशेषतास्तीत्याशयः। यथा द्रव्यस्य कारक-
त्वेन भावनार्थत्वान्न जात्यादिशेषता तथा जात्यादेरपि न द्रव्यशेष-
तेति परस्परशब्देनोक्तम्। नन्वेवमपि सन्निकृष्टपदान्वयमात्रेण भाव-
नावैशिष्ट्यसिद्धेर्विप्रकृष्टपदानर्थक्यमित्याशङ्क्याह * एवमिति * का-
रकात्मना भावनार्थतैवैवंशब्देनोक्तां व्याचष्टे * स चेति * ननु
विशिष्टविधौ विशेषणानामपि विधेयत्वात्कथं नानेकशक्तिकल्पना-
पत्तिरित्याशङ्क्याह * तथा हीति * श्लोकं व्याचष्टे * विशिष्टाया- ४७७।१
मिति * ननु विशिष्टविधेः स्वार्थान्यथानुपपत्त्या विशेषणविधिकल्पकत्वे
विशेषणे विहिते विशिष्टविधिर्विशिष्टे च विहिते विशेषणविधिरि-
तीतरेतराश्रयः स्यादित्याशङ्क्याह * विशेषणेति * पश्चात्कल्पस्यापि
विशेषणविधेः प्राक्प्रवृत्तत्वेनैव कल्प्यत्वान्नेतरेतराश्रयापत्तिरित्याश
यः। श्लोकं व्याचष्टे * विशिष्टेति * एकस्यानेकशक्तिकल्पनापत्ति-
परिहारमुपसंहरति * तेनेति * विशेषणविशेष्यविधेरन्योन्यनैरपे-
क्ष्यापर्यवसानाद्युगपद्व्यापारो गम्यते विशेष्यानुवादेन विशेषण-
विधिना क्रमेण अप्राप्ते त्वित्युत्तरार्द्धं व्याख्यातमुपसंहरति *
इतीति * प्राप्ते कर्मणीति * पूर्वार्द्धं व्याख्यातुमुपक्रमते * नेति *
एतदेव प्रश्नपूर्वं दृष्टान्तेनोपपादयति * कथमिति * श्लोकं व्या-
ख्यास्यन् दार्ष्टान्तिके ऽङ्गाकर्षणन्यायं योजयति * यदा हीति *
प्रतिघातस्य नित्यमपादानापेक्षत्वात्तस्या इति पञ्चम्यन्तसापेक्षत्वे ऽपि
समासाविघातः प्रधाननयनन्यायस्तत्र नास्तीत्याह * विशिष्टेति *
ननु प्राप्ते कर्मण्यनेकगुणविधानाशक्तावजया क्रीणातीत्यादिष्वनेक-
जात्यादिविधिः प्राप्ते सोमक्रयादौ न स्यादित्याशङ्क्याह * त-
त्रेति * यथानेककारकविशिष्टभावनाविधिना विशेषणभूताने- ४७८।१
ककारकविध्याक्षेपस्तथानेकजात्यादिविशिष्टकारकविधिना विशे-

षणाभूतानेकजात्यादिविध्याक्षेप इत्यर्थः । नन्वेवं सत्यनेक-स्यापि द्रव्यदेवतारूपस्य कारकस्यैवाग्नेयपदोपादानात्पदान्तरो-पात्तस्यापि चाष्टाकपालस्य द्रव्यरूपैककारकत्वात्प्राप्ते कर्म-णि विध्युपपत्तिरित्याशङ्क्याह * यदा त्विति * एक-पदोपात्तस्याप्यनेकस्य कारकस्य परस्परान्वयाभावेनैकविशिष्टे-तरविध्ययोगान्नैकयत्नेन विधिः सम्भवतीत्याशयः । एकस्यापि तु कारकस्यानेकपदोपात्तस्यैकयत्नेन विध्यसम्भवे ऽनेकपदसम्बद्धमि-त्यात्राघाराग्निहोत्राधिकरणवार्त्तिके साधयिष्यते । दार्ष्टान्तिके ऽङ्कर्षणन्यायं योजितमुपसंहरति * एवं चेति * अत्रैव सूत्राव-यवं योजयति * तदिति * भाष्यकृता सूत्रानुक्तविशेषणोक्तौ प्र-योजनमाह * परस्परेति * दृष्टान्ते श्लोकं व्याचष्टे * लोके ऽपि चेति * अमात्येन गन्तव्यमिति सकृदुच्चारणव्यापारे सेनान्यादिग-मनहेतुप्रयत्नान्तरोपादानाशक्तेरुच्चारणावृत्तिः स्यादिति दृष्टान्तप-र्यवसानं श्रुतिशब्दः श्रुतिहेतूच्चारणलक्षणार्थः । यदि तावदित्यादेः स एवाग्निरष्टाकपालस्य नान्यस्येत्यन्तस्य प्राप्ते कर्मण्यनेकगुणवि-धावुच्चारणावृत्तेर्लक्षणवाक्यभेदाभिधानपरत्वं तावदाह * एत-मिति * एतदेवावयवशो व्याचिख्यासुर्यदि तावदित्यादिभाष्यं व्याचष्टे * यदीति * कर्मान्वयितया ऽष्टाकपालविधौ अष्टाकपा-लस्वरूपकर्त्तव्यत्वस्यापि क्लेशलभ्यत्वादाग्नेयान्वयरूपार्थान्तरवि-धानं दूरोत्सादितमित्यर्थः । अर्थान्तरविध्यशक्तौ तदानीमिति भा-ष्यावयवं योजयति * तदाहेति * अथाग्नेयइति भाष्यं न तदा-ग्नेयः सत्तया सम्बध्यतइत्यर्थो लभ्यतइत्यनुपपत्तिमाशङ्क्याह

४७९।१ * अथेति * अथ पौर्णमास्यामित्यथ तस्यामिति च भाष्यद्वयमे-कहेलया व्याचष्टे * एवमिति * केन अष्टाकपालो विहित इत्य-नूद्यमानाष्टाकपालोत्पत्तिर्निरस्ता केन तस्याविहितइति चावृत्त्या तस्य पौर्णमास्यन्वयो निरस्तः । विधीयमानाग्नेयोत्पत्तिनिरासस्तु प्राग्वत्सिद्ध इतरत्राप्यनूद्यमानाग्नेयोत्पत्तिपौर्णमास्यन्वयविधीय-मानाष्टाकपालोत्पत्तिनिरासः । स एवोत्पत्तिदेशे ऽनेनोक्तः । एवं सत्यपि क्लेशेन तद्विधीनभ्युपगम्याग्नेयस्याष्टाकपालस्य वाष्टाक-पालेनाग्नेयेन वान्वयविधावतिगौरवं स्यादित्यर्थः । अथ पौर्ण-मासीति भाष्यं व्याचष्टे * पौर्णमासीपदेति * द्रव्यदेवतोभयस्व-रूपकर्त्तव्यता पूर्वोक्तात्रापि योजिता । ननु पौर्णमास्याख्यक्रियान्वय-द्वारः परस्परान्वयो भविष्यतीत्याशङ्क्याह * न चेति * द्रव्यदे-वताविशिष्टपौर्णमासीविधौ सत्युभयविशेषणवशीकारं विनोभय-

विशिष्टत्वायोगादेकक्रियावशीकारात्परस्परनियमः सिद्ध्येत्तस्य त्व-निष्टत्वेन दुष्टत्वाद्या पौर्णमासीत्यनूद्य तस्यामाग्नेय इत्युक्ते ऽष्टाक-पालानुरागाप्रतीतेस्तस्यामष्टाकपाल इत्युक्ते चाग्नेयानुरागाप्रतीतेर्न क्रियाद्वारा द्रव्यदेवतयोः परस्परान्वयः सम्भवतीत्यर्थः। अथ द्रव्य-देवते इति भाष्यव्याख्यानपूर्वमथ केन चिदित्याशङ्काभाष्यमवतार-यति * एतदिति * परस्परासम्बन्धपरिहारार्थं प्रागेव द्रव्यदे-वतायाः परस्परसम्बन्धं कुर्वन्नन्यतः सिद्धं द्रव्यस्य देवतासबन्ध-मनूद्येत्युक्तम्। ननु द्रव्यदेवतान्वयविधिपूर्वककर्मान्वयविध्यभ्युपगमे ऽपि द्रव्यदेवतान्वयसिद्धेरनुवादाभिधानं किमर्थमित्याशङ्क्यान्यतर-सम्बन्धितया ऽन्यतरविधिर्द्वयोर्वा युगपदिति विकल्पद्रव्यसम्ब-न्धितया देवताविधौ देवतासम्बन्धितया द्रव्यविधौ उभयोर्द्रव्यदे-वतयोः स्वरूपविधिः सम्बन्धविधिश्चेति क्लेशे युगपत्वितरेतरनैरपे-क्ष्येणोभयविधौ परस्परसम्बन्धक्लेशमनुभूय पौर्णमासीसम्बन्धक्ले-शो यस्तत्परिहारार्थमित्युक्तमिति तच्छब्दाक्षिप्तयच्छब्दाध्याहारेणैक-ग्रन्थतया योज्यम्। अवतारितभाष्यस्य परव्याख्यामुपन्यासपूर्वकं दू-षयति * तत्रेति * परस्वहरणमेव तावन्निषिद्धत्वादयुक्तं विशेषतो हविषः सुतरामनपवृक्तकर्मण इत्यर्थः । केन चिदाग्नेयमष्टाकपालं निर्वपेद्रुक्काम इत्यादिवाक्येन विधानात्सङ्कल्पविषयीकारित इत्येवं स्वमतेन व्याचष्टे * तस्मादिति * रुक्कामेष्ट्यां विहितस्य पुरोडा-शस्य तत्र त्यक्तस्यान्यत्रात्याज्यत्वेन साधारण्यायोगादाच्छिद्य वि-धौ च रुक्कामेष्ट्यसिद्ध्यापत्तेः पौर्णमास्यां विध्ययोगे ऽपि पुरोडाशा-न्तरस्य चाग्निनोपलक्षणायोगे ऽपि यो ऽष्टाकपालो ऽन्य-त्राग्नेयतया विहितः स पौर्णमास्यां भवतीत्यष्टाकपालत्वसाम्या-त्पुरोडाशान्तरस्याप्युपलक्षितस्य पौर्णमास्यां विधिरित्याशयः । तथापीति परिहारभाष्यमाग्नेयपदान्वयेनैवाग्निदेवत्यत्वसिद्धेरयुक्त-माशङ्क्योपपादयति * तत्राहेति * अष्टाकपालस्य पौर्णमासीस-म्बन्धविध्यर्थमुपलक्षणायाग्नेय इति शब्दो वाचको ऽस्येति व्युत्पत्त्या-ग्नेयशब्दोक्तस्याग्नेयत्वस्यानूद्यमानात्वात्पौर्णमासीगतस्याष्टाकपा-लस्य नाग्निदेवत्यत्वसिद्धिरित्यर्थः । सिद्ध्यर्थमिति पाठेतूपलक्षणभू-ताग्निसम्बन्धसिद्ध्यर्थमिति व्याख्येयम् । अथेति भाष्येणोपलक्षणार्थ-त्ववद्विधानार्थतामप्याग्नेयशब्दस्याशङ्क्य स वक्तव्य इत्यनेन वैश्व-देवशब्दवत्त्वात्सकृदुच्चरितस्याग्नेयादिशब्दस्य विध्यनुवादत्वासम्भ-वेन परिहृतं तद्व्याचष्टे * युगपदिति * कल्पयिष्याम इति भा-ष्येणाष्टाकपालस्य पौर्णमासीयागान्वये विहिते देवतां विना द्रव्य-

स्य यागान्वयायोगाद्देवताकाङ्क्षायामुपलक्षणत्वेन बुद्धिस्थस्याग्नेर्देवतात्वकल्पनमाशङ्क्य नासतीत्यनेन यस्य वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते सा देवता भवतीति विधिशब्दाधिकरणवक्ष्यमाणलक्षणेन त्यज्यमानद्रव्यसम्बन्धापेक्षप्रवृत्तित्वात्मकसम्बन्धिशब्दत्वाद्देवताशब्दस्य गुर्वादिशब्दस्याध्यापनादिक्रियाजन्याध्याप्याद्यवच्छिन्नाध्यापयित्रादिगतातिशयवाचित्वावगतिवत्त्यागोद्देशक्रियाजन्यद्रव्यावच्छिन्नाग्न्यादिगतातिशयवाचित्वावगतेर्विधानं च विनाग्न्यादेर्द्रव्यत्यागोद्देश्यत्वप्रमाणाभावेनोद्देशक्रियाजन्यातिशयभाक्त्वायोगान्नाग्न्युद्देशेन द्रव्यत्यागविधिं विनाग्नेर्देवतात्वासिद्धिरित्युक्तम् ।

तदर्थो यादृशो यत्र देवतात्वेन चोदितः ।
मनागपि ततो ऽन्यत्वे देवतेति न गम्यते ॥

इतिस्तुतशस्त्राधिकरणवार्त्तिके व्याख्यातमितीतिकरणेन सूचितम् । एवं तर्हि यो ऽष्टाकपालतयान्यत्राग्नेयो विहितः स पौर्णमास्यां भवतीत्यन्यतः सिद्धं देवताया द्रव्यान्वयमनूद्य कर्मान्वयमात्रविधानाद्वाक्यभेदो भविष्यतीत्याशङ्क्य कर्मविधिं विना न कथंचिद्वाक्यभेदपरिहारः सम्भवतीति दर्शयितुमाह * अनेनैवेति *

नियोगेन विकल्पेन द्वे वा सह समुच्चिते ।
सम्बन्धः समुदायो वा विशिष्टावेकयेतरे ॥

इत्यनेन न्यायेन बहुप्रकारावचनव्यक्तीराशङ्क्य देवतानुपलक्षितद्रव्यमात्रविधौ द्रव्यानुपलक्षितदेवतामात्रविधौ वान्यतरपदानर्थक्यापत्तेर्यथा देवतोपलक्षितद्रव्यस्यैव विद्धद्वाक्यविहितकर्मान्वयविधौ विधिं विना देवतानवगतेरुपलक्षणार्थत्वेनोपचिरितस्याग्नेयशब्दस्याविधित्वकल्पने सकृदुच्चरितविध्यनुवादत्वायोगेनोच्चारणावृत्तिलक्षणो वाक्यभेदस्तथा द्रव्योपलक्षिताया देवताया एव विधौ द्रव्यस्यापि विधिं विना कर्मान्वयासिद्धेरुपलक्षणार्थस्याष्टाकपालशब्दस्य विधित्वकल्पने ऽपि द्रव्यं वा देवता वा विधीयतइत्यस्मिन्पक्षे विकल्पेनान्यतरस्योपलक्षणार्थस्य विधित्वकल्पनवाक्यभेदः । द्रव्यं देवता चेति समुच्चयपक्षे स्पष्टो वाक्यभेदः द्रव्यदेवतासम्बन्धसमुदाययोर्विधौ सम्बन्धो हि विधीयमानः सम्बन्धिनं तावदाक्षिपेद्धात्वर्थे पुनः स विधातव्य एवं सम्बन्धी अन्यथासम्बन्धस्यैवं सम्बन्धी शेषः स्यान्न क्रियाया इत्याद्याराग्निहोत्राधिकरणवक्ष्यमाणन्यायेन द्रव्यदेवतयोरपि विध्यापत्तेर्वाक्यभेदः अन्यतरविशिष्टान्यतरविधावपि द्रव्यदेवतयोर्भिन्नकार-

कत्वात्कारकयोश्चान्योन्यविशेषणविशेष्यभावाभावेनैककारकविशि-
ष्टकारकान्तरविध्ययोगादेकस्वरूपविशिष्टान्तरस्वरूपविध्यभ्युपगमे
चान्योन्यविशेषणत्वप्रसङ्गाद्धात्वर्थे पुनः स विधातव्य सम्बन्धी-
त्यनेन न्यायेन क्रियाङ्गत्वासिद्ध्यर्थं विशेषणस्यापि विध्यापत्तेर्वाक्य-
भेदः प्रपञ्चयितव्य इत्यर्थः।एते पक्षाः पुनर्योज्या व्यतिकीर्णाः परस्पर-
मिति न्यायेन वचनव्यक्त्यानन्त्याद्वाक्यभेदानन्त्याभिधानं पौर्णमासी-
ग्रहणस्योपलक्षणार्थत्वेनामवास्याया अनुवादेनापि द्रव्यदेवताविधा-
नस्य निरस्तत्वात्किं तह्याग्नेयादिवाक्ये विधीयतइत्याशङ्कायां तस्मादि-
त्यन्तभाष्यं व्याचष्टे * तेनेति * विद्वद्वाक्यविहितएव कर्मणि द्र-
व्यदेवतासम्बन्धो विधीयतामित्याशङ्कानिरासार्थं स एष इति भाष्यं
व्याचष्टे * न चेति * यजतिस्तु द्रव्यफलभोक्तृसंयोगादिनेव न्या-
येन योगं विना द्रव्यदेवतान्वयायोगाद्यागापेक्षायां वाक्यान्तरप्राप्ते
यागे द्रव्यदेवतान्वयविधौ सम्बन्धो विधीयमान इत्याद्याराग्निहो-
त्राधिकरणवार्त्तिकोक्तन्यायेन द्रव्यदेवतयोरपि विध्यापत्तेर्वाक्य-
भेदप्रसङ्गादस्मिन्नेव वाक्ये द्रव्यदेवताविशिष्टयागविधानात्स एव
यागो भवतीत्यपरोक्षवाचिनैषशब्देन वाक्यान्तरविहितात्परोक्षा-
द्यागाद्भेदः सूचित इत्याशयः।एवं तर्ह्याग्नेयादिवाक्यविहितं यागा-
न्तरमेव विद्वद्वाक्याविहितयोर्यागयोः पौर्णमास्यमावास्याशब्दोक्त-
योरङ्गत्वेन विधीयमानं रूपं भविष्यतीत्याशङ्कानिरासार्थं तेनेत्या-
दिभाष्यं व्याचष्टे * कर्मान्तरत्वे चेति*आग्नेयादिवाक्यस्थयोः पौ- ४८०।१
र्णमास्यमावास्याशब्दयोः श्रुत्या कालार्थत्वप्रतीतेर्लक्षणाहेत्वभा-
वाच्चायुक्तमप्याग्नेयादिवाक्यविहितानां यागानां विद्वद्वाक्यविहि-
तयागाङ्गत्वं प्रौढ्याभ्युपेत्य यागस्य यागान्तरव्यवच्छिन्नरूपयागप्र-
त्यायकत्वायोगात् रूपत्वाभावो भाष्यकृतोक्त इत्यवयवव्याख्यया
सूचितं श्रुत इति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * इतीति *
पूर्वपक्षसूत्रस्थश्रुतिसंयोगशब्दव्याख्यानार्थं तथा न लक्षणाशब्दो
भविष्यतीति भाष्येणार्थादुक्तं विद्वद्वाक्यस्थयोः । पौर्णमास्यमावा-
स्याशब्दयोराग्नेयादियागसमुदायपरत्वे लाक्षणिकं दोषं यत्त्विति-
भाष्येणानुभाष्य तत्परिहारार्थं नैष इति भाष्यं व्याचष्टे * अष्टश्चे-
ति * एकवचनान्वयाय समुदायलक्षणा श्रुत्यर्थान्वयायोगादग-
त्याश्रयणीयेत्यर्थः । कालवाचिभ्यां पौर्णमास्यमावास्याशब्दाभ्यां
यागलक्षणा त्वत्पक्षे ऽपि तुल्येति सूचनायादिशब्दः। यत्तु स्वयं श्रु-
तिशब्दव्याख्यार्थं प्रत्यक्षश्रुतश्च यजिनं द्रव्यदेवतासम्बन्धाक्लेशेना-
नुमातव्यो भविष्यतीत्युक्तम् तत्परिहरति*किं चेति*भावनैकविषय-

त्वाद्विधेर्द्रव्यदेवतान्वयं विदधताग्नेयादिवाक्ये तत्तदवच्छिन्नाया भावनाया एव विधेयत्वादव्यापारस्य च व्यापारान्वयं विना भावनावच्छेदकत्वायोगादपुंव्यापारत्वेन च भवत्युक्तस्य व्यापारस्य पुम्प्रयत्नापरपर्यायभावनावच्छेदकत्वायोगाद्भवत्युक्तक्रियातो ऽन्यक्रियायोगाभावे वाक्यासमाप्तेरसमाप्तस्य चार्थाभावेनार्थद्वारवाक्यान्तरान्वयायोगान्न वाक्यान्तरे प्रत्यक्षश्रुतो ऽपि च यजिराग्नेयादिवाक्ये ऽन्वीयतइत्यर्थः। श्लोकं व्याचष्टे*अष्टाकपाल इति*यत्तु स्वयं पूर्वपक्षसूत्रस्थगुणशब्दव्याख्यानार्थं समुदायानुवादत्वान्न विधित्वं गुणवत्तरमित्युक्तं तत्परिहर्त्तुमाह * अनुमिते चेति * प्रकृतप्रत्यभिज्ञानाद्यच्छब्दोपबन्धेन वानुवादसरूपत्वादनुवादतैवेह गुणवत्तरेत्याशयः। ननु सत्यपि यच्छब्दोपबन्धे यदाग्नेयो ऽष्टाकपाल इत्यादिवद्विधिशक्त्याशङ्क्याह * क्रियेति * न वलोप इत्यत्र यच्छब्दस्य विधिशक्तिप्रतिबन्धकनिरासात्कथं विद्वद्वाक्ययोरनुवादसरूपता यादृशी क्रिया तां कुर्यादिति क्रियारूपानुवादे ऽपि कर्त्तव्यत्वाननुवादत्वेन क्रियासमानाधिकरणस्य यच्छब्दस्य विधिशक्त्यप्रतिबन्धकत्वे ऽपि कर्तृसमानाधिकरणं कर्त्तव्यत्वानुवादित्वाद्विधिशक्तिं प्रतिबध्नातीत्याशयः। वृद्धवाक्येनैतदेव द्रढयति * तथा चेति * रुजेर्नाशापरपर्यायभङ्गवाचित्वान्न नाशयेदित्यर्थः।

व्यपदेशश्च तद्वत् ॥ ७ ॥

भाष्यकारीयव्यपदेशशब्दस्य पौर्वापर्यविषयतया व्याख्यानं द्वितीयपूर्वपक्षनिरासार्थं सम्भवविषयत्वोपलक्षणार्थं चेत्याह *एकेष्टिरिति * यद्येको यागो ऽमावास्यायामिति विग्रहेण द्वितीयपूर्वपक्षनिरासार्थतोक्ता संहत्य युगपद्भावो धारणं निष्पादनं पौर्वापर्यं चेति द्वन्द्वैकवद्भावः। यागैक्ये ऽपि हविर्भेदादुभयोपपत्तिमाशङ्क्य * सान्नाय्येत्युक्तम्* यागैक्ये सत्याग्नेयस्यैन्द्रस्य सान्नाय्यस्य दध्नः पयसो वा विकल्पः स्यादित्यर्थः। व्यतिरेकमुखेन श्लोकं व्याचष्टे *कर्मेति* आद्यपूर्वपक्षे पौर्वापर्यविवक्षायां देवतान्वयाविवक्षयेन्द्रत्वविशेषणाविवक्षां मत्वा व्याख्याविभवार्थं स्वयमुत्तरइति द्विवचनविषयत्वेन व्यपदेशशब्दं व्याचष्टे*प्रथमेति*पूर्वपक्षद्वये ऽपि सर्वेषां समप्राधान्येनाग्नेयादेः प्राधान्यलक्षणसाधकतमत्वरूपतैक्ष्ण्यशब्दवाच्योग्रत्वाभावादुग्रत्वविपर्ययतयापि व्यपदेशव्याख्यानं च शब्दात्सूचितम्।

४८१।२ लिङ्गदर्शनाच्च ॥ ८ ॥

पूर्वपक्षद्वये ऽपि श्रुत्यर्थाभ्यां लिङ्गानुपपत्तिमाह * कर्मान्तरेति * पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृत्त्रयो ऽनुयाजा इत्याहवनीये यजिचोदिताङ्गाहुतीनामेकादशसंख्यत्वाद्विद्वाक्ययोः कर्मान्तरविधित्वपक्षे पौर्णमास्यां प्रधानाहुतिचतुष्टवात्पञ्चदशसंख्यापत्तेरमावास्यायां या च प्रधानाहुतित्रित्वाच्चतुर्दशसंख्यापत्तेराधिक्यात्तयोरेव कर्मविधित्वपक्षे प्रधानाहुत्यैक्येनोभयत्र द्वादशसंख्यापत्तेर्न्यूनत्वाच्छ्रुतसंख्यानुपपत्तिरित्यर्थः कर्मैक्यपक्षे न्यायेनाग्नेयादिवाक्यविहितानां प्रधानाहुतीनां विकल्पापत्तावपि दशभिः क्रीणातीतिवच्चतुर्दशत्रयोदशवचनपर्यालोचनया समुच्चयावगमाद्याज्यानुवाक्याक्रमाच्चाहुतिपौर्वापर्योपपत्तेर्लिङ्गव्यपदेशोपपत्तिमाशङ्क्य सिद्धान्तपक्षेणानुवादतयाप्युपपन्नस्य चतुर्दशत्रयोदशवचनस्य विधित्वकल्पनायोगाद्विधित्वे च प्राधान्याहुतीनामेवैतत्संख्यत्वापत्तेरभ्यासलक्षणापत्तेश्च नैतत्समर्थनं युक्तमिति अनुवादशब्देन सूचितम्। ननु सिद्धान्ते ऽप्यसोमयाजिनः पौर्णमास्याम् अग्नीषोमीयाभावादमावास्यायां च सान्नाय्याभावाल्लिङ्गानुपपत्तिरित्याशयेन पृष्ठोत्तरमाह * कुत इति * सोमयाजिविषयत्वात्पौर्णमास्याममावास्यायां तु सोमयाजिनः सान्नाय्यद्वयस्य सम्प्रतिपन्नदेवतात्वेनैकाहुतित्वादसोमयाजिनो ऽप्यैन्द्राग्नस्य पुरोडाशस्य सान्नाय्यद्वयस्थाने विधानेनैककर्म्यादेवैकाहुतित्वावगतेः सदा प्रधानाहुतिद्वित्वाल्लिङ्गोपपत्तिरित्याशयः । अधिकरणार्थमुपसंहरति * तस्मादिति * सुखग्रहणार्थं वृद्धानामधिकरणार्थसंग्रहश्लोकं पठति * आहेति *

उपांशुयाजापूर्वताधिकरणम् ॥ ४ ॥

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

ननु सापवादाभ्यासचिन्तायाः समाप्तत्वात्संख्यादिनिमित्ते कर्मभेदे चिन्त्ये मध्ये चिन्तान्तराण्यसङ्गतानीत्याशङ्क्य साधारणीं सङ्गतिमाह * इदानीमिति * उपांशुयाजाघाराग्निहोत्रपशुसोमवाक्यानां वाक्यान्तरविहितसमुदायानुवादत्वे सत्युपांशुयाजादिकर्मभेदो विधित्वे त्वभेद इति भेदाभेदफलत्वाल्लक्षणसङ्गतिः सूचिता अधिकरणत्रयमध्ये ऽप्यस्य प्राथम्यसिद्ध्यै वैशेषिकसङ्गतिसूचनपूर्वकं सूत्रं व्याचक्षाणः पूर्वपक्षमाह * तत्रेति * विष्णवादिवाक्यैर्यागविधावुपांशुयाजत्रयापत्त्या पौर्णमास्यां षोडशाहुत्यापत्तेर्लिङ्गदर्शनाक्षेपेण पूर्वपक्षोत्थानादुपांशुयाजचिन्ताया

वैशेषिकयनन्तरसङ्गतिस्तावच्छब्देन सूचिता विष्णवादिवाक्येषु वि-
धेयत्वयोग्यस्वप्रधानभूतयागाश्रुतेः प्रकृतयागाभावात्पौर्णमासीवद्धा-
वायोगं कुत इति भाष्येणाशङ्क्य नामसम्बन्धादित्यादिना तद्ध-
द्धावोपपादनं कृतं तत्रोपांशुयाजशब्दस्य नामधेयतायाः स्वानभिमत-
त्वात्संज्ञावच्छेदनिमित्तमुपेक्ष्यारूपत्वप्रकृतयागसद्भावनिमित्तं तद्ध-
द्भावं व्याचष्टे *कुत इति* श्लोकं व्याचष्टे *एतेषु तावदिति* त-
व्यस्य विधिवाचित्वादुपसर्जनत्वेनापि निर्दिष्टस्य यागस्यार्थाक्षि
प्कृष्य विधेयत्वोपपत्तिसूचनार्थं तव्येत्युक्तम्।यजतीत्यस्य वर्त्तमाना-
पदेशत्वान्नैकान्तिकविधितेति तावच्छब्देन सूचितम्। विष्णवादिवा-
क्यानां विधित्वाभावे ऽप्यन्तरालवाक्ये रूपाज्ञानसाम्यात्ततो न
केवलं रूपाज्ञानं किं त्वदृष्टान्तरकल्पनं च प्राप्तमिति योज्यम्। तै-
त्तरीयकशाखायामुपांशुयाजमन्तरा यजत्यजामित्वायेत्यन्तरालवा-
क्ये ऽप्यजामिकरणार्थवाददर्शनाद्भाष्यकृतोपेक्षितमपि हेत्वन्तर-
मुदाहृते वाक्ये तादृगर्थवाददर्शनात्स्वयमाह *किं चेति*विष्णवा-
दिवाक्येषु प्रत्येकमजामिकरणावगतेस्तदेकविषयत्वेन जामिदोषो-
क्तेरपि विष्णवादिवाक्यविषयस्तुत्यर्थत्वावगमात्तस्याश्चोपक्रमस्थ-
त्वात्तदनुरोधेनोपसंहारस्थास्यापांशुत्वविशिष्टयागविधेरपि विष्णवा-
दिवाक्यप्रतिपाद्यतावसीयत इत्याशयः । जामिदोषोपक्रमसमुपन्यस-
नमित्यर्थः। सहार्थतृतीययोक्तः श्लोकं व्याचष्टे * यथोपक्रममि-
ति * जाम्युपन्यासाजामित्वयोरेकविषयत्वेनाजामित्वस्य विष्णवा-
दिवाक्योक्तयागविषयत्वाज्जामित्वस्याप्युपक्रमस्थस्य सन्दिग्धेषु
वाक्यशेषादित्यनेन न्यायेन तद्विषयत्वावगतेरुपसंहारस्थस्य विधे-
रुपक्रमानुसारित्वस्य न्याय्यत्वादिति विष्णवादियुक्ता एव विधय
इत्यर्थः । जामिदोषेण सहोपन्यसनमिति योजनसूचनायोपन्यासश-
ब्दः । समुदायानुवादव्यवहितस्यापि जामित्वस्यानुवादेन स्तुतेरन-
पेक्षितत्वेनासम्बन्धाद् ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमर्थानामानर्थक्यमकारणम् ॥

इत्यनेन न्यायेनापेक्षावशाद्विधिवाक्यान्वयो ऽनेकैरपि चैकस्य
तन्त्रेणान्वयो न विरुद्ध इत्याशयः । यागत्रयस्योपांशुत्वाद्येकधर्मयो-
गात्समुदायाकरणे शक्ये ऽप्यनुवादानर्थक्यमाशङ्क्याह * समुदा-
४८२।१ येति * अन्यथा कालवाक्ये ऽग्नीषोमकीर्त्तनात्तद्दैवत्यस्योपांशुयाजस्य
कालान्वये सति विद्वद्वाक्यस्थेन पौर्णमासीशब्देनानुवादात्फलवा-
क्यस्थेन पूर्णमासशब्देन फलान्वयात्प्राधान्यावगतेर्वैष्णवप्राजापत्य-

योरङ्गत्वं स्यादित्याशयः ।नन्वित्याशङ्काभाष्यमाक्षिपति * नन्विति* समाधत्ते * नैष इति * नैवं जातीयक इति परिहारभाष्यमवतारयन् व्याचष्टे* अत इति * नाम्नो ऽप्युपांशुत्वगुणकयागत्वानिमित्तत्वादकृतकत्वस्य तदवाचकत्वापत्तेः पक्षद्वयसाम्येनादोषत्वशङ्कानिरासार्थमव्युत्पन्नास्त्विति भाष्यं व्याचष्टे * व्युत्पन्नेति * नन्वित्याशङ्काभाष्याशयं व्याचष्टे * नन्विति * माभूदिति परिहारभाष्याशयमवतारणापूर्वं व्याचष्टे * तदिति *

चोदना वा प्रकृतत्वात् ॥ १० ॥

सूत्रं व्याचष्टे * कर्मेति * विष्णवादिसंयुक्तानां भिन्नवाक्यत्वाभावे ऽप्यवान्तरपदसङ्घविषयो वाक्यशब्दः विष्णवादिवाक्यानामविधायकत्वं न हीत्यादि भिद्येत वाक्यमित्यन्तभाष्योक्तया युक्त्योपपादयति * यथेति * तथात्रापि न पृथग्विधित्वप्रतिपत्तिरित्यध्याहारेण नानेकादृष्टकल्पनानुबन्धिविध्यभ्युपगमो युक्त इति व्यवहितान्वयेन वा पूरणीयम्।ननु वैश्वानरं द्वादशकपालं निर्वपेदित्युपक्रान्ताया वैश्वानरेष्टेर्यस्मिन्जातएतामिष्टिं निर्वपतीत्युपसंहारेणैकवाक्यत्वावगमाद् दृष्टत्वादियुक्तानां शब्दानां पृथग्विधित्वायोगो ऽप्यत्र जामित्वोपक्रमादजामित्वोपसंहाराच्चैकवाक्यत्वानवगतेर्न तत्तुल्यतेत्याशङ्क्यैकं हीदं वाक्यमिति भाष्योपपादितमेकवाक्यत्वं प्रपञ्चयितुम् * जामि वा इत्युक्तम् * सोदर्यवाचिजामिशब्दलक्षितस्य सादृश्यस्य नैरन्तर्यानुष्ठाने सत्यालस्यापादकत्वेन दोषत्वात्तत्कीर्त्तनस्य च निषेधाश्रुतेर्निन्दापर्यवसायित्वायोगादाकाङ्क्षावशेनाजामित्वकरकर्मस्तुत्यर्थत्वावगमाज्जामित्वोपन्यासयोरेकवाक्यतावसीयतइत्याशयः । ननु जामित्वाजामित्वोपन्यासयोरेकवाक्यत्वावसाये ऽप्यजामित्वस्य विष्णवादिवाक्योक्तयागविषयत्वात्तदेकवाक्यतया जामित्वस्यापि तद्विषयत्वावगतेस्तस्य चोपक्रमस्थत्वात्तदनुसारेणोपसंहारस्थस्य विधेरपि तद्विषयतावसीयतइत्याशङ्क्य कः पुनरित्यादिभाष्योक्तार्थवादस्यान्तरालवाक्योक्तयागविषयत्वाद्विधेरपि तद्विषयत्वमुपपादयितुम् *जामिता चेत्युक्तम् * ४८३।१२ पञ्चम्यन्तवैश्वानरवाक्यवदत्रापि वाक्ये विध्यैक्यावसायान्न पृथक् विधितेत्यध्याहारेण नानेकेति व्यवहितान्वयेन वा पूरणीयम्।नन्वेवमपि विष्णवादिवाक्येषु तव्यप्रत्ययेनैकान्तिकविधित्वावगमात्पृथक्विधित्वापत्तिरित्याशङ्क्य तस्मिन्क्रियमाणइति भाष्योक्तं विधित्वानादरमुपपादयितुम् * विष्णवादीत्युक्तम् * न हीत्यनेन विधि-

त्वानपेक्षोपपादिता विष्णवादियुक्तगतस्याजामित्वस्य जामितयान्वये सति विष्णवादियुक्तविधेस्तथान्वयः स्यान्न त्वजामित्वस्य विष्णवादियुक्तगतत्वं सम्भवति विष्णवादियुक्तानामन्तरालसंयोगाभावेन स्तुत्यनर्हत्वादित्याशयः । नन्वन्तरालयुक्तस्याप्यजामित्वान्वयाश्रुतेर्न विधानार्हतास्तीत्याशङ्क्य तत्र व्यवधानादिति भाष्योक्तमन्तरालसंयोगेनैवाजामित्वान्वयावगमाज्ञाभ्युपक्रमेण वाक्येन विधानार्हत्वं विवरीतुम् * अन्तराले‌त्युक्तम् * विष्णवादिवाक्यानां यागाविधायकत्वमेवापि चेति भाष्योक्तेन युक्त्यन्तरेणोपपादयति * किं चेति * विष्णवादिवाक्यैर्यागविधौ सति विष्णवादिदेवताया यागान्वये श्रुतेन विधिना कृते यागो ऽर्थाद्देवतां प्रत्युपसर्जनभूतो विधेयः स्यात्तच्चान्तरालवाक्येन श्रुते चकारात्स्वप्रधानभूते यागे विधेये सम्भवत्ययुक्तमित्यर्थः। अनेन चार्थाक्षेपाधीनत्वेनोपसर्जनभूतस्य देवतासंस्कारकत्वापत्तेरविनियुक्तायाश्च देवतायाः संस्कार्यत्वायोगाद्देवताविधिसापेक्षत्वेन यागविधेर्विप्रकृष्टत्वमाभिप्रेत्य भाष्ये वाक्यशब्दः प्रयुक्त इति सूचितम्। श्लोकं व्याचष्टे *कर्मोत्पन्नइति* याग उपसर्जनं विष्णवादिः प्रधानं यस्मिन्निति बहुव्रीहिं विगृह्य यागोपसर्जनश्चासौ विष्णवादिप्रधानश्चेति कर्मधारयो विग्राह्यः प्रत्यक्षस्य प्रधानस्य च यागस्य कर्त्तव्यत्वोपदेशोपपत्तेरित्यर्थः। एवं सत्यपि विधित्वे देवताविध्यापत्तेर्यागविधित्वं नास्तीत्याह * तत्रेति * देवताविधितैव तर्ह्यस्तु इत्याशङ्क्याह * न चेति * देवतान्वयानभिधायित्वात्तव्यप्रत्ययानां देवताविधायित्वासम्भवे ऽभिहिते चतुर्थ्या देवतात्वानभिधायित्वे ऽपि यथादेवताविधायित्वं तथा तव्यस्यापि भविष्यतीत्याशङ्क्य * सम्प्रदानमित्युक्तम् * त्यज्यमानद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मकसम्प्रदानत्ववाचिनी चतुर्थी लक्षणया वाच्यैकदेशत्यज्यमानद्रव्योद्देश्यत्वात्मकं देवतात्वं वदतीत्याशयः। ननु कर्मत्ववाचिन्यापि द्वितीयया विष्णुं यजतीत्यादौ देवताविधिदर्शनात्तद्वाचिनस्तव्यप्रत्ययस्यापि देवताविधायित्वं कस्मान्न स्यादित्याशङ्क्याह*तत्रेति*तव्यस्य द्वितीयावत्प्रधानभूतकर्मानभिधायित्वात्तत्तुल्यार्थतैव तावत् क्लेशलभ्या न च तल्लाभमात्राद्देवतासिद्धिः देवतायाः कर्मत्वाभावादित्याशयः। कथं तर्हि देवतायास्तव्यद्द्वितीयाभ्यां निर्देश इत्याशङ्क्य निर्देशालम्बनमाह * त्यागार्थत्वाद्धीति * देवतोद्देशद्रव्यत्यागसमुदायवाचित्वाद्यजेस्तादृशस्य च कर्माभावाद् द्रव्यस्यापि पारमार्थिककर्मत्वाभावे ऽपि देवतावच्छब्दमात्रोपकारित्वशङ्कानिवृत्तये ऽर्थरूपोपकारित्वप्रदर्शनार्थः ।

परमार्थशब्दः। उद्देशविशिष्टत्यागवाचिनो ऽपि यजेर्विशेषणांशाना-
दरेण विशेष्यांशविवक्षया त्यागार्थत्वमभिप्रेत्य कर्म भवतीति ल्यप्-
लोपे पञ्चमी। नन्वेवं सति देवतायाः कथं कर्मत्वमित्याशङ्क्य देवतो-
द्देशेन द्रव्यत्यागोत्तरकालं देवतामुद्दिश्य त्यज्यमानेन द्रव्येण देव-
तायाः प्रतिग्रहीतृत्वाभावे ऽपि प्रतिश्रवणेनेवाप्रतिगृह्णतो ऽपि
ब्राह्मणस्य स्वाम्यापादनेनाप्यमानत्वात्तप्ते पयसि दध्यानयतीत्यत्रा-
नयतिकर्मणा दध्नेव व्याप्यमानस्य पयसो * द्वितीयकर्मत्वं भ-
वतीत्युक्तम् * ननु देवताया द्रव्येणाप्यमानत्वस्य दध्नेव पयसः
संस्कार्यत्वमात्रविवक्षायां द्विकर्मकलक्षणो धातुः प्रसज्येत गवेव
तु ब्राह्मणस्य स्वाम्यविवक्षायां सम्प्रदानत्वापत्तेश्चतुर्थी स्यादित्या-
शङ्क्य * तत्रेत्युक्तम् * प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्त- ४८४।१
त्वादित्यत्र षष्ठाधिकरणसूत्रे प्रक्रान्तं कर्म वीतायामपि फलेच्छायां
प्राप्ते वा फले ऽवश्यं समापनीयमित्येतदुपपादनार्थं भाष्यकृतोप-
क्रमादारभ्य समाप्तिपर्यन्तस्य व्यापारसमूहस्याख्यातेन विधित्सित-
त्वात् श्रुत्या चारम्भसमाप्त्योर्विधौ गौरवापत्तेरारम्भमात्रविधौ
च नियोगतः समाप्त्यसिद्धेर्यागादि समापयेदिति शास्त्रार्थ इति
नायमारम्भसमाप्तिशब्दार्थः। किं तर्हि समाप्तिरेव समाप्त्या व्यर्थ-
प्राप्तत्वादारम्भस्य तस्मात्परिसमाप्तिः शब्दार्थ इति भाष्येण वक्ष्य-
माणत्वाद्देवतास्वाम्यापत्तेश्च देवतोद्देशविशिष्टद्रव्यत्यागोत्तरकाल-
त्वेन समाप्तित्वात्तत्कर्ममात्राविर्भावेनैककर्मत्वावधारणात् द्विकर्म-
कधात्वप्रसक्तेर्देवतायाश्च प्रतिग्रहीतृत्वाभावेन सम्प्रदानत्वाभावा-
च्चतुर्थ्यप्रसक्तेस्तव्यद्वितीयोपपत्तिरित्यर्थः। न तु त्यज्यमानद्रव्याप्य-
मानस्य तव्यद्वितीयावाच्यत्वे तल्लक्षणत्वाद्देवतात्वमेव वाच्यं स्या-
दित्याशङ्क्याह * नन्विति * त्यज्यमानद्रव्योद्देशकर्मत्वं देवतात्वं
तच्चोद्देशांशस्य विशेषणत्वेन द्वितीयानन्वयान्न द्वितीययोच्यते देव
ताप्तेस्त्वाहवनीयप्राप्तेर्जुहोत्यर्थत्ववत् यज्यर्थत्वाभावान्नान्तरीयक-
सिद्धावपि अशास्त्रीयत्वेन तत्कर्मत्वलक्षणमाप्यमानत्वं न देवता-
त्वमित्याशयः। कथं तर्हि द्वितीयानिर्देशे देवतात्वसिद्धिरित्याश-
ङ्क्याह * किं तर्हीति * देवतामुद्दिश्य त्यज्यमानेन द्रव्येणाप्यमान-
त्वलक्षणस्य कर्मत्वस्य त्यज्यमानद्रव्योद्देश्यत्वलक्षणाद्देवतात्वाद्वि-
नानुपपत्तेस्तन्निमित्तया लक्षणया गम्यमानत्वाद्द्वितीयानिर्देशे देवता-
त्वनिश्चय इत्यर्थः। यजदेवपूजासङ्गतिकरणदानेष्विति स्मृतिबलेन
पूजाकर्मत्वलक्षणं देवतात्वं द्वितीयावाच्यमित्याशङ्कते * नन्विति *
व्याकरणस्यार्थान्वाख्यानार्थत्वाभावेनार्थवत्त्वे प्रामाण्याभावात्पुरा-

णादौ च यज्ञानधिकारिणो भीष्मादेर्यष्टृत्वकीर्त्तनालम्बनानि पूजा-
प्रतिष्ठादानानि दर्शयितुमौपचारिकार्थान्वाख्यानोपपत्तेर्यजेः पूजा-
वाचित्वाभावान्न तत्कर्मत्वं देवतात्वमित्याशयेन परिहरति * नैष
इति * एतदेव प्रश्नपूर्वकमुपपादयति*कुत इति*श्लोकं व्याचष्टे*
न हीति*अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्याद् गुणत्वे देवताश्रु-
तिरित्यत्र नवमाधिकरणसूत्रे विग्रहाद्यभावेन रूपासमवायाद्देवता-
याः पूज्यत्वं निरस्यातिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीति-
विधानत्वादिति दृष्टान्तवैषम्याभिधानार्थे सूत्रे विग्रहादिसद्भावे ऽपि
यजेः पूजावाचित्वाभावाद्यागकर्मणि देवताप्राधान्याभाव इति मध्य-
मावयवेन देवताप्राधान्यस्य निषेत्स्यमानत्वं न चातिथिवदिति चकार-
सूचितम् । न च यजिरित्यनेन व्याख्यातं किं च पूजयतोः प्रीत्युत्पादनवा-
चित्वादुत्पादनस्य च करोत्यर्थत्वेन नित्यं सकर्मकत्वात्पूज्यस्य तत्क-
र्मत्वे सत्यपि स्वास्थ्यकामः शयीतेत्यादौ प्रत्ययार्थकर्मणि स्वास्थ्या-
दावदर्शनेन द्वितीयाया धात्वर्थकर्मविषयत्वावसायाद्दानादिना च पू-
ज्यस्य धात्वर्थकर्मत्वदर्शनाद्यागेन देवतायाः पूज्यत्वे ऽपि यागकर्म-
त्वाभावान्न द्वितीयावाच्यतास्तीत्याशयेनाह *दानेन चेति * नन्वेवं
सत्युपाध्यायवद्देवतायाः पूज्यत्वेन यज्यर्थत्यागकर्मणा त्याज्येन द्र-
व्येणाभिप्रेयमाणत्वात्सम्प्रदानत्वमेव देवतात्वं स्यादित्याशयेनाश-
ङ्कते * एवं तर्हीति * मुख्यं वा संप्रदानत्वमापद्यते गौणं वा तत्र
मुख्यं तावन्न सम्भवतीत्याह * नेति * तादृशशब्देनोपाध्यायव-
न्मुख्यतोक्ता । नन्वप्रतिग्रहीतृत्वान्मुख्यसम्प्रदानत्वाभावेन सम्प्र-
दानत्वनिर्देशाभावे सति मुख्यकर्मत्वाभावे सति मुख्यकर्मत्वाभावे
कर्मत्वनिर्देशस्याप्यभावापत्तेर्विष्णुं यजतीत्यादिकर्मत्वनिर्देशान्मु-
ख्यकर्मतैव देवतायाः प्रतीयतइत्याशङ्क्य मुख्यसम्प्रदानत्वाभावे
ऽपि सम्प्रदानत्वनिर्देशवन्मुख्यकर्मत्वाभावे ऽपि कर्मत्वनिर्देशोपप-
त्तिप्रदर्शनार्थं गौणसम्प्रदात्वनिर्देशमुदाहरति * अपि चेति * क्व
चित्शब्देन गौणत्वं सूचितम् । एवमौपचारिकपूज्यत्वाभ्युपगमेन
गौणे कर्मत्वे सम्प्रदानत्वे वा सत्यपि देवतात्वं नास्तीत्युक्त्वेदानीं
देवतायाः पूज्यत्वाभावात्तन्निमित्तं कर्मत्वं सम्प्रदानत्वं वा गौणम-
पि नास्तीत्याह * सर्वथेति * न मुख्यवृत्त्या नापि गौणवृत्त्येति स-
र्वथाशब्देन सूचितम् । कथं तर्हि विष्णुं यजति सोमाय यजतइत्यादौ
द्वितीयाचतुर्थीनिर्देशः इत्याशङ्क्यैतदालम्बनं वक्तुम् * आहासा-
धारणेन त्विति * पूजायाः प्रीत्युत्पादनात्मकत्वेन करोत्यर्थत्वाद्य-
जिपरप्रत्ययार्थत्वे सत्योदनस्येव पाके देवतायाः पूजाख्ये प्रत्यया-

र्थे मुख्येऽप्सिततमत्वलक्षणकर्मत्वोपपत्तेर्विषयस्येव वा भक्षणे गौणानीप्सितत्वलक्षणकर्मत्वोपपत्तेरप्रतिग्रहीतृत्वे ऽपि च यद्वान्यस्मै प्रतिश्रुतमित्यत्राप्रतिग्रहीतुरिव पूजाकर्मत्वाद्यागे गौणसम्प्रदानत्वोपपत्तेस्तद्व्यावृत्त्यर्थः केवलशब्दः। यजिपरस्य प्रत्ययस्य ददातिपरप्रत्ययवत्पूज्यवाचित्वाभावाद्यागमात्रविषयं देवतायाः कर्मत्वं सम्प्रदानत्वं वा स्यात्तच्च कर्मान्तरसम्प्रदानान्तरव्यावृत्तेनैव रूपेण भवतीत्याशयः। देवतायाः कर्मान्तरसम्प्रदानान्तरविलक्षणकर्मत्वं सम्प्रदानत्वाभ्युपगमे हेतुमाह * तच्चेति * तत्कर्मत्वं सम्प्रदानत्वं वा यदेवं भूतमन्येभ्यो विलक्षणं कल्प्यते तद्देवतायाः कारकत्वावगमात्कर्तृकरणापादानाधिकरणकर्मसम्प्रदानातिरिक्तस्य कारकस्याभावाद्देवतायाश्च कर्मसम्प्रदानातिरिक्तकारकत्वस्य कथं चिदप्ययोगात्पारिशेष्यात्कर्मत्वस्य सम्प्रदानत्वस्य वावगतेः कर्मान्तरसम्प्रदानान्तरतुल्यस्य च तस्यायोगादित्यर्थः । कथं देवताया कारकत्वावगतिरित्याशङ्क्याह * न हीति * कारकत्वं विना क्रियान्वयायोगात्प्रातिपदिकवाच्येनाकारकरूपेण यागान्वयं न प्रतिपद्यते देवतेति । सर्वथेयं देवतेति देवताशब्दानुषङ्गेण योज्यम् । देवतावाच्यग्न्यादिप्रातिपदिकपरो ऽत्रत्यो देवताशब्दो देवताशब्दवाच्येनापि रूपेण देवतायागान्वयं न प्रतिपद्यते किमुताग्न्यादिशब्दवाच्येनेत्यतिशयद्योतनार्थः। देवतातद्धितविषयो वा देवताशब्दः तद्धितनिर्देशे ऽपि देवताया द्रव्यमात्रान्वयप्रतीतेर्यागान्वयार्थमग्निमनेन यजेताग्नये यजेतेति वा वचनव्यक्तिः कल्प्येत्याशयः। कीदृक् विलक्षणं रूपं कर्मसम्प्रदानयोरित्यपेक्षिते सम्प्रदानस्य तावत् त्याज्यद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मकस्य तदेकदेशोद्देश्यत्वमात्रेण त्यज्यमानद्रव्यस्यान्यत्राविनियोज्यत्वलक्षणदेवतास्वत्वापत्तेः देवतायाः प्रतिग्रहीतृत्वाभावे ऽपि तत्फललाभात्त्यज्यमानद्रव्योद्देश्यत्वमात्रे सकलसम्प्रदानरूपकल्पनात्मकं वैलक्षण्यमाह * तेनेति * येन कारणेनान्यसम्प्रदानतुल्यं देवतायाः सम्प्रदानत्वं नास्ति तेन कारणेन देवतोद्देशद्रव्यत्यागात्मकस्य यागस्य त्यागांशप्राधान्यविवक्षायां प्रतिग्रहाद्विनापि तत्फललाभात्सकलसम्प्रदानत्वकल्पनेन चतुर्थीनिर्देश इत्यर्थः। उद्देश्यांशप्राधान्यविवक्षायां तद्विशेषणभूते त्यागांशे आप्यमानत्वाध्यायेन सकलं यागं प्रति कर्मत्वरूपं कर्मणो वैलक्षण्यमाह * यद्वेति * वचनव्यक्तिभेदेनैतदेव स्पष्टयति * तेनेति * देवतोद्देशेन द्रव्यत्यागाद्देवतास्वाम्यापत्तावपि तदापादनस्याविहितत्वद्योतनायेवशब्दः परस्व- ४८५।२

न्वापादनत्यागयोः प्राधान्याविवक्षायामपि पश्चाद्भावद्योतनार्थौ तुमुनौ । ननु देवताया रूपासमवायेन तदुद्देशस्याप्राधान्यान्न द्वितीयोक्तकर्मान्वयः सम्भवतीत्याशङ्क्य होत्रादेर्द्रव्यस्यास्वाम्याभावास्यकृत्वायोगेन त्यागशून्ये देवतोद्देशमात्रे होतर्यजेत्यादेर्यजिप्रयोगात्प्राधान्यमुपपादयितुमाह * तथा चेति * नन्वेवं रूपयोरपि कर्मसम्प्रदानयोर्विभक्तिवाच्यत्वात्तद्रूपस्य देवतात्वस्य विभक्तिवाच्यता न विरुद्धेत्याशङ्क्याह * तदेतदिति * अनेकवाच्यशक्तिकल्पनापत्तेर्नानयोर्देवतामात्रविषययोर्वाच्यत्वकल्पना युक्तेत्याशयः । नन्वेवमपि लाक्षणिकत्वाविशेषात्सम्प्रदाननिर्देशवत्कर्मनिर्देशे ऽपि देवतात्वं कस्मान्नेष्यतइत्याशङ्क्याह * तत्रापीति * प्रतिग्रहीतृत्वाभावेनासमस्तात्मकत्वाद् दूषितमपि सम्प्रदानत्वमुद्देशत्यागाव्यभिचारित्वात्तत्सम्बन्धिनो देवतात्वस्य प्रत्यासन्नं कर्मत्वं तूद्देशत्यागव्यतिरिक्तेषु क्रियान्तरेष्वपि सम्भवेन सव्यभिचारित्वाद्विप्रकृष्टं ततश्च कर्मत्वेन देवतात्वलक्षणा ऽत्यन्तक्लिष्टेत्याशयः । ननु कर्मत्ववद्देवतात्वस्यापि सप्तदेवताः शंसतीत्यादौ क्रियान्तरेषु भावात्तु तन्मात्रेण कर्मत्वस्य देवतात्वाद्विप्रकर्षः स्यादित्याशङ्क्याह * न हीति * तत्प्रकृतं हविर्भाक्त्कलक्षणं देवतात्वं सकलं यथायजिमेव प्रति ननु क्रियान्तरमपि प्रति न तथा सकलं कर्म यजिमेव प्रतिक्रियान्तरेष्वपि कस्य चित्कर्मणः सद्भावादित्यर्थः । स्तुतिभाक्त्कलक्षणं त्वितरद्देवतात्वं न हविर्भाक्त्कलक्षणमित्याशयः । ननु कर्मत्वसम्प्रदानत्वयोर्देवतात्वाभावाद्वितीयाचतुर्थ्यौ देवतानभिधायित्वे को ऽन्यस्तद्वाची शब्दः स्यादित्याशङ्क्याह * परमार्थतः पुनरिति * स्मृतितिबलेनैतदेवोपपादयतिं * तथा चेति * क्रीतादितद्धितविधौ यथा तृतीयया कारकविभक्त्या वदनं कृतं न तथा देवतातद्धितविधाविदमग्नये ऽनेनाग्निमिति वा कारकविभक्त्या वदनं कृतमित्यर्थः । भावे ऽनिष्टा श्लोकं व्याचष्टे * ये हीति * अनन्यशब्दवाच्यत्वोपपादनस्य तव्यप्रत्ययवाच्यत्वोपयोगमाह * ततश्चेति * देवतायास्तव्वाच्यत्वोपपादनस्य प्रकृतयागविधायित्वाभावोपयोगमाह * तत्रेति * न त्विति भाष्येणान्तरालवाक्ये ऽपि यागान्तरालान्वयविधिप्रतीतेर्यागस्य स्वरूपविधिक्लेशसाम्यमाशङ्क्य बाढमित्यनेनोपांशुत्वान्तरालान्वयस्यैव विधेयत्वाभिधानेनाशङ्काशयानतिक्रमाद्विधित्वाभिधानाच्चायुक्तत्वमाशङ्क्यैकग्रन्थेनाशङ्कापरिहाभाष्यद्वयं तात्पर्यतो व्याचष्टे *अन्तरेति * विशिष्टार्थप्रतीतौ सम्बन्धस्य नान्तरीयकत्वात्सम्बन्धशब्देन लक्षणया वैशिष्ट्याभिधानाद्विधित्वं च

विनानर्थक्यापत्तेरनन्यगतित्वस्य हेतुत्वेन विवक्षितत्वाच्छङ्कापरिहार इत्याशयः। केन भाष्येणानन्यगतित्वं हेतुत्वेन विवक्षितमित्याशङ्क्य नन्वन्तरालसम्बन्धस्यान्यत्प्रयोजनमिति भाष्येणेति सूचयितुमाह * न हीति * उपांशु पौर्णमास्यां यजन्नित्यत्रैकीकृतानां कालसम्बन्धे सति सर्वेषां प्राधान्यं स्यादित्यत्र समुदायानुवादार्थवत्तोक्तेत्याशङ्कते*ननु चेति * शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीय इत्यन्यार्थदर्शनस्य प्राधान्यद्योतकत्वेन व्याख्यायां पूर्वपक्षे ऽग्नीषोमीयोपांशुयाजव्यतिरिक्तयोर्वैष्णवप्राजापत्योपांशुयाजयोरप्राधान्यापत्त्यभिधानेन समुदायानुवादानर्थक्यस्य वक्ष्यमाणत्वान्न सर्वोपांशुयाजप्राधान्यज्ञापनेनार्थवत्तेति परिहरति*तथेति*एवं तु व्याख्यायमाने यदीमे ऽपि विधीयेरन् भिद्यते वाक्यमित्यस्यानन्तरमेकं हीदमित्यादेर्विष्ण्वादिसम्बन्धो ऽनूद्यत इत्यन्तस्य भाष्यस्यान्वयापत्तेरुपांशुत्वादिसम्बन्धइत्यस्यानन्तरं च न त्वन्तरालसम्बन्धस्येत्यस्यान्वयापत्तेर्व्यवहितान्वयदोषभयान्नन्वित्यनेन विष्ण्वादिवाक्यविहितेषु यागेष्वन्तरालगुणविधानायान्तरालवाक्यमित्याशङ्क्योपांशुत्वस्यादिशब्दोपात्तस्य चान्तरालस्य प्राप्ते कर्मण्येकेन वाक्येन विधानाशक्तेश्चोदना वा गुणानां युगपद् शास्त्रादित्यनेन न्यायेन विष्ण्वादिवाक्यैर्यागविधावप्यन्तरालवाक्येन कर्मान्तरविधानापत्तौ बाढमित्यनेनार्हतीत्यन्तेनोक्तायां विष्ण्वादिवाक्यप्राप्तानामुपांशुत्वस्यान्तरालवाक्ये ऽनुवादात्कथमनेकगुणविधानात्कर्मान्तरापत्तिरित्याशयेन कथमिति पृष्टे जामि वेत्यादिनानूद्यत इत्यन्तेन विष्ण्वादिवाक्यानां विधायकत्वायोगान्न तत्प्राप्तोपांशुत्वानुवादः सम्भवतीत्युक्ते ऽनुपादेयान्तरालकालान्वयात्प्रकरणान्तरन्यायेनापि कर्मविधित्वाभिधानार्थं नन्वन्तरालसम्बन्धस्येति भाष्यमिति यथान्यासमेव भाष्यव्याख्यां सूचयितुमाह * किं चेति * नन्वनुपादेयान्वये ऽपि विष्ण्वादिवाक्यविहितयागविपरिवृत्तेः प्रकरणान्तरन्यायो नास्तीत्याशङ्क्याह * तादृगिति * एतदेव व्याचष्टे * यादृशी हीति * अस्मिंश्च व्याख्याने विष्ण्वादिवाक्यानां कर्मविधित्वे ऽप्यन्तरालवाक्यस्य गुणात्प्रकरणान्तराद्वा कर्मान्तरविधित्वाभिधानाद्भाष्यस्थः कर्मान्तरशब्दः समञ्जस एवेत्याह * तत्रेति * ननूद्देश्यत्वेन देवताया अपि कालवदनुपादेयत्वात्तदन्वये ऽपि कर्मान्तरापत्तेस्तस्मिन्नेवान्तरालविहिते यागे देवतां विदध्युरिति वार्त्तिकमयुक्तं स्यादित्याशङ्क्याह * देवतायाः पुनरिति * अस्या इदमिति द्रव्यत्यागसङ्कल्पविषयत्वलक्षणोद्देश्यत्वे ऽपि देवतायाः

४८६।२

कर्मकाले शब्दप्रतिपाद्यत्वेनापाद्यत्वलक्षणोपादेयत्वान्न तदन्वयः कर्मान्तरत्वापादक इत्याशयः । ननु कर्मान्तरशब्दस्य विष्णवादिवाक्यानां कर्मविधित्वाभ्युपगमविषयत्वे प्रकृतानां यागानामभावादिति भाष्यमयुक्तं स्यादित्याशङ्क्याह * कर्मेति * आद्यव्याख्याने त्वाग्नेयाद्यपेक्षया कर्मान्तरशब्द इत्याह * अथ वेति * परमार्थतस्तु द्वितीये व्याख्याने विष्णवादिवाक्यानां विधित्वमनिष्टमेवेति दर्शयन्नुपसंहरति * तस्मादिति * प्रकरणान्तरन्यायाभावेऽप्यनुपादेयान्वयस्याकर्मविधित्वापादकत्वं दर्शयितुमाह * धात्वर्थे चेति * अनुपादेयाङ्गविधितोऽपि तदुद्देशेन कर्मैव विधेयमित्याशयः ननु कुत्वप्रसक्त्योपांशुयाजशब्दस्य गुणविधित्वायोगेनोपांशुत्वस्याविधेयत्वान्नानेकगुणविधानेन कर्मविधित्वसिद्धिरित्याशङ्कां निराकर्तुं प्रसक्तिं तावत्करोति * स त्विति * गुणविधित्वपक्षे कुत्वप्रसक्तिं नैवं जातीयक इति पूर्वपक्षभाष्योक्तां परिहर्तुमनुभाषते * यत्त्विति * पक्षद्वयसाम्येन परिहर्तुम् । उपपत्तिसाम्यं तावदाह * तत्रेति * एतदेव प्रश्नपूर्वमुपपादति * कुत इति * श्लोकं व्याचष्टे * वाच्येति * यस्त्वव्युत्पन्नस्त्विति पूर्वपक्षभाष्येण पर्यग्निकृतं पात्नीवतमुत्सृजन्तीति पात्नीवतशब्दस्य त्वाष्ट्रपात्नीवतावाचकस्यापि किं चिद्वर्णसारूप्यावगमात्तदनुवादकत्वदर्शनेनोपांशुयाजशब्दस्यानुवादकत्वे वाचकत्वानपेक्षेति परिहार उक्तस्तन्निरासार्थमनुभाषते * स्यादिति * निराकरोति * तदिति * नन्वेवमपि नामत्वानिरासेन गुणविधिनिश्चयः कथमित्याशङ्क्याह * न चेति * श्लोकं व्याचष्टे * न तावदिति * उपांशुयाजनामकत्वाच्चास्य कर्मण इदमवगम्यते नूनमस्योपांशुत्वं धर्म इति दशमोपान्त्याधिकरणभाष्यं त्वाग्नेयाग्नीषोमीयशब्दवद्धृदयमुपांशुयाज इत्यादिवाक्यान्तरस्थगुणनिमित्तोपांशुयाजशब्दव्यवहारविषयमित्याशयः । अतोऽन्तरालवाक्यस्थेनैवोपांशुयाजशब्देनोपांशुत्वविधिरित्युपसंहरति * तस्मादिति * सूत्रकृतोऽपि गुणविधित्वेष्टेत्याह * तथा चेति * कथं तेनेति भाष्येण जामित्वापनयनप्रकारं पृष्ट्वा तस्मिन्नित्यनेन देवतावैलक्षण्यं प्रकारत्वेनोक्तं तत्पुरोडाशनैरन्तर्येणोक्तस्य जामित्वस्य द्रव्यवैलक्षण्यं विनानपनयनादयुक्तमाशङ्क्य देवतावैलक्षण्यस्योपलक्षणार्थत्वं दर्शयितुमाह * जामित्वेति * सर्वस्मै वा तद्यज्ञाय गृह्यते यत् ध्रुवायामाज्यमित्यनेनानिर्दिष्टद्रव्यकेषु यागेष्वाज्यविधानाद् द्रव्यवैलक्षण्यमाग्नेयाग्नीषोमीययोर्मध्यमस्वरत्वात्स्वरवैलक्षण्यं विष्णुप्रजापतिपक्षे देवतावैलक्षण्यं युगपत्पुनरिति भाष्येण विष्णवा-

दिवाक्यानामर्थवादत्वदेवताविधित्वाभावाद्विष्णवादेरप्राप्तत्वेनानुवादानुपपत्तिमाशङ्क्य यष्टव्यानित्यनेनायष्टव्यत्वे ऽप्युपांशुयाजस्तुत्यर्थं यष्टव्यत्वकीर्त्तनमित्युक्तं तस्य ज्ञायत एवेति भाष्येण विरोधमाशङ्क्य परिहर्त्तुमाह * ज्ञायत एवेति * देवतावैलक्षण्येनाग्नेयाग्नीषोमीयाभ्यामुपांशुयाजस्य वैचित्र्यप्रदर्शनार्थं कीर्त्तिना न विष्णवादिवाक्यविहितत्वप्रदर्शनार्थं तेन कारणेन विष्णवादेरवश्ययष्टव्यत्वाभावे ऽपि स्तुत्यर्थत्वेनोपादानाभिधानं न पूर्वभाष्यविरुद्धमित्याशयः । अयष्टव्ये यष्टव्यत्वोपपादनालम्बनम् * गुणवादेनेत्यनेनोक्तम् * कीदृशो गुणवाद इत्यपेक्षिते * प्राधान्येत्युक्तम् * अग्निर्वै देवानामवमो विष्णुः परम इति श्रुतेर्विष्णोः सर्वदेवानां मध्ये प्राधान्यप्रसिद्धिः एत इति वै प्रजापतिर्देवानसृजतेति श्रुतेः प्रजापतेः प्राधान्यप्रसिद्धिरग्नीषोमीययोस्तु तावब्रूतामग्नीषोमावित्यत्र कीर्त्तनादुपांशुयाजे प्राधान्यप्रसिद्धिः । ननु विष्णवादेः प्राधान्यमात्रेण यष्टव्यत्वाभिधाने यागान्तरेष्वपि यष्टव्यत्वापत्तेर्वैलक्षण्यं न स्यादित्याशङ्क्य * यागइत्युक्तम् * विधिं विना देवतात्वाभावात्प्राप्तावनियमप्रसक्त्ययोगे ऽपि या काचिदिह देवता स्यादित्यपेक्षायामनियमप्रसक्तिरुक्ता निर्दिष्टदेवताकत्वाद्यागान्तरेष्वप्रसक्तिरित्याशयः । ननु विष्णुरुपांशु यष्टव्य इत्येवमादीनां विधित्वाभावे विष्णवादेर्विधायकाभावाद्विध्येकगम्यत्वेन च देवताया यागाक्षेपमात्रेणालाभाद्देवताराहित्येनोपांशुयाजविधिरवसीदेदित्याशङ्क्य तत्रेति भाष्येण शाखान्तरविधानेन विहितत्वमुक्त्वा यद्यपीत्यनेन प्रत्यक्षविध्यभावे उपांशुधर्मकत्वेन विष्णुप्रजापत्योः कल्पविधिविहितत्वं विष्णोश्च मन्त्रवर्णकल्पेनापि विधिना विहितत्वमग्नीषोमयोस्तु पुराकल्पसरूपार्थवादकल्पविधिविहितत्वमुक्तं तत्सर्वमाक्षेप्तुं शाखान्तरइति तावदाक्षिपति * शाखान्तर इति * अनुदाहृत्यैव शाखान्तरे ऽस्तीत्यभिधाने यस्मै यद्रोचते तत्सर्वं सिद्ध्येदित्याशयः । शाखान्तरे च देवताविधौ सत्युपांशुयाजे पूर्वाधिकरणपूर्वपक्षे द्रव्यानियमवत्कि देवतायामप्यनियमः शास्त्रैकप्रमाणत्वाद्वा देवतायास्तेन विना कल्पनायोगादाग्नेयमुपांशुयाजमन्तरा यजत्यैन्द्रमुपांशुयाजमन्तरा यजतीत्यादिप्राकरणिकवाक्यान्तरस्थाग्नेयादिपदानुषङ्गेण वैकल्पिकप्रकृताग्न्यादिदेवताविधिकल्पनया प्रकृतानामेव मध्ये या काचित्प्रजापतिधर्मोपांशुत्वदर्शनाद्वा प्रजापतिविधिकल्पनया स एव प्रजापतिर्मनसा यजेतेति वा प्रजापतेस्तूष्णीं भावधर्मकत्वविधानेनोपांशुत्वधर्मकत्वाभावात्प्रजा-

पतिविधिकल्पनानुपपत्तेर्नियमसम्भवे चानियमायोगान्मुख्यत्वेना-ग्नेयपदमात्रानुषङ्गेणाग्निविशिष्टोपांशुयाजविधिकल्पनयाग्निनियम इति विचारपूर्वकं विष्णुर्वा स्याद्धौत्रादमावास्या हविश्च स्याद्धौत्रस्य तत्र दर्शनादिति सूत्रेण मान्त्रवर्णिकदेवताश्रयणं न युज्येतेत्याह * न चेति * अत्रत्यश्च यद्यपीति भाष्यावयवः प्रत्यक्षदेवताविधि-सद्भावे न युज्येतेत्याह * यद्यपीति * प्रजापतिं मनसा यजेतेति प्रजापतितूष्णीम्भावधर्मकत्वश्रुतेस्तुष्णीं वै श्रेयस आकाङ्क्तइत्यर्थ-वादाच्च श्रेयोऽभ्यर्थनतूष्णीङ्कार्यत्वावगतेस्तस्मादाहुर्विष्णुर्देवानां श्रेष्ठ इति च विष्णोः श्रेयस्त्वश्रुतेस्तूष्णीम्भावधर्मकत्वावगमाद्यत्किं चि-त्प्राजापत्यमिति च वर्त्तमानापदेशस्य स्पष्टविधिविहिततुष्णीम्भाव-विरुद्धोपांशुत्वविध्यशक्तेर्देवताधर्मोपांशुत्वस्य यागे दर्शनेन विष्णुप्र-जापतिदेवत्यत्वकल्पनायोगाद्यदुपांशु तत्प्राजापत्यमिति विपरीतवच-नव्यक्त्याश्रयणेन तथापीत्यूक्तमित्यापाद्याक्षिपति * यदप्युक्तमिति* उपांशुयाजस्योपांशुधर्मत्वात् विष्णुप्रजापती प्राप्ताविति वदतोपांशुत्व-स्य प्राजापत्यत्ववैष्णवत्वनिमित्तस्योपांशुयाजे ऽपि समानत्वात्प्रजा-पतिर्देवता विष्णुश्च प्राजापत्यवाक्यादेवमादिसङ्कीर्त्तनादित्यादि-शब्दसूचिताच्च तत्सहशाद्वैष्णववाक्याद्विष्णुप्रजापत्योरुपांशुधर्म-कयागान्वयावगमादिति देवताया यागाभेदोपचारेणोपांशुधर्मश-ब्दप्रयोगमभ्युपगम्य भाष्यार्थः सूचितः। स्तुत्यर्थत्वेनापि प्राजापत्य-वाक्यार्थोपपत्तेर्वचनव्यक्तिविपर्यासो न युक्त इत्याक्षेपाशयः ॥ अ-ग्नीषोमीययोस्त्विति भाष्यमाक्षिपति * यदपीति * ननु ताविति चतुर्थ्यादेशाद्देवताविधिर्भविष्यतीत्याशङ्क्याह * यदि हीति * वि-ध्यधीनत्वात्प्रवृत्तेरग्नीषोमाभ्यामावाभ्यां यजेरन्नित्युक्ते ऽप्यस्माकं किमग्नीषोमोक्तार्थानुष्ठानेनेति जानन्तो विधिना वयं प्रवर्तिता इ-ति नावधारयेयुरित्यर्थः। अनेकार्थविधौ वाक्यभेदापत्तेर्नास्य देवता-विधायितेत्याह * कालेति * देवतामात्रं तर्हि विधीयतामि-त्याशङ्क्याह * देवतेति * ननु पुरोडाशद्वयान्तराले विधाना-दमावास्यायां च पुरोडाशैक्येनान्तरालयोगादुत्पत्तिवाक्यादेव पौ-र्णमासीकालत्वावगतेर्द्विद्वाक्यस्थेन पौर्णमासीशब्देनानुवादात्फ-लवाक्यस्थेन पूर्णमासशब्देन ग्रहणोपपत्तेः प्राधान्यं सेत्स्यतीत्याश-ङ्क्याह * सूत्रेति * अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगा-त्मन्त्रो यथा प्रधानं स्यादिति सूत्रेण प्रधानस्योपांशुयाजस्योपां-शु पौर्णमास्यां यजन्निति शब्देन पौर्णमासीकालं संयोगात्पौ-र्णमास्यामेवोपांशुयाजः कार्यः मन्त्रस्तु वैष्णवयाज्यानुवा-

क्यारूपे ऽमावास्याक्रमाम्नातो ऽपि प्रधानानुसारात्पौर्णमास्यामेव स्यादिति वदतास्यैव कालविधानार्थत्वेनोपन्यासान्नोत्पत्तिवाक्यं कालविधिरित्याशयः । पौर्णमासीशब्देनानपायश्च कालस्य लक्षणं हि पुरोडाशावित्यनेन न्यायेनैकपुरोडाशायां पौर्णमास्यामिवामावास्यायामप्युपांशुयाजोपपत्तिः पौर्णमासी विध्यभावे सूचिता शाखान्तरइतिभाष्यं तावत्समाधातुमारभते * अत्रेति * शाखाभेदेनोपांशुयाजक्रमे वैष्णवादियाज्यानुवाक्यायुगलाम्नानात् श्रुत्याविनियुक्तस्यापि मन्त्रस्य प्रधानाकाङ्क्षितदेवताप्रकाशनलक्षणोपकारकत्वसम्भवेनाकाङ्क्षिताद्दृष्टोपकारकल्पनायोगाद्देवताकल्पकत्वोपपत्तेर्मन्त्रवर्णकल्पो देवताविधिर्विष्णुर्वा स्याद्धौत्राम्नानादिति दशमोपान्त्यधिकरणगतसूत्रवक्ष्यमाणन्यायेन स्थित इत्यर्थः । सूत्रे विष्णुग्रहणमन्तरेण एकशाखायाममावास्यायां विष्णु याज्यानुवाक्याम्नानादमावास्यायामेवोपांशुयाजहविः कार्यमिति प्रदर्शनार्थं पूर्वपक्षस्थेन कृतं न देवतान्तरनिवृत्त्यर्थमित्याशयः । ननु नाना शाखाधीतानामपि याज्यानुवाक्यायुगलानां देवताकल्पनात्प्राक् दृष्टार्थत्वेनानवसायाद्वसन्तमृतूनां प्रीणामीत्यादीनामेको ममेत्यादीनां च प्रयाजानुमन्त्रणानामिव समुच्चयापत्तेस्तत्कल्पानां देवतानामपि समुच्चयः प्रसज्येतेत्याशङ्क्याह * तैश्चेति * देवताकल्पनात्प्रागपि याज्यानुवाक्यासामान्यतो यागाङ्गदेवताप्रकाशनलक्षणैककार्यत्वावगतेर्न समुच्चयो युक्त इत्याशयः । ननु याज्यानुवाक्यानां हौत्रप्रवचनाख्यवेदाम्नानेनाध्वर्यवप्रवचनाख्ययजुर्वेदविहितोपांशुयाजापेक्षया वेदान्तरीयत्वाच्छाखान्तरीयत्वाभिधानं न प्रयुज्येतेत्याशङ्क्याह * तदेव चेति * वेदान्तरस्य शाखान्तरताप्यस्तीत्याशयः। वेदैक्यएव शाखान्तरव्यपदेशाङ्गस्येनापरितोषात्परिहारान्तरमाह * आध्वर्यवे ऽपि त्विति * नन्वेवं सत्यध्वर्युप्रयोज्यतैव स्यादित्याशङ्क्य होतर्यजेति प्रैषसामर्थ्याद्धोतृ * प्रयोज्यत्वरूपेणेत्युक्तम् * यथाश्रुतवचनव्यक्त्याश्रयणेनैव विष्णुप्रजापत्योरुपांशुधर्मकत्वावगतेर्यागस्य विष्णुप्रजापत्योश्चोपांशुत्वसाम्याद्विष्णुप्रजापतिदेवत्यत्वप्रापकलिङ्गोपन्यास इत्येवं तथापीति भाष्यं समाधत्ते * उपांश्विति * उपांशुधर्माणावित्यनेन यद्विष्णुप्रजापत्योरुपांशुत्वधर्मत्वमुक्तं तदुपांशुयाजस्य मन्त्रवर्णप्राप्तविष्णुप्रजापतिदेवत्यत्वद्योतनार्थमित्यर्थः । शाखान्तरभाष्योक्तस्य मान्त्रवर्णिकत्वस्य विष्णुर्वा स्यादिति सूत्रवक्ष्यमाणत्वद्योतनार्थं मन्त्राम्नानाच्चेति भाष्यमिति सूचनार्थश्चकारः कथं विष्णुप्रजापत्योरुपांशुधर्मत्वेनोपांशु-

याजस्य तद्देवत्यत्वद्योतनेत्यपेक्षायामाह * अन्या हीति * ननु प्रत्यक्षमानसत्वविधिविरोधान्न लिङ्गेनोपांशुत्वप्राप्तिरित्याशङ्क्याह * विष्णिवति * यथान्यो न शृणोति तथोच्चारणस्योपांशुत्वादन्याश्रवणसादृश्येन मानसत्वएवोपांशुशब्दो ऽनुक्तदेवताकेषु विष्णुप्रजापतिदेवत्यत्वद्योतनार्थं प्रयुक्त इत्याशयः। अग्नीषोमयोस्त्विति भाष्यं कालविधायिनि वाक्ये ऽग्नीषोमयोः प्राप्तिरुदाह्रियतइत्येवं व्याचक्षाणः समाधत्ते * तथेति * तावब्रूतामित्यस्मिन्कालस्य विधायके वाक्ये ऽग्नीषोमीययोरनुवादेन मान्त्रवर्णिकीं प्राप्तिमग्नीषोमयोस्त्विति भाष्यमुपोद्बलयतीत्युक्ते ननु पुराकल्पसदृशस्यापि विधायकत्वाभ्युपगमे देवताविधायकतापि कस्मान्नेष्टेत्याशङ्क्य कालस्य विधायके वाक्यभेदापत्तेर्देवता * विध्यसम्भवादित्युक्तम् * देवतैव तर्हि विधीयतां न काल इत्याशङ्क्य यथेत्यनेन देवताज्योपांशुत्वकालानामिह वाक्ये कीर्त्तितानां मध्ये ऽन्यतः प्राप्तिसम्भवासम्भवावालोच्य विधेयतयानुवाद्यतया च ग्रहणस्य न्याय्यत्वात्कालव्यतिरिक्तानां चान्यतःप्राप्तिसम्भवात्कालस्यै *वैतद्विधायकमित्युक्तम् *

गुणोपबन्धात् ॥ ११ ॥

यदुच्यत इति भाष्येणोपांशुत्वगुणोपबन्धान्नारूपत्वेन पौर्णमासी लभ्यते इति पूर्वपक्षोक्तारूपत्वपरिहारार्थत्वेनैतत्सूत्रं व्याख्यातुमुपांश्वित्विति वाक्यमुदाहृतं तद्देवतावदुपांशुत्वस्याप्यविधायकत्वाद्विध्यर्थत्वे चोपांशुशब्दस्य यागविशेषोपलक्षणार्थत्वायोगात्रिष्वपि पौर्णमासीयोगेषुपांशुत्वोपपत्तेर्नोदाहार्यमित्याशङ्क्योत्पत्तिवाक्यस्थस्योपांशुयाजशब्दस्योपांशुत्वविधानार्थत्वोपोद्बलनायैतदुदाहृतमिति सूचयन् व्याचष्टे * यस्येति * यथाश्रुतार्थत्यागे हेतुमाह * नन्विति * नन्वार्थवादकल्पविधित्वमात्रेणैकस्य वाक्यस्यानेकार्थपरत्वे वाक्यभेदः शक्यपरिहारः ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादावनेकार्थविधौ चोदिते हि ते हि तदर्थत्वात्तस्य तस्योपदिश्येतेत्यनेन वाक्यभेदाभिधानाद्रात्रिसत्रे ऽप्यर्थवादकल्पस्य विधेः फलमात्रपरत्वान्नानेकार्थापरतास्तीत्याशयः। उपांशुत्वादिवच्चाज्यस्याप्यनेनैव विधानापत्तेर्हविर्लिङ्गाश्रुतित्वादिति दशमोपान्त्याधिकरणसूत्रविरोधः। किमर्थं तर्ह्येतदुदाहृतमित्यपेक्षायां पूर्वसूचितमेव प्राप्त्युपोद्बलनार्थत्वं प्रकटयति * अत इति *

४८९।१ प्राये वचनाच्च ॥ १२ ॥

प्रधानेति भाष्येणोपांशुयाजस्य प्रधानप्राये वचनात् प्राधान्यावगतेर्विष्णवादिवाक्यैश्च विधावुपांशुयाजभेदे सत्यग्नीषोमीयस्यैवोपांशुयाजस्य कालविधिप्रसङ्गाद्विद्वद्वाक्यानूदितत्वात्फलवाक्यग्रहेण प्राधान्याद्वैष्णवप्राजापत्ययोरुपांशुयाजयोर्गुणत्वापत्तेरुपांशुयाजमात्रप्राधान्यावगतिबाधप्रसङ्गान्नोपांशुयाजवाक्यं पौर्णमासीवाक्यवत्समुदायानुवाद इत्येवं सूत्रं व्याख्यातं तत्र किं प्राये वचनमित्यपेक्षायामुदाहरति * हृदयमिति * यज्ञस्यामूर्त्तत्वेन शिरोहृदयपादायोगमाशङ्क्य स्तुत्यर्थं पुरुषत्वोपचारः । ननूपांशुयाजभेदे ऽपि विध्युद्देशान्तर्गतत्वात्सन्निहितत्वाच्चोपांशुत्वस्यैवार्थवादस्थव्यवहितदेवतानपेक्षस्य यागोपलक्षकत्वात्सर्वेषामुपांशुयाजानां कालविध्यवगतेर्विशेषतश्च समुदायेनैकीकृतानां कालयोगावगतेः पक्षद्वये ऽप्यविशिष्टं प्राधान्यमित्याशङ्कते * कथं पुनरिति * यागोपलक्षणत्वं विना देवताकीर्त्तनानर्थक्यापत्तेरर्थवादस्थयोर्व्यवहितयोरपि वाग्नीषोमयोरुपांशुत्ववदुपलक्षणत्वावगमात्कालोद्देशेन चोपादीयमानानां यागानामनेकोपलक्षणान्वये ऽपि वाक्यभेदानापत्तेः समुदायीकृतानामपि च कालान्वये समुदायशब्दाभावेनाग्नीषोमदेवत्यस्यैवोपांशुयाजस्य कालविधिप्रतीतेः प्राधान्यापत्तिरिति परिहरति * उच्यतइति * अवधारिते ऽपीत्यपिशब्दो ऽध्याहार्यः अग्नीषोमीय एवेत्यनेनाग्नीषोमयोरुपलक्षणत्वावश्यं भावः सूचितः । श्लोकं व्याचष्टे * ताविति * नन्वेवं सत्युपांशुयाजैक्ये ऽप्यग्नीषोमपक्ष एव कालविधानापत्तेर्नित्यवत्प्राधान्यकीर्त्तनं न युज्येतेत्याशङ्कते *नन्विति* अष्टदोषदुष्टदेवताविकल्पापत्तेरप्युपांशुयाजैक्यपक्षो न युक्तइति सूचनार्थो दोषशब्दः । कर्मैक्ये सत्युपलक्षणापाये ऽप्युपलक्ष्यानपायाद्देवतान्तरपक्षे ऽप्यविशिष्टः कालविधिरिति परिहरति * नैष इति * श्लोकं व्याचष्टे * यदि हीति * सर्वत्रेत्युक्ते क्वेत्युदाहरणापेक्षायामसोमयाजिनो ऽग्नीषोमीयपुरोडाशाभावादन्तरालकालोपलक्षणीभूतपुरोडाशद्वयाभावे ऽपि तदुपलक्षिताग्नेयपश्चाद्भावलक्षककालानपायादुपांशुयाजानिवृत्त्यभिधानार्थं दशमान्त्याधिकरणसूत्रमुदाहृतम् । एवं च सत्यग्नीषोमग्रहणस्योपलक्षणार्थत्वे ऽपि देवतान्तरपक्षे कालयोगनिवृत्तिप्रयोजनत्वानवगमात्फलवाक्ये वैरूप्यापत्तेश्च कादाचित्कप्राधान्यप्रयोजनत्वायोगादानर्थक्यपरिहारायाज्यग्रहणवत्स्तुत्यर्थतैव न्याय्येति सूचयितुमाह*नचेति* भेदे तू पलक्षणार्थतया विध्युद्देशान्तर्गतत्वेन प्रयोजनवत्तरत्वसम्भवे मन्दप्रयोजनस्य स्तुत्यर्थत्वस्यान्याय्यत्वादुपलक्षणार्थतैवोचितेति

सूचयितुमाह * नानात्वे त्विति * तस्मादित्युपसंहारभाष्यं प्रायवचनहेतुसाध्याभिधानार्थत्वेन व्याचष्टे * तस्मादिति * अधिकरणसिद्धान्तप्रयोजनाभिधानार्थम् * चैककर्मत्वायेत्युक्तम् *

॥ आघाराद्यपूर्वताधिकरणम् ॥ ५ ॥

आघाराग्निहोत्रमरूपत्वात् ॥ १२ ॥

नापूर्वविधी इति भाष्येण पूर्वाधिकरणपूर्वपक्षसूत्रस्थपौर्णमासीवत्पदानुषङ्गेणाघाराग्निहोत्रं पौर्णमासीवत् समुदायानुवाद इत्येवमेतत्सूत्रं व्याख्यातं तत्रोपांशुयाजवत्प्रकृतकर्माभावेनेहापि समुदायानुवादत्वनिरासासिद्धेः प्रत्यवस्थानानुपपत्तिमाशङ्क्योपांशुयाजवैषम्यमाहोर्ध्वमिति वैषम्योक्त्यानन्तरसङ्गतिरपि सूचिता। नतूर्ध्वादिवाक्यानां कर्मविधितैव नास्तीत्याशङ्क्याह * किं चेति * एकोपक्रमसंहाराभावेनैकवाक्यत्वावगतेः । कथं चिच्चैकवाक्यत्वप्रतीतावपि ऊर्द्धत्वादेः कथं चित्प्राप्त्यभावेन स्तुत्यर्थत्वायोगाद्विधित्वावगतेः कर्मनिरपेक्षगुणविध्ययोगाद् गुणविशिष्टकर्मविधितैव न्याय्येत्याशयः। श्लोकं व्याचष्टे * नेति * कर्मनिरपेक्षगुणविधिसम्भवासम्भवसन्देहो ऽत्र मूलसन्देहे हेतुरिति सूचयितुं सन्देहपूर्वं गुणवत्कर्मगोचरपदव्याख्या एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * न तावदिति * विधौ स्मृताया लिङो यासुडागमविधानात् यादित्येतावतः प्रयोगाननुगतमपि विध्यभिधायित्वमभ्युपेत्य * न हीत्युक्तम् * भावनाभिधायित्वं तु शुद्धस्य न प्रयोजनात्स्मृतेर्वावगम्यत इत्याशयः। कुर्याच्छब्दमात्रान्वये ऽपि धात्वर्थाद्व्यतिरेकः स्यान्न भावनातः। वस्तुतस्तु करोत्यर्थस्यापि धात्वर्थानवच्छिन्नस्याप्रतीतेर्न तद्व्यतिरेकेणापि विधित्वस्य दध्याद्यन्वयः सम्भवतीति किं * तर्हीत्यनेनोक्तम् * ननु भावनाया धात्वर्थानपेक्षगुणविध्ययोगे ऽपि तद्द्वारैव गुणविधिर्भविष्यतीत्याशङ्क्याह * तस्मादिति * अशक्तिमेवोक्तवचनव्यक्तिद्वयातिरिक्तवचनव्यक्त्यसम्भवेनोपपादयति * देवहीति * दध्युदूर्ध्वादिवाक्यानां गुणवत्कर्मगोचरत्वमुपपादितमुपपादयति * तस्मादिति * ननु तस्मादेव तावपि समुदायानुवादाविति पूर्वपक्षोपसंहारभाष्यात्समुदायानुवादत्वं पूर्वपक्ष्यभिमतं गम्यते न च दध्युदूर्ध्वादिवाक्यविहितानां कर्मणां समुदायो ऽस्त्येकधर्मयोगाभावादित्याशङ्क्याह * ततश्चेति * हवनाघारणरूपैकजातीयैकदेशे पठितत्वलक्षणैकधर्मयोगाख्येन प्रचयेनापादितः समुदायो ऽस्तीत्यर्थः। धात्वर्थसमुदाय-

स्यैव धातुना भावनासमुदायस्यापि प्रत्ययेनानुवाद इति वक्तुम् * तासामित्युक्तम् * रूपवतीनामित्यनेनाघाराग्निहोत्रयोः स्ववाक्ये विहितरूपाभावाद्वाक्यान्तरविहितरूपापेक्षणे च विहिते कर्मणि वाक्यान्तरैस्तदनुवादेन रूपविधिर्वाक्यान्तरविहिते च रूपे सति कर्मविधिरितीतरेतराश्रयापत्तेः कर्मविध्ययोगं सूचयता न हीत्यरूपत्वव्याख्यानार्थं भाष्यं व्याख्यातम्। अनुवादप्रयोजनापेक्षायामग्निहोत्रवाक्ये तावद्यावज्जीवमग्निहोत्रं जुहुयादिति निमित्तचोदनायामग्निहोत्रं जुहुयादिति फलचोदनायां चैकत्वसिद्धिं प्रयोजनमाह * निमित्तेति* पूर्वपक्षे निष्प्रयोजनत्वदोषं परिहृत्य प्रत्युतान्याय्यविकल्पपरिहारो गुण एव स्यादित्याह * एवं चेति * नन्वाघारकर्मणो द्रव्यदेवतान्वयेन यागरूपतायास्तत्प्रख्याधिकरणेऽभिहितत्वाद्यागरूपस्य च द्रव्यदेवतस्याघारवाक्यवदूर्ध्वादिवाक्येऽप्यश्रुतेररूपता तुल्येत्याशङ्क्याह * तथेति * आघारवाक्येष्वनुवादप्रयोजनमाह * तस्यापीति * ४९।१।६

संज्ञोपबन्धात् ॥ १४ ॥

संज्ञोपबन्धश्चेति सूत्रव्याख्यानार्थं भाष्यं व्याचष्टे * अपि चेति* असौ संज्ञाप्रतिपाद्यो विशेषोऽस्य जुहोत्याघारयाति वाक्यस्य कर्मणः क इति रूपं विना न निर्द्धार्यतइत्यर्थः। नन्विति भाष्येणाघाराग्निहोत्रसंज्ञाया यौगिकत्वेनोद्भिदादिवत्संज्ञयैव कर्मविशेषो विज्ञायतइत्याशङ्क्य यदीत्यनेनोद्भित्संज्ञया पश्वनुत्पादककर्मव्यावृत्तेरातिदेशिकद्रव्यदेवतलाभाच्च पश्वुत्पादकचित्रादिव्यावृत्तेर्विशेषज्ञानसम्भवेऽप्यत्र व्यवस्थितप्रकृत्यलाभेनातिदेशायोगाद्दध्यादिवाक्येषु च शुद्धगुणविध्ययोगेनोपदेशतोऽपि द्रव्यदेवताऽलाभात्संज्ञया नाघारयागाहवनरूपकर्मव्यावृत्तावप्याघारणहवनरूपकर्मान्तराव्यावृत्तेर्विशेषज्ञानासम्भवेनाघारणहवनसामान्ययोरेव संज्ञित्वापत्तेस्तयोश्च दध्यादिवाक्यविहितविशेषान्तर्गतत्वेन ज्ञातपूर्वत्वादनुवादतैव स्यादिति परिहृतं तद्व्याचष्टे * सामान्यमिति * आघाराग्निहोत्रसंज्ञयोर्यौगिकत्वेऽप्याघारणहवनसामान्यं प्रतिपाद्यं स्यादिदं चान्यत एव ज्ञातत्वान्न क्रियान्तरवद्विधानार्हमिति वत्यर्थकल्पनया योज्यम्। अथेति भाष्येण विधिस्वभावादेव विधेयान्तरव्यावृत्तकर्मविशेषप्रतिपत्तेरयौगिक्यामपि संज्ञायां विशेषज्ञानं सेत्स्यतीत्याशङ्क्य तथापीत्यनेन विधिस्वभावाद्विधेयान्तरव्यावृत्तिप्रतीतावपि नञ्योगशून्यायाः संज्ञाया व्यावृत्तिवाचित्वाभावात्तिष्ठतेरपि गतिनि-

वृत्तिवाचित्वे सत्युपवेशनादावपि प्रयोगापत्तेरुर्ध्वत्वोपलक्षणार्थत्वेन गतिनिवृत्त्यर्थत्वस्मृतेर्व्याख्येयत्वाच्छुद्धयोश्चाघारणहवनयोः सामन्यरूपत्वेनाविधेयतया विधानार्थं वाच्यत्वानर्हत्वाद्विधेयत्वेन च वाच्यत्वार्हस्य विशेषस्य रूपं विनानवगतत्वेनापूर्वविशेषविधिर्युज्येतेति परिहृतं तद्व्याचष्टे * तदज्ञेयतयेति * तस्य विधानार्हस्यापूर्वस्य क्रियान्तरस्यान्यत्र दध्यादिवाक्येषु विधिर्युज्यते न त्वाघाराग्निहोत्रवाक्ययोस्तत्र रूपाभावेनाज्ञेयत्वादित्यध्याहारेण योजना नाज्ञेति तु पाठः सुगम एव द्वितीयान्तसत्संज्ञोपबन्धादित्येवमन्यथा सूत्रव्याख्यानार्थमपि चेति भाष्यं व्याचष्टे * क्रियाश्चेति * कारकवाचित्वेन साधनशब्दव्याख्यानाया * कारकत्वेनेत्युक्तम् * उक्तशब्देनानुवादेति भाष्यं व्याख्यातं श्लोकं व्याचष्टे * आघारमिति * समुदायस्य समुदायिभ्यो ऽत्यन्तभेदाभावे ऽपि साध्यत्वोपपत्तिर्दृष्टान्तेनोक्ता ननु सामान्यशब्दोक्ताया भावनातो विशेषशब्दोक्तस्य धात्वर्थस्य व्यापाररूपत्वेनाभेदवद्भाव्याभाव्यनिष्ठत्वेन भेदस्यापि भावाद्युक्तं कर्मत्वं समुदायस्य तु समुदायिभ्यः कथं चिदपि भेदाभावात्कथं कर्मतेत्याशङ्कते * ननु चेति * समुदायिभ्यः समुदायस्य भेदाभावे ऽपि समुदायिनामेव प्रत्येकरूपासामस्त्यरूपस्य भेदात्तस्यैव च समुदायशब्दवाच्यत्वादेकधर्मान्वयाख्यप्रचयद्वारा च प्रत्येकरूपैः साध्यत्वात्कर्मत्वोपपत्तिरिति क्रियाणामिति भाष्यसूचितं परिहारमाह * नेति * समुदायस्यावयवभूतानां क्रियाणां प्रचयेन साध्यत्वाद्यायुक्ता कर्मतेत्यर्थः एतदेव विवृणोति * समस्ताभ्यो हीति * नन्वाघाराग्निहोत्रशब्दयोः पौर्णमास्यमावास्याशब्दन्यायेन प्रत्येकरूपवाचित्वावधारणात्प्रत्येकरूपस्यैव कर्मत्वं वाच्यम् । तच्च विरुद्धमित्याशङ्कते * ननु चेति * अवाच्यस्यापि सामस्त्यरूपस्य लक्षणयावगतेः । कर्मत्वं भविष्यतीति परिहरति * नैष इति * ननु विधावप्योदनपाकं पचतीतिवद्भावनाधात्वर्थलक्षणसामान्यविशेषभेदेनापि क्रियाकर्मत्वोपपत्तेर्न कर्मत्वनिर्देशो ऽनुवादत्वहेतुरित्याशङ्क्याह * न चेति * जुहोत्याघारयतिसामानाधिकरण्यं विनाग्निहोत्राघारशब्दयोर्धात्वर्थवाचित्वानवगतेर्जुहोत्याघारयत्योश्च पाकमितिवद्भावनाख्यसामान्यशब्दादाख्यातप्रत्ययाद्भेदेनानुपादानाद्धात्वर्थस्य कर्मत्वं यद्भवतो ऽभिमतं तन्न सम्भवतीत्यर्थः । ननु तत्प्रख्याधिकरणे सामाधिकरण्यं च साध्यांशेनेह कर्मण इति वार्त्तिके जुहोत्याघारयत्यर्थयोः शब्दभेदानुपादाने ऽपि साध्यत्वस्योक्तत्वात् द्वितीया-

न्तसञ्ज्ञोपबन्धस्य पूर्वपक्षहेतुमात्रत्वप्रतीतेः किमाम्नातिनिर्बन्धेने-त्याशङ्क्याह * एतादिति * पौर्णमासीसिद्धान्तौपयिकत्वान्निर्बन्ध इत्याशयः । भाष्यकृता तु धात्वर्थस्य भाव्यनिष्ठत्वाभावेन करोत्य-र्थक्रियात्वाभावादकारकत्वे च क्रियारूपया भावनयानन्वयापत्ते-र्विधिसामर्थ्याच्च करणत्वावगमे ऽपि कर्तृव्यापारव्याप्यत्वं विना करणत्वायोगेनार्थाद्व्याप्यरूपकर्मत्वप्रतीतेर्विधिपक्षे ऽपि द्वितीया-न्तसञ्ज्ञोपबन्धोपपत्तेरेतद्व्याख्यानादरेणाद्यैव व्याख्या य एवं वि-द्वान्पौर्णमासीसञ्ज्ञकं यागं यजतइत्यादिना पौर्णमासी सिद्धान्ते योजिता द्विविधमपि सूत्रार्थमुपसंहरति * तस्मादिति *

अप्रकृतत्वाच्च ॥ १५ ॥

न च प्रकृतमपीति भाष्येणैतत्सूत्रमाघारे प्राकरणिकाद्वाक्या-न्तरादपि रूपानवगतेररूपत्वोपपादनार्थतया व्याख्यातमित्याभा-ति तत्प्रख्याधिकरणे वाक्यान्तरतो द्रव्यदेवतालाभस्योक्तत्वादला-भे वोर्ध्वादिवाक्यैरप्याघार्यद्रव्यं विनाघारणविध्ययोगापत्तेरयुक्तं मत्वा स्वयमाघाराग्निहोत्रवाक्ययोररूपत्वे ऽपि वाक्यान्तरेभ्यो रू-पावगतेर्विधेयत्वोपपत्तिशङ्कानिराकर्तुमेतत्सूत्रमिति वक्तुमाशङ्कां तावदाह * अथेति * तत्र वाक्यान्तरविहिते रूपे सति कर्मवि-धिः कर्मणि च विहिते सति तत्र रूपविधिरितीतरेतराश्रयं शब्दा-र्थस्य प्रयोगभूतत्वादिति सिद्धान्तसूत्रावयवेन परिहरिष्यमाणत्वा-दनुपन्यस्य दृष्टान्तवैषम्येण परिहारमाह * नेति * न चोर्ध्वा-दिवाक्येष्वाघारशब्दो ऽस्तीत्यपि वाक्यसम्बन्धद्रव्यविधावाघारश-ब्दादप्यनुवाद्यविशेषाप्रतीतेर्वक्ष्यमाणत्वान्नोक्तम् । अनेन च तण्डुला-दिवाक्येन प्रकृताग्निहोत्रशब्दाभावादित्येवं सूत्रं योजितम् । ननु यथा व्रीहिभिर्यजेतेत्यादौ दर्शपूर्णमासशब्दाभावे ऽपि प्रकरणाद्यजेस्तद्विष-यत्वावधारणं तथेह जुहोतेरग्निहोत्रविषयत्वावधारणं भविष्यती-त्याशङ्कते * ननु चेति * प्रकृतिशब्दाभावे व्युत्पाद्यावुत्पत्तिवाक्ये प्रकरणाभावादित्येवमेतच्छङ्कानिरासे ऽप्येतत्सूत्रमवतारणपूर्वं यो-जयति * अत इति * उत्पत्तिवाक्ये ऽपि सामान्यफलकरणत्व-प्रतीतेरितिकर्तव्यताकाङ्क्षात्मकप्रकरणसद्भावे ऽप्यज्ञातरूपस्य वि-ध्ययोगात्फलकरणत्वप्रतीत्यभावाभिप्रायेणैतदुक्तं प्रयोगवाक्यारू-ढस्यैव तर्हि जुहोत्यर्थस्य फलकरणत्वात्प्रकरणेन द्रव्यदेवतान्वयो ऽस्तीत्यज्ञाताशयः शङ्कते * तत्रेति * स्वाशयं प्रकटयन्परिहरन्ति * तदिति * तण्डुलादिवाक्यविहितानां तु कर्मणां प्रज्ञातरूपत्वा-

त्फलान्वये सति प्रकरणोपपत्तेः प्रकरणेन ग्रहणं युक्तमित्याह *अत इति * नन्वाघारशब्दस्य मन्त्रद्रव्यविध्योर्भावादाघाररूपं ज्ञास्यत-इत्याशङ्कते * नन्विति * विधौ सकलमन्त्रपाठे ऽपि लाघवार्थं वार्त्तिके प्रतीकमात्रग्रहणं धात्वर्थानधिकार्थत्वान्नाघारशब्दो धात्व-र्थं विशेष्टुं शक्नोतीति परिहरति * नेति * एतदेवोपपादयति * तत्रेति * आघारे ऽप्याशङ्कोपन्यासपूर्वकं तन्निरासे ऽपि सूत्रं योजयति * नन्विति * एतदेव विवृणोति *दर्शेति * दर्शपूर्ण-मासप्रकरणपठितानामपि प्रयाजानामवान्तरप्रकरणस्यातिक्रमाधि-करणे व्युत्पादयिष्यमाणत्वादेतदप्यज्ञातरूपाघारविध्ययोगाशयं भा-ष्यमप्यस्मिन्नर्थे योज्यम्।कथं भावात्मकप्रकरणाभावे ऽप्यधिकारल-क्षणसान्निध्यात्मकात्प्रकरणाद्विशेषावगतिरित्याशङ्कोपन्यासपूर्वं त-न्निरासे ऽपि नास्ति प्रकृतमस्येति विग्रहस्थषष्ठ्युक्तस्य सम्बन्धस्य नञा वयं प्रकृतमेवेति च प्रकृतशब्दो ऽवधारणमभिप्रेत्यैतत्सूत्रं यो-जयति * सन्निधेरिति * स्रौवाघारस्याप्याघारयतिनानुवादोप-पत्तेरित्याशयः । तण्डुलादेरपि वाक्यबलीयस्त्वेनाप्रकृतहोमान्व-यसूचनार्थं बहुवचनम् । नन्वेवं सति पूर्वपक्षे ऽप्युदूर्ध्वत्वतण्डुलादेः स्रौवाघारजयाहोमादिभिरप्यन्वयः स्यादित्याशङ्क्याह * तदिति * ज्ञातरूपाणां फलान्वयेन कथम्भावात्मकप्रकरणोपपत्तेस्तस्य चापू-र्वसाधनत्वलक्षणार्थं वाक्येनापेक्षितत्वेनाविरोधादबाधः सिद्धान्ते त्वज्ञातरूपयोराघाराग्निहोत्रवाक्योत्पादितयोः कर्मणोः फले वि-धानाशक्तेः कथं भावात्मकप्रकरणायोगादधिकारात्मकस्य च प्रक-रणस्य वाक्येनानपेक्षणाद्विरोध इत्याशयः । तत्राधिकारात्मकस्य प्रकरणस्य वाक्यविरोधे सत्येवं वक्ष्यमाणप्रकारेणाविरोध इति तत्र शब्दार्थे तच्छब्दो योज्यः । नन्वेवमपि द्रव्यविशिष्टकर्मवाक्ये देव-ताभावाद्देवताविशिष्टकर्मवाक्ये च द्रव्याभावादूर्ध्वादिवाक्ये वो-भयाभावात्कर्मान्तरगुणस्य च कर्मान्तरे ऽनन्वयादेकेन च होमा-निष्पत्तेर्द्रव्यं च बिनोदूर्ध्वत्वादिमात्रेणाघारानिष्पत्तेर्न विधिर्निवह-तीत्याशङ्क्याह * यत्र चेति * अन्येनापि रूपेण कर्मान्तरा-द्व्यावृत्तेः कर्मणि विहिते येन विना कर्मानिष्पत्तिस्तत्कर्मान्तरगत-मन्यथानुपपत्त्या कल्प्यतइत्यर्थः । कश्चिदित्यनेनाद्रव्यं देवतस्या-प्यूर्द्धत्वादेः कर्मरूपत्वे द्रव्यदेवतादविशेष उक्तः । एवं च यद्यूदूर्ध्व-त्वादिवाक्येष्वपि न किञ्चिद्रूपं स्यात्ततो विशेषाग्रहणेनेतरयोरपि विधित्वं स्यान्न त्वेतदस्तीत्याह * सर्वेषु चेति * तस्मादिति पूर्वप-क्षोपसंहारभाष्यम् * तस्मादिति *

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्सन्निधेर्गुणार्थेन पुनः श्रुतिः ॥ १६ ॥

दध्नचूर्द्धादिवाक्यानां कर्मविधित्वानभ्युपगमाद्भाष्यस्थकर्मान्तरोक्त्यनुपपत्तिमाशङ्क्याभ्युपेत्यवादेन स्रौवाघारचतुर्होतृहोमाद्यपेक्षया वा समाधत्ते * कर्मेति * कुत इत्यादिना रूपवन्तौ विधीयेते इत्यन्तेन भाष्येण वाक्यान्तरविहितरूपापेक्षणे ऽन्योन्याश्रयापत्तेः स्ववाक्याज्ञातरूपकर्मविध्ययोगस्यारूपत्वादित्यनेनोक्तस्याप्रवृत्तप्रवर्त्तनात्मकविधिस्वभावादेव विध्यन्तराविषयभूतकर्मान्तरव्यावृत्तविधानार्हकर्मप्रतीतेर्वाक्यान्तरावगतरूपवत्तया चानुष्ठानार्हत्वाद्विधिनिर्वाहोपपत्तेः। स्ववाक्याज्ञातरूपस्यापि कर्मणो विधिसम्भवाद्विधिनिर्वाहार्थं वाक्यान्तरविहितरूपापेक्षणे ऽपि विधिप्रवृत्तावनपेक्षणान्नेतराश्रयमित्येवं परिहारार्थतया विधिशब्दार्थस्य प्रयोगे ऽनुष्ठाने भूतत्वाद्वर्त्तमानत्वाद्व्याप्रियमाणत्वादनुष्ठापकरूपत्वादन्यतः प्राप्ते चानुष्ठाने ऽनुष्ठापनानर्थक्याद्रूपं विनापि कर्मान्तरं विधेयं प्रतीयते तच्च वाक्यान्तरतो रूपावगत्या निर्वहतीत्येवं सूत्रावयवो व्याख्यातः तदन्तर्गतेन चाघारेत्यनेनाविज्ञातार्थावित्यन्तेन हवनाघारणयोर्विधिविषयसमानयोस्तदेकीभूतयोः विधिविषयभूतयोरेव संज्ञाविषयत्वात्संज्ञोपबन्धोपपादनार्थतया ऽघाराग्निहोत्रशब्दार्थस्य प्रयोज्यात्मभूतत्वादित्येवं व्याख्यातस्तत्र द्वितीयव्याख्यानार्थं भाष्यं जुहोत्याघारयति * लक्षितेति * वार्त्तिकेन व्याख्यास्यमानत्वादुपेक्ष्य शेषं सङ्क्षेपतो व्याचष्टे * आघारयतीति * यदुक्तमिति भाष्येण पूर्वेभ्यो होमाघारेभ्य इति पूर्वपक्षभाष्यावयवसूचितमर्थमनुभाष्य नैतदित्यादिना वाक्यार्थौ यस्तं विधातुमित्यन्तेन तन्निरासार्थतया तत्सन्निधेर्गुणार्थेन पुनःश्रुतिरिति सूत्रावयवो व्याख्यातस्तत्र तस्मान्नानुवादाविति भाष्यं तावत्तात्पर्यतो व्याचष्टे * न चेति * नन्विति भाष्येणोपपदश्रवणाद्दध्यादिवाक्यानां शुद्धहोमाघारविध्यशक्तावपि होमाघारसम्बन्धितया दध्यूर्ध्वादिविध्यभ्युपगमात्सम्बन्धस्य च सम्बन्धिद्वयनिष्ठत्वात्प्रतिसम्बन्धिभ्यां होमाघाराभ्यां विनानुपपत्तेरर्थापत्त्या तयोरपि प्राप्तिराघाराग्निहोत्रवाक्ययोरनुवादत्वं भविष्यतीत्याशङ्क्य नैतदेवमित्यनेन ब्रूम इत्यनेन निरस्तं तत्तात्पर्यतस्तावद्व्याचष्टे * न ह्येदिति * भाष्यस्थस्य सम्बन्धशब्दस्य विशिष्टवाचित्वं शङ्कायाश्च

४९४।१

विशिष्टविधानाशयत्वं तन्निरासार्थत्वं चोत्तरस्यानेनोक्तम् अत्रैवाव-तारणापूर्वमस्मि हीति भाष्यावयवमध्याहारेण द्वेधा योजयति * त-दिति * अस्मिन्नाघाराग्निहोत्रवाक्यस्थे प्रत्यक्षे कर्मविधाने सति न सम्बन्धो ऽर्थादापादक इत्याद्या योजना अस्मिन्सम्बन्धे विध्य-र्थाक्षेप्ये होमाघाराख्यसम्बन्धिविधौ प्रत्यक्षे सति सम्बन्धाख्यगुणवि-धानेन सम्बन्धमात्रं विधीयतइति द्वितीयासम्बन्धशब्देनास्मिन् पक्षे सम्बन्ध एवोक्त इति गुणशब्देनोक्तं तस्मादित्याशङ्कानिरासोपसं-हारभाष्यं व्याचष्टे * तस्मादिति * नन्वाघारयतीति भाष्येण श्रुत्या धात्वर्थावच्छिन्नभावनाविधिप्रतीतेर्न वाक्यीयसम्बन्धविधि-र्युक्त इत्याशङ्क्य सत्यमित्यनेन सम्बन्धस्य पदान्तरान्वयलभ्यत्वेना-श्रौतत्वे ऽपि तच्छब्दपरामृष्टस्य धात्वर्थावच्छिन्नभावनाख्यस्य क-र्मणः सन्निहिताघाराग्निहोत्रविधिप्राप्तत्वेनोदूर्ध्वादिवाक्यैरविधेय-त्वाद्वाक्यीयगुणविध्यर्थं कर्मश्रवणं न कर्मविध्यर्थमिति तन्निरासार्थ-त्वेन सूत्रावयवो व्याख्यातस्तद्द्वयमेतच्छङ्कापरिहाराशयप्रपञ्चा-र्थैरुत्तरभाष्यैरेव व्याख्यास्यमानत्वान्न व्याख्यातम्।ननु पदान्तरेत्या-शङ्काशयविवरणार्थं भाष्यं व्याचष्टे * भावनेति * सत्यमेवमिति परिहाराशयविवरणार्थं भाष्यं व्याचष्टे * सत्यमिति * भावना-मध्यशब्देन तं व्यापारशब्दोक्तभावनाविशेषणभूतं स्वपदार्थं धात्वर्थं गुणशब्दो विशेष्यतीति गुणस्य भावनाद्वारधात्वर्थविशेषणत्वाभि-धानेन भावनाविशेषणतैवोक्तेति सूचितम्।ननु गुणविधावपि भाव-नातो विध्यनुच्चारणे कर्मानुवादेन गुणविध्युद्घोषो विरुध्येतेत्याश-ङ्क्याह * तेनेति * येन कारणेनोदूर्ध्वादिवाक्येष्वपि स्वपदार्थं धात्वर्थगतव्यापारं भावनां वक्ष्यतीत्युक्तं तेन कारणेन सर्व-त्रैवैतद्वक्ष्यमाणमुपादिष्टं भवतीत्यर्थः । शास्त्राभिव्यक्तिरिती-तिकरणाध्याहारेणोत्तरग्रन्थान्वयः विशिष्टविधेः सार्वत्रिक-त्वे ऽपि तात्पर्याभिप्रायः । कर्मानुवादेन गुणविध्युद्घोष इ-त्याशयः । नन्वेवमपि व्याख्यातॄणामष्टप्रकारश्रुत्युद्घोषो विरुध्येते-त्याशङ्क्य भ्रान्तिमूलत्वं तदुद्घोषस्याह *तत्रेति* आत्मना यथा भ्रा-न्तिरुत्पन्ना तथान्येषामप्युत्पादयितुमित्युपहासः किलेति भ्रान्तित्वं सूचितम् । भ्रान्तित्वोपपादनायाष्टावपि प्रकारान्परदौर्बल्यनियमं च दूषयन् शुद्धधात्वर्थविधिरूपं प्रथमं प्रकारं तावत्सोदाहरणानु-भाषणपूर्वं दूषयति * तत्र तावदिति * कस्मादयुक्तमित्यपेक्षाया-मेकाभिधानश्रुत्या भावनान्वयस्य प्रागवगमादिति हेतुमाह * न हीति * भावनानिरपेक्षस्य धात्वर्थस्य पुम्प्रवृत्त्यविषयत्वादप्याविधेय-

तेत्याह * न चेति * एतदेवोपपादयति * सा हीति * देहाश्रितस्यापि विष्णुक्रमादेरात्माश्रितस्यापि च यागादेः प्रयत्नरूपभावनां विना प्रवृत्त्यविषयतापिशब्देन सूचिता किं च भावनावद्धात्वर्थस्यानुष्ठेयनिष्पाद्यापरपर्यायसाध्यत्वेन विधानस्य अन्यदेव हि यागादौ सामान्यं करणात्मकम्। अन्यच्च भावनानाम साध्यत्वेन व्यवस्थितमिति वार्त्तिके निरस्तत्वाद्ध्यादितत्करणत्वेनैव विधानावगतेः करणत्वस्य च क्रियारूपभावनान्वयनिबन्धनत्वान्न तां विनां विधेयत्वोपपत्तिरित्याशयेनाह * इदं चेति * ननूत्पत्तिवाक्ये साध्यत्वेनापि हि विहितस्य किमर्थमपुरुषार्थरूपो धात्वर्थः साध्य इत्यपेक्षायां फलवाक्ये करणत्वेन विधानात्फलवत्त्वोपपत्तेर्नोत्पत्तिवाक्ये करणत्वेन विधिरित्याशङ्क्याह * न हीति * धात्वर्थस्य साध्यत्वेन विधौ पुरुषस्य किमर्थमित्यपेक्षायामपि विधेयस्य करणत्वानवगतेः साध्यानपेक्षत्वात्पदार्थापेक्षां च विना पदार्थान्तरान्वयायोगात्फलवाक्ये ऽपि करणत्वेन विधिर्न सम्भवतीत्युक्ते ननु भावनावत्करणत्वाभावे ऽपि साध्यापेक्षा भविष्यतीत्याशङ्क्य*असावित्युक्तम्। भावनायाः करोत्यर्थरूपत्वेन नित्यं कर्मापरपर्यायसाध्यापेक्षत्वे ऽपि धात्वर्थस्य करोत्यर्थत्वान्न करणत्वं विना साध्यापेक्षत्याशयः। विशिष्टधात्वर्थविधिरूपं द्वितीयं प्रकारं दूषयति * सोमेनेति * तद्भूतानां क्रियार्थेन समाम्नाय इत्यनेन न्यायेन धात्वर्थस्य कारकाणां च परस्परान्वयमपेक्ष्य भावनयान्वितानां पश्चाद्धात्वर्थस्यानिष्पन्नस्य करणत्वायोगात्कारकैश्च विना तदनिष्पत्तेः कारकापेक्षायां कारकाणां च सिद्धरूपत्वेन व्यापाररूपधात्वर्थनिष्पादनं विना साक्षाद्भावनान्वयायोगाद्धात्वर्थापेक्षायामरुणैकहायनीन्यायेनान्योन्यनियमान्न भावनाविधिनिरपेक्षो गुणाविशिष्टधात्वर्थविधिर्युक्त इत्याशयः। सप्तमनवमाद्ययोश्च यजेतेत्यर्थमितीति कर्त्तव्यतायां धात्वर्थान्वयनिरासेनेत्थं कुर्यादिति भावनान्वयस्य भाष्यकृता वक्ष्यमाणत्वाद् गुणानां धात्वर्थविशेषणत्वानुपपत्तेर्न तद्विशिष्टधात्वर्थविधिरित्याह * तथा चेति * गुणान्वये च धात्वर्थस्य वैरूप्यं स्यादित्याह * भावनां चेति * धात्वर्थस्यान्यत्र विधिरूपं तृतीयं प्रकारं दूषयति * तथेति * भावनायां तु धात्वर्थस्य कारकाणां वा विधेः सर्वत्राविशेषात्तदभिप्रायान्यशब्दव्याख्या न युक्तेत्याह * यदि त्विति * अन्योद्देशेन च शुद्धधात्वर्थविधानस्य तन्निरपेक्षशुद्धधात्वर्थविधानात्पदान्तरापेक्षानिमित्तविप्रकर्षेण दौर्बल्ये ऽपि अन्योद्देशनिरपेक्षविशिष्टधात्वर्थविधाने ऽपि

विप्रकर्षसाम्यात्ततो दौर्बल्यानुपपत्तेः प्रत्युताश्रुतविशेषणविधिक-ल्पनाभावेन ततो बलीयस्त्वाद् द्वितीयस्थाननिवेशापत्तेस्तृतीयस्थान-निवेशो न युक्त इत्याह * न चेति * अन्योद्देशेन विशिष्टधात्वर्थ-विधिरूपं चतुर्थं प्रकारं द्वितीयतृतीयपक्षोक्तदोषापादनेन दूषयति * पक्षेति * धात्वर्थे ऽन्यविधिरूपं पञ्चमप्रकारं दूषयति * दध्ने-ति * तृतीयानिर्दिष्टस्यापि दध्नो विधेयत्वेनानुष्ठानाविषयत्वाद्वि-धेर्दध्यनुष्ठेयमित्यभिप्रेत्यानुष्ठानार्थकरोतिप्रयोगोपपत्तेस्तत्र जयान् जु-हुयादितिवच्च प्राधान्यविवक्षयापि सप्तमीप्रयोगोपपत्तेर्होमाधिकरण-दध्यधिकर्त्तव्यत्वस्य परानभिप्रेतत्वे ऽपि दधिहोमे करोतीति परोक्ताया वचनव्यक्तेरञ्जसैषो ऽर्थः प्रतिभातीत्यारोप्याच्छलेनेदं दूषणद्वयमुक्तं सप्तम्यश्रुतेर्न शब्दाद्धोमस्याधिकरणत्वं स्थालीवच्च पतनप्रतिबन्ध-कत्वाभावान्नार्थरूपेण दध्नश्च तृतीयाश्रुतेर्भूतभव्यसमुच्चारणन्या-येन करणत्वावगमात्कर्मत्वरूपा कर्त्तव्यता न युक्तेत्यर्थः । यथा चा-न्यत्र शुद्धधात्वर्थविधिश्रुतिर्विशिष्टविधानाद् बलीयसी तथा धात्व-र्थे ऽन्याविधिश्रुतिरपीति पञ्चमस्थाननिवेशो ऽस्या न युक्त इत्याह*इ-यमपि चेति * अन्यत्र शुद्धधात्वर्थविधेरपि द्विविधविशिष्टविध्यपे-क्षया बलीयस्त्वसूचनार्थश्चकारः हेतुमाह * एकेति * नन्वियं पदान्तरार्थविधिविषयत्वेन विप्रकृष्टार्थत्वार्थे दुर्बलेत्याशङ्क्याह * उभयेति * विशिष्टविधावपि विशेषणभूतपदार्थान्तरविधिरित्या-शयः । दध्ना जुहोतीत्यत्र च सन्निकृष्टार्थविध्यसम्भवकृतत्वाद्वि-प्रकृष्टार्थग्रहणं न दोषायेत्याह * सन्निकृष्टेति * प्रकृतश्रुतिविधे-यदधिपरामर्शार्थो ऽस्य शब्दः तत्र तु विशिष्टविधावुभयोर्विशेषणा-विशेष्ययोर्विध्याश्रयणात्सन्निकृष्टविद्ध्यर्थे तत्सम्भवो विप्रकृष्टवि-ध्यर्थे चासम्भवो ऽभ्युपगन्तव्य इति युगपद्विरुद्धसम्भवासम्भवा-पत्तिरित्याह * तत्रेति * सन्निकृष्टासम्भवकृतत्वाद्विप्रकृष्टग्रहण-स्योभयाश्रयणे सम्भवासम्भवविरोधापत्तिरित्येकग्रन्थतया वा विशि-ष्टविधिदौर्बल्याभिधानार्थतयैतद्योज्यम् ।नन्वेवं सति न क्वचिद्विशिष्ट-विधिराश्रीयेतेत्याशङ्क्याह * अगत्यैवेति * विशिष्टविधिरित्यध्या-हारः ।यद्यपि च श्रौतेन विधिना सन्निकृष्टविधानात्कालेन च वि-प्रकृष्टार्थविधानात्कालभेदेन विप्रतिषेधपरिहारोपपत्तेरन्योद्देशानि-रपेक्षविशिष्टविधेरियं विप्रकृष्टार्थविषयत्वात् गुर्वी तथाप्यन्यत्र वि-शिष्टविधानात्पदान्तरापेक्षानिमित्तविप्रकर्षस्योभयत्र सद्भावेनावि-शेषाद् गुर्वी न भवत्येवेत्याह * अन्यत्रेति * तदेव त्वतिगुर्वीति सू-चनार्थो ऽतिशब्दः प्रकृतमुपसंहरतीति क तर्हि निवेशयितव्येत्यपेक्षा-

थामाह * काममिति * श्रुतिलिङ्गादिवदासां पूर्वपूर्वानपेक्षत्वान्न क्रमोपन्यासेन प्रयोजनं यदि त्ववश्यं क्रमेणोपन्यस्तव्या स्ततो वरमेवं क्रम इति * काममित्यनेनोक्तम * धात्वर्थे ऽन्यसम्बन्धविधिरूपं षष्ठं प्रकारं दूषयति* यत्त्विति*किं यद्ददातीति दानमात्रमनूद्य तत्र प्राकाशावध्वर्यवे इत्यानन्तर्यावगतः प्रदीपाध्वर्युसम्बन्धो विधीयते उताध्वर्यवे यद्ददातीति क्रियाकारकान्वये क्रियाप्राधान्यविवक्षया- ध्वर्युविशिष्टं दानमनूद्य तस्य प्रदीपसम्बन्धे विधीयमाने ऽर्पीमाश्चा- दिष्टदक्षिणा इति स्मृतेः।प्राकाशशब्दवाच्ययोः प्रदीपयोर्दानसम्बन्ध- स्य प्रदानत्वादानर्थक्यतदङ्गन्यायेन विशेषणे ऽवतराद्विशेषणभूत- स्याध्वर्योः प्रदीपसम्बन्धविधिर्विधेयसम्बन्धित्वेन वाध्वर्योरेव प्रा- धान्यविवक्षायां दानविशिष्टमध्वर्युमनूद्य तस्य प्रदीपसम्बन्धविधिर्द- द्वात्यविवक्षया वा शुद्धाध्वर्य्वनुवादेन प्रदीपसम्बन्धविधिरिति वच- नव्यक्तीनां मध्ये कया धात्वर्थे ऽन्यसम्बन्धविधिरित्यशक्यं विवेक्तुमि- त्यर्थः । एतदेवोत्तरेण प्रपञ्चेन विवृणोति * सर्वत्र हीति * सम- स्ताग्रा ज्योतिष्टोमिक्या दक्षिणाया अश्वमेधेति देशप्राप्तायाः प्राकाश- दशमाधिकरणे ऽध्वर्युभागमात्रविकारत्वाभिधानेन निवेश्यमानः प्र- सज्येतेत्यर्थः।द्विष्ठत्वाच्च सम्बन्धस्याध्वर्य्वाख्यसम्बन्धिप्राप्तावपि प्रा- काशाख्यसम्बन्ध्यप्राप्तौ विधातुमशक्यत्वात्प्राकाशयोरपि विध्या- पत्तेर्वाक्यभेदः स्यादित्याह * प्रत्ययस्य चेति * ननु सम्बन्धवि- धिनैवार्थाक्षेपान्न वाक्यभेदापत्तिरित्याशङ्क्याह * सम्बन्धो हीति* एवमप्यर्थाक्षेपगौरवं तावदेको दोषः धात्वर्थाङ्गत्वेन चार्थाक्षेपल- भ्यस्यापि सम्बन्धिनो विधेयत्वात्प्रत्ययावृत्तिस्तदवस्थेत्याशयः । ननु सम्बन्धिविशिष्टस्यैव सम्बन्धस्य धात्वर्थाङ्गत्वात् विशेषणस्य चाङ्गत्वं विना विशिष्टस्याङ्गत्वासिद्धेः सम्बन्धिनो ऽपि धात्वर्थाङ्ग- तार्थादेव लप्स्यते अतः सम्बन्धिनो धात्वर्थानङ्गत्वं वदता सम्बन्धस्यापि वाच्यं न च तद्वक्तुं शक्यम् । धात्वर्थानुरक्तेन प्रत्य- येन सम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वावगतेरित्याशङ्कते * तत्रेति* धात्वर्थानुरक्तेन प्रत्ययेन विधानाद्धात्वर्थाङ्गत्वे च दध्ना जुहोतीत्य- स्याः सम्बन्धविधित्वाभावाद्भेदोपादानार्थवत्त्वे ऽपि वायव्येन्द्रिय- श्रुत्योः प्राकाशश्रुतिवत्सम्बन्धविधित्वाभ्युपगमाद्भेदोपादानानर्थक्यं दोषमाह * एवं तर्हीति * ननु वायव्यश्रुतावेव धात्वर्थस्य प्रकृति- द्योतनार्थे विधायकप्रत्ययानुरञ्जकत्वं युक्तमिन्द्रियश्रुतौ त्वविवक्षि- तत्वान्न प्रत्ययानुरञ्जकतेत्याशङ्क्याह * न हीति * प्रकृतिप्रत्यययोः पौर्वापर्यनियमाच्छुद्धप्रत्ययार्थानुपलब्धेर्धात्वर्थस्यानुरञ्जकता सर्वत्रा-

विशिष्टेत्याशयः । वायव्यश्रुत्युपन्यासो दृष्टान्तार्थः । नन्विन्द्रियश्रुतौ बलादापतितस्याप्यनुरञ्जकत्वस्यानुपकारित्वेन त्यागान्नानुरञ्जकतत्याशङ्क्य वायव्यवाक्ये ऽपि तर्हि धात्वर्थानपेक्षाद्धातुमात्रादालभतिचोदिताग्नीषोमीयपशुयागप्रकृतिद्योतनासिद्धेर्ददात्यर्थस्य चाध्वर्युप्राकाशसम्बन्धापादकत्ववदालभत्यर्थस्य द्रव्यदेवतासम्बन्धानापादकत्वेन विधायकप्रत्ययोपकारित्वाभावान्नानुरञ्जकत्वं स्यादित्याह * प्रकृतीति * लिङ्गशब्दो भावव्युत्पत्त्या द्योतनाख्यलिङ्गनवाची उपकारिणो ऽपि धातोरनुरञ्जकत्वानपेक्षणाद्धात्वर्थस्यानुरञ्जकता दूरोत्सारितेति सूचनायात्मशब्दः । ननु क्रियागर्भत्वात्सम्बन्धस्य धात्वर्थं विना द्रव्यदेवतसम्बन्धानिष्पत्तेर्धात्वर्थान्तरवाचिशब्दाश्रवणाच्च विधेयसम्बन्धापादनेनात्मनो विधायकस्योपकरिष्यतीत्याशङ्क्याह * न चेति * यदि च श्वेतवाय्वोः सम्बन्धः कार्यः सचालम्भाति द्वारेति विधीयेत न ततो वाक्यभेदः स्याद्विधेयापादकविधावपि त्ववाक्यभेदे गुणफलसम्बन्धापादकाश्रयाश्रयिसम्बन्धविधावप्यवाक्यभेदापत्तेरिन्द्रियवाक्ये ऽपि धात्वर्थत्यागोक्तिरयुक्ता स्यादित्याह * यदि चेति * विनापि त्वाश्रयाश्रयिसम्बन्धे गुणफलसम्बन्धोपपत्तौ प्रकरणलभ्याश्रयिसम्बन्धाभ्युपगमो विरुध्येतेत्याह * किमिति वेति * सप्तमाष्टमश्रुतिप्रकारावप्यनेन प्रसङ्गाद् दूषितौ भवतः अतो न धात्वर्थानुरक्तेन प्रत्ययेनान्यसम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वसिद्धिरित्युत्तरश्रुतिप्रकारद्वयदूषणस्य प्रस्तुताशङ्कानिरासार्थत्वं दर्शयितुमाह * तस्मादिति * पञ्चमश्रुतिप्रकारवत्तु धात्वर्थाङ्गत्वसिद्ध्यर्थं दाने प्राकाशाध्वर्युसम्बन्धं करोतीतिवचनव्यक्त्यभ्युपगमे पूर्ववद्धात्वर्थाधिकरणत्वसम्बन्धकर्त्तव्यत्वे आपाद्य निराकार्ये इत्याह * पूर्ववच्चेति * ननु धात्वर्थाङ्गतयेह सम्बन्धस्य विधिरिष्टो न तु धात्वर्थस्याधिकरणतासम्बन्धस्य वा कर्मतेत्याशङ्क्याह * न चेति * दध्नो ऽपि भावनान्वयात्प्राक् धात्वर्थे विधिर्न सम्भवतीत्यपिशब्दार्थः कस्मादित्यपेक्षायामाह * इतीति * यथा भावनान्वयात्प्राक्कस्य चिद्धात्वर्थान्वयो न सम्भवति तथा तद्भूताधिकरणोक्तेन मार्गेणेत्यादिवार्त्तिकेनोक्तमित्यर्थः । यद्ददाति तत्राध्वर्युप्राकाशयोः सम्बन्ध इति वचनव्यक्तिनिरासमुपसंहरति * एवं तावदिति * आध्वर्यवे यद्ददाति तस्य प्राकाशसम्बन्ध इत्यस्यामपि वचनव्यक्तौ दानस्याध्वर्युविशिष्टत्वे ऽध्वर्योर्वा दानविशिष्टत्वे वाक्यभेदः स्यादित्याह * अथेति * यो ऽध्वर्युस्तस्मै प्राकाशा-

विसृस्यां तु वचनव्यक्तौ क्रियागर्भत्वात्सम्बन्धस्य ददातिं विना सम्प्रदानसम्प्रदेयसम्बन्धायोगात्कल्पिते ददातौ सम्बन्धः सम्बन्धाच्च ददातिकल्पनेतीतरेतराश्रयापत्तेर्न धात्वर्थे ऽन्ययोः सम्बन्ध इति वचनस्य श्रुतेर्व्यक्तिः प्रकारः सम्भवतीत्याह * शुद्धेति * ननु सम्प्रदानश्रुत्याक्षिप्ताद्धात्वर्थादेवाध्वर्युप्रकाशयोः सम्बन्धसिद्धेर्धातुकल्पनाभावान्नेतरेतराश्रयापत्तिरित्याशङ्क्य * यद्यपीत्युक्तम् * धात्वर्थस्याशाब्दत्वे ऽन्वयायोगादन्वयसिद्धये ऽवश्यङ्कल्प्यो धातुरित्याशयः। यथा च सोमेन यजेतेति श्रुतियजिसद्भावान्नेन्द्रवायवादिवाक्येष्वन्ययजिकल्पना युक्ता तथेहापि श्रुतददात्यविवक्षयान्यददातिकल्पनायोगान्न शुद्धाध्वर्य्वनुवादोपपत्तिरिति सूचनार्थो दृष्टान्तः दानाध्वर्य्वनुवादेन च तत्सम्बन्धितया प्राकाशविधानेनार्थात्सम्बन्धविधिसिद्धावपि तात्पर्याभावाच्छ्रुतिप्रकारत्वानुपपत्तिरित्याह * अवश्यं चेति * अन्यतराप्राप्तौ सम्बन्धस्याश्रौतत्वे भाष्यकृत्संमतिमाह * वक्ष्यति चेति * यत्र च सम्बन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानं सम्बन्धो नान्तरीयको यद्वा सम्बन्धस्य विधानानान्तरीयकौ सम्बन्धिनाविति तृतीयाधिकरणभाष्ये सम्बन्धविधिर्द्वैविध्यमुक्ता यत्रोभौ लक्षणत्वेन तत्र स्वशब्देन सम्बन्धो विधीयते यत्र त्वन्यतरो लक्षणत्वेन तत्रैकं लक्षयित्वान्यतरो विधीयत इति. विषयोदाहरणभाष्ये प्राग्वक्ष्यमाणमपि प्रकृत्य परिधीन् हारियोजनं जुहोतीत्यादावुभयप्राप्तौ सम्बन्धस्य श्रौतत्वं जाघन्या पत्नीः संयाजयन्तीत्यनभिमतत्वाद्व्यतिरेकप्रदर्शननमाम्नायेति सूचनार्थम् * पश्चादुक्तम् * विधेयान्तराभावेनार्थाक्षेपायोगात् श्रौतत्वासिद्ध्यर्थः केवलशब्दः उभयाप्राप्तौ सम्बन्धिनोः सम्बन्धविधिनान्तरीयकत्वायोगादनुदाहरिष्यमाणाप्युभयाप्राप्तिर्वायव्यं श्वेतमित्यादौ विशिष्टविधिरूपसम्बन्धविधिनान्तरीयकत्वविषयतयानुभयप्राप्तौ वेत्यनेनोदाहृता आख्यातेन च पदार्थान्तरान्वयविधौ बुद्धिविक्षेपस्य श्रुतित्रये ऽपि साम्यान्न बलाबले विशेष इत्याह * तिसृणामिति * ननु सन्निकर्षविप्रकर्षाविशेषे ऽपि धात्वर्थेऽन्यान्वयविधौ धात्वर्थस्याविषयत्वे ऽपि विधेयविषयतया ग्रहणेनानुग्रहाद्धात्वर्थानुरक्ते ननुप्रत्ययेनान्यान्वयविधौ धात्वर्थस्याविधेयत्वे ऽपि विधेयविषयतयाप्यग्रहणात्ततो दौर्बल्यं प्रत्ययारनुरञ्जकत्वेन तु ग्रहणेनात्यन्तत्यागाभावाद्धात्वर्थत्यागेनान्यान्वयविधितो बलीयस्त्वमित्याशङ्क्याह * नापीति * विधेयविषयत्वप्रत्ययानुरञ्जकत्वत्यागानामेकधात्वर्थविषयत्वाभावेनाविरोधान्न बलाबलज्ञानो-

पयोग इत्याशयः। अतः परदौर्बल्याभावक्रमेणोपन्यासः सप्तमाष्टमश्रुत्योश्च षष्ठश्रुत्यन्तर्भावादष्टत्वगणनोपन्यासो ऽनर्थक इत्याह * इतीति * प्रकरणार्थमुपसंहरति * तस्मादिति* पुनःश्रुतिरिति सूत्रावयवेन विहिताया अपि भावनायाः पुनर्विधानाभिधानात्स्वपदार्थगतं वक्ष्यतीति च भाष्यावयवेन स्वपदार्थधात्वर्थगतं भावनाख्यं व्यापारं विधिश्रुतिर्विधास्यतीत्यभिधानात्सर्वत्र विशिष्टभावनाविधिप्रतीतिरधिकरणगतसूत्रभाष्यावयवविवक्षया लाक्षणिको ऽधिकरणशब्दः प्रस्तुतदध्यूर्ध्वादिवाक्यरूपविषयवाची वा। ननु सर्वत्र भावनाविधौ न क्व चिद्विप्रकृष्टार्थविध्यभिधानं युज्येतेत्याशङ्क्याह * यच्चेति * सन्निकृष्टं धात्वर्थस्य भावनाविशेषणत्वं विप्रकृष्टं गुणस्येत्याशयः। स एष इति भाष्यं स्वस्वपदार्थभूतो धात्वर्थ एष भावनाख्यव्यापारविशेषणीभूतः सन् गुणविशिष्टो विधिश्रुत्या प्रत्येष्यते विधास्यत इत्येवं व्याख्यातुमाशङ्कते * कथं पुनरिति * शङ्कानिरा-
४९८।१ सार्थत्वेन भाष्यं व्याचष्टे * विशिष्टेति * ततश्च गुणविधिव्यपदेशो ऽपि फलाभिप्रायेणोपपत्स्यत इत्याह*फलतश्चेति * ननु प्राप्तत्वे ऽपि कर्मणो विशिष्टविधौ सत्यनेकार्थविधिनिमित्तप्रत्ययावृत्त्यभिधानं विरुध्येतेत्याशङ्कते * नन्विति * श्रुतिवृत्त्या विधेः सर्वत्र भावनाविषयत्वे ऽपि प्राप्तायां तस्यामप्राप्तप्रापणाविषयस्वभावत्वाद्विधेस्तात्पर्यवृत्त्या विशेषणत्वात्सकृदुच्चरितस्य चानेकतात्पर्यायोगादपरिहार्या वृत्तिरिति परिहरति* नैष इति * कृदन्तविधिशब्दोत्पन्नेन भावप्रत्ययेन सम्बन्धाभिधानात्तेविधेर्भावनया सह विषयविषयिलक्षणस्य सम्बन्धस्य श्रुतिवृत्त्या सार्वत्रिकत्वे ऽपि तादर्थ्यस्य तात्पर्यापरपर्यायस्य तत्प्रयोजनत्वस्य तत्फलत्वस्याप्राप्तविषयतयाविभक्तत्वाद्व्यवस्थितत्वाद्विशेषणफले विधित्वे ऽनेकविशेषणपरे सत्यपरिहार्यो वाक्यभेद इत्यर्थः। श्लोकं व्याचष्टे * यदा हीति * अर्थाद्विशेषणविधाववाक्यभेदस्यैक्ये उक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते इति पौर्णमास्यधिकरणवार्त्तिकोक्तत्वे ऽपि भाष्यकृतो निर्वृत्तवारवन्तीयको यागो विधीयते ननु वारवन्तीयनिर्वृत्तिरर्थात्तु रेवतीषु वारवन्तीयमभिनिर्वर्त्स्यतीत्यनेन वारवन्तीयाधिकरणे वक्ष्यमाणत्वाद्वक्ष्याम इत्युक्तम् * प्रपूर्वस्य वसेः स्वस्थानात्प्रस्थितस्यान्यत्र वासे प्रयोगाद्भावनातः प्रस्थायापरत्रोषितत्वादित्यर्थः। स्पर्शादेरज्ञानमित्यध्याहारः । ननु योग्यतालक्षणसम्बन्धेन चक्षुषो ग्राहकत्वाच्चक्षुर्ग्राह्यरूपसमानदेशस्यापि स्पर्शादेर्योग्यत्वेनाग्रहणं युक्तं विधेस्तु विशेषणे ऽप्यवतारस्य भावनान्वयमात्रापेक्षत्वाद्भावनाया-

श्च सर्वविशेषणेष्वैक्यान्न व्यवस्था युक्तेत्याशङ्क्याह * सर्वेति * विधित्वस्य यो देशो भावनाख्यः स सर्वेषां विशेषणानां यद्यपि समानस्तथापि भावनातः प्रचलितस्य फलालोचनहेतुकत्वादेकस्य च विधेरनेकफलत्वायोगादेकत्रैव विशेषणे विधित्वं पर्यवसितं चोदिते हि तदर्थत्वादित्यत्र दर्शितमिति फलमालोच्येति ल्यब्लोप-पञ्चम्यर्थे तसिमङ्गीकृत्य व्याख्येयं विधेर्विशेषणेष्ववतारस्य तात्पर्यापेक्षत्वात्तात्पर्यस्य चैकत्रैवोपपत्तेरेकत्रैवावतारो युक्त इत्याशयः । विरोधपरिहारमुपसंहरति * तस्मादिति * ननु विशेषणफलेन विधाने ऽनेकार्थविधौ वाक्यभेददोषे सत्यभ्युदितेष्टिविधावग्न्यादिदेवतातद्गुणदात्रादिरूपानेकार्थविधानात्प्राकाशादिविधिषु प्राकाशादिदेयतत्विशेषणहिरण्यमयत्वादिरूपानेकार्थविधानाद्दोषः स्यादित्याशङ्क्याह * यस्त्विति * एवमादिश्रुतिप्रकारचतुष्टयापेक्षः सर्वशब्दः ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदित्यभ्युदितेष्टिविधौ हि चन्द्राभ्युदये निमित्ते भावनामनादृत्य प्रकृतदर्शाख्यधात्वर्थोद्देशेनान्यविधाने ऽपि देवतातद्गुणरूपानेकार्थविधानात्प्राकाशादिविधिषु च धात्वर्थे ऽन्यसम्बन्धविधाने ऽपि देयतद्विशेषणरूपानेकार्थविधानात् त्रिष्वपि च सम्बन्धविधिपक्षेषु सम्बन्धो विधीयमानः सम्बन्धिनं तावदाक्षिपेदिति वार्त्तिकोक्तन्यायेन सम्बन्धाक्षिप्तयोः सम्बन्धिनोरक्रियाङ्गत्वेनाननुष्ठेयत्वादनुष्ठेयत्वासिद्धयै क्रियाङ्गत्वेन तयोरपि विधानापत्तेस्तुल्यो वाक्यभेदस्तत्श्चोभयवादितुल्यत्वान्नैकः पर्यनुयोज्य इत्याशयः । नन्वेवं सति वाक्यभेदपरिहारायाभ्युदितेष्टिविधौ यागान्तरविधानापत्तेः प्राकाशादिविधिषु च प्राकृते दक्षिणादाने प्राकाशादिमात्रविधानात्समस्त प्राकृतदक्षिणाबाधापत्तेस्तदधिकरणसिद्धान्तहानिः * स्यादित्याशङ्क्याह * यथेति * षष्ठे ऽभ्युदितेष्ट्यधिकरणे टुप्टीकायां नैवात्रानेकगुणा विधीयन्ते किं तर्हि विद्यमानस्यैव हविषो मध्यमभागाग्निदातृत्वविशिष्टा भावना प्रकृतयागसंम्बद्धा विधीयते इत्यादिवार्त्तिकेन प्रकृतदर्शयागाभेदे ऽपि तदवच्छिन्नभावनान्तराभ्युपगमेन वाक्यभेदः परिहरिष्यते दशमे प्राकाशाधिकरणे यद्वा सर्वविशेषणविशिष्टो ददातिरपूर्वो विधीयतइति भाष्येणैव कर्मान्तरविधानाभिधानात्तेनैव न्यायेनोत्तराधिकरणेषु स ब्रह्मणे देय इति श्वेताश्वब्रह्मविशिष्टदानान्तरविधिप्रतीतेः सप्रियाय सगोत्राय ब्रह्मणे देय इति सोमचमसप्रियसगोत्रब्रह्मविशिष्टदानान्तरविधिप्रतीतेर्यजुर्युक्तं रथमध्वर्यवे ददातीति यजुर्युक्तरथाध्वर्युविशिष्टदानान्तरविधिप्रती-

तेर्वाक्यभेदपरिहारो भविष्यतीत्याशयः। भवेदित्याशङ्काभाष्यं तं तु स्वपदार्थमित्यनेन गुणस्य भावनाविशेषणीभूतधात्वर्थविशेषणत्वोक्त्या भावनाविशेषणत्वस्योक्तत्वादयुक्तमाशङ्क्य यद्यपि तस्य भावनाख्यव्यापारस्य सम्बन्धिनं धात्वर्थाख्यं पदार्थं गुणशब्दो विशिंषन् व्यापारं विशिंष्यात्तथापि विनानेन प्रकारेण गुणावच्छिन्नरूपेण व्यापारो विधेयः प्रतीयेतेत्येवं विधेयत्वनिरासार्थत्वेन व्याचष्टे *भवेदिति* गुणस्यः साक्षाद्विधेयत्वयोग्यतायां गुणविधानार्थं तदवच्छिन्नरूपविधेयत्वं स्यात्तस्य त्वयोग्यत्वाद् गुणविशिष्टायां भावनायामेव विधेस्तात्पर्यावसायान्न गुणविधानार्थत्वोपपत्तिरिति साक्षाच्छब्देन सूचितं भावनापरेऽपि विधावर्थाक्षेपाद्धि विशेषणभूतगुणानुष्ठानसिद्धेर्नैयमाशङ्का युक्तेत्याशङ्काक्षेपार्थं तत्रेति भाष्यमनुष्ठानस्य विध्यधीनत्वाद्विधिं विनानुपपत्तेरयुक्तमाशङ्क्य वाक्यावगतविधेयभावनाविशेषणत्वानुपपत्तिकल्पितगुणविध्याशयत्वेन व्याचष्टे * तत्रेति * अथाप्रियमाणेऽपीति भाष्यं व्यधिकरणे सप्तम्यामङ्गीकृत्य विधेयाया भावनाया धात्वर्थाधीननिरूपणत्वाद् गुणाधीननिरूपणत्वाभावाद् गुणे पुंस्त्वव्याप्रियमाणे विधौ वा तस्मिन्नव्याप्रियमाणेऽपि गुणानपेक्षधात्वर्थावच्छिन्नभावनाविधानेन विधिशब्दार्थोपपत्तेर्नानुष्ठानं सेत्स्यतीत्याशङ्काशयविवरणार्थत्वेन व्याचष्टे * अव्याप्रियमाणेऽपीति * तत्रेत्यादिनैकग्रन्थेन वा स एवाशङ्कितान्येनापृष्ट एवानुष्ठानं निरूपयत्यन्यथा व्याचष्टे *स एवेति* स्वयं शब्देन प्रश्नानपेक्षोक्ता भावनाया गुणाधीननिरूपणत्वाभावाद् गुणानपेक्षविधेयत्वापत्तावपि स्ववाक्योपात्तगुणश्रुत्यानर्थक्यपरिहारार्थङ्गुणविधिः कल्प्य इति पुनराशङ्काक्षेपार्थङ्गुणेति भाष्यम्भावनाविधिना गुणस्य विधातुमशक्यत्वाद्भावनानिरपेक्षस्य च विधेः कल्पनायोगादगत्यानर्थक्यमेव ज्याय इत्याशङ्काशयविवरणार्थं वानर्थक्यञ्चेति भाष्यमेकहेलया व्याचष्टे * तेनैवेति * विधिकल्पनाशयः प्रश्नः कल्पनानुपपत्त्याशयं चोत्तरमित्यर्थः। सर्वस्य वेदस्याध्ययनविधिनार्थवत्त्वावधारणे आनर्थक्यायोगादवश्यकल्प्यो गुणविधिरित्याशङ्काक्षेपाशयविवरणार्थं कथं पुनरिति भाष्यं व्याचष्टे *तथेति* यथा तत्र किं भविष्यतीति प्रश्नः कल्पविध्याशयस्तथायमपि प्रश्नः कल्पविध्याशय इत्युक्तेः पौनरुक्त्यं तर्हीत्याशङ्क्याशयाधिक्यं वेत्यनेनोक्तं पूर्वपक्षे भावनानुष्ठानार्थत्वाद्विधेः कारकशून्यायाश्चानुष्ठानाशक्तेर्विशिष्टविधिना विशेषभूतकारकानुष्ठानाक्षेपार्थं गुणवचनेन सान्निध्यार्थवत्त्वोपपत्तेर्नानर्थक्यं सिद्धान्ते तु दध्यादिवाक्ये विधेर्भा-

वनारूढत्वे ऽपि तदनुष्ठानार्थत्वाभावात्कारकानुष्ठानाक्षेपाशक्तेः सान्निध्याज्ज्ञानस्यापि गुणस्यानुष्ठानानवगमादानर्थक्यमित्युत्तरार्थं भाष्यं सिद्धान्ते ऽपि गुणानुष्ठानार्थत्वाभ्युपगमादयुक्तमाशङ्क्य मध्यप्रतीकेनावतार्यानर्थक्यापादनार्थत्वेन व्याचष्टे *असति त्वर्थे इति* भवेदित्यादि किमन्यदुच्येतेत्यन्तभाष्योक्ता कापरिहारार्थमेवन्तर्हीति भाष्यं वाक्यशब्दे श्रवणादेकाभिधानलक्षणश्रुत्युपात्तभावनानपेक्ष-गुणविधानार्थं तया भासमानं भावानार्थविधायकेनापि विधिना विधिप्रयोजनभूतगुणसमर्पणार्थवाक्यापेक्षणाभिधानार्थत्वेन व्याचष्टे * एवं तर्हीति * वाक्याद्भविष्यतीति वाक्ये किं भविष्यतीत्यपेक्षा- ४९९।२ यामतिक्रान्तावेक्षणेन गुणगतस्य व्यापारस्य विधेयत्वप्रतीतिरित्यवगमात् * विधिरित्युक्तम् * ननु गुणमतो व्यापारो भविष्यतीति भाष्यार्थकल्पनयानेन विधिशब्देन भाष्यगता व्यापारशब्दा विधिवाचित्वेन व्याख्याता इति भ्रमितव्यम् नन्विदानीमेव वाक्याद् गुणव्यापार* उपगम्यतइत्युक्तम् *सत्यमेतदविधीयमानस्तु कुतो ऽवगम्यतइति वक्ष्यमाणभाष्ये व्यापारस्याविधीयमानत्वोक्त्यनुपपत्तिप्रसङ्गाद्विधिवाचित्वे च व्यापारशब्दानां भावनावाचिशब्दान्तरस्येहाभावात्प्रस्तुताधिकरणन्यायेन सर्वत्र लिङ्शिष्टभावनाविधिरेव तत्त्वमिति वार्त्तिकं निरालम्बनमेव स्यात् श्रुतिबलीयस्त्वेन पूर्वपाक्षिप्रत्यवस्थानार्थं श्रुत्यर्थे सतीति भाष्यं श्रुत्युपात्तायां भावनायां विधेस्तात्पर्यायोगेन श्रुतिविरोधाभावादयुक्तमाशङ्क्य भावनाविधिद्वारत्वाद् गुणविधेर्भावनानिरपेक्षे गुणे तात्पर्यायोगादापाद्योक्त्यर्थत्वेन व्याचष्टे * परस्त्विति * भावनाद्वारापि प्रवर्त्तमानस्य विधेरप्राप्तप्रापणस्वभावत्वेनान्यतः प्राप्तायां तात्पर्यायोगादानर्थक्यतदङ्गन्यायेन गुणे तात्पर्यावतारो युक्त इति परिहारार्थं सत्यमित्यादिविहितत्वादित्यन्तं भाष्यं व्याचष्टे * सत्यमिति * तत्सन्निधेरिति सूत्रावयवव्याख्यानार्थं स्वपदार्थस्येति भाष्यावयवं कर्मान्तरविधानोपपत्तेरयुक्तमाशङ्क्य कथं चित्प्राप्तिसम्भवे विशिष्टविधिगौरवान्याय्यत्वाभिधानार्थस्तद्गुणाधिकरणाधिकरणसूत्रावयवः पठितः । नन्वेवं सति तेनैव न्यायेन श्रुत्यर्थाविवक्षासिद्धेः प्रश्नो न युक्त इत्याशङ्क्य * कथमित्युक्तम् * श्रुत्यर्थाविवक्षायां द्वेषातिशयेनोक्तन्यायापरामर्शात्प्रश्नः श्रुत्यर्थाविवक्षावादिन एव वा हेत्ववतारार्थं प्रश्नोक्तिरित्यर्थः । तत्सन्निधेरिति सूत्रावयवव्याख्योपसंहारार्थं तस्मादिति भाष्यं तस्मात् शब्दपरामृष्टतत्सन्निधिं त्रेधा व्याचष्टे * तस्मादिति * पौर्णमास्यधिकरणादिस्थानां चोदनाशब्दानां शब्दान्तरे कर्म-

भेद इति कर्मशब्दालोचनेन कर्मचोदनाविषयतया व्याख्यानात्त- स्मिन्कर्मणि गुणत्वस्य संशब्दोक्तेनैकैकीभावेन विधानात्कारकद्रव्या- वस्थाविशेषत्वेन क्रियायाः क्रियाकारकयोरत्यन्तभेदाभावात्क्रियाद्वा- रा गुणस्य विधेयत्वोपपत्तिरित्याद्ये व्याख्याने तत्सन्निधिशब्दार्थ- स्तस्य गुणस्य सन्निधौ पठितस्याविधाने प्रमादपाठापत्तिरि- ति द्वितीये तस्याः कर्मचोदनाया वाक्यान्तरस्थायाः प्रत्यभिज्ञानान्न दध्यादिवाक्ये कर्मणि विधेयतेति तृतीये सत्यं न श्रूयतइत्यादिभा- ष्येण गुणविधिव्युत्पादनार्थत्वेन तत्सन्निधेरित्यादिसूत्रावयवं व्या- ख्यायाख्यातपदार्थविधावाख्यातपदानर्थक्यशङ्कानिरासार्थत्वेन त- स्य कर्मणो ऽग्निहोत्राघारवाक्यचोदितस्य दध्यादिवाक्ये सन्नि- धानाद् गुणान्वयार्था पुनः श्रुतिरित्येवं व्याख्यातुं जुहोतेरिति भाष्यं स्पष्टत्वादव्याख्याय यदीत्याशङ्काभाष्यं विधायकप्रत्ययानुवादत्वा- नभिधानादयुक्तमाशङ्क्य धातोरनुवादत्वे प्रत्ययस्यापि केवलाप्र- योज्यत्वेनानुवादत्वापादनाशयत्वेन व्याचष्टे * जुहोतेरिति * न- न्वेवमपि दध्यादिशब्दस्य विधायकत्वानिरासात्प्रश्नो न युक्त इत्या- शङ्क्याह * दधिशब्देनेति * यथा वाजपेयाधिकरणे, यदि यजेतेत्य- नुवादः केनेदानीं गुणो विधीयतइति प्रश्नोपपादनार्थं वाजपेयश- ब्देनेति मा वोचत न ह्याख्यातं वा कृत्यं वान्तरेण * नाम पदस्य विधिशक्तिरस्तीत्युक्तम् * तथात्रापि वाच्यमित्यर्थः। छायाशब्दः प्र- क्रियार्थः वाक्यावगतस्य गुणान्वयस्याप्राप्तत्वाद्विधेयत्वप्रतीतेस्तद- न्यथानुपपत्तिकल्पितेनाख्यातेन विधिसम्भवाच्छङ्काक्षेपार्थं नन्विति भाष्यं श्रुताख्यातत्यागेनाश्रुतकल्पनायोगेनाशङ्कासमाधानार्थं च स- त्यमिति भाष्यं स्पष्टत्वादव्याख्यायैवं तर्हीत्युत्तरभाष्यं व्याचष्टे * प्रत्यय इति * प्रत्ययस्य विधित्वे तद्वाच्याया भावनाया विधेयत्वा- पत्तेर्धात्वर्थानवच्छिन्नायाश्च तस्या विध्ययोगाद्धात्वर्थस्यापि विधे- यत्वापत्तिरिति कस्येति भाष्येणाशङ्क्याहाविधीयमानस्याप्यन्यतो ऽवच्छेदकत्वेन प्राप्तेरनुवादोपपत्त्यभिधानार्थं धात्वर्थस्येति भाष्यं व्याचष्टे * धात्वर्थ इति*धातुप्रत्यययोः सहप्रयोगनियमे ऽप्यर्थभे- दाद्विध्यनुवादविभागोपपत्तिसूचनार्थो विवेकशब्दः। ननु स्वपदो- पात्तस्यापि धात्वर्थस्यान्यतः प्राप्तत्वेनानुवादाभ्युपगमे भावनाया अपि प्राप्त्याविशेषेणानुवादापत्तेर्व्यापारशब्देन भावनाविधानाभि- धानं न युक्तमित्याशङ्कार्थं यदीति भाष्यं व्याचष्टे * यदीति * भा- वनानिरपेक्षगुणविधानाशक्तेर्गुणविधानार्थं प्राप्ताया अपि भावनाया गुणविशिष्टरूपेण गुणविधानोपपत्त्यभिधानार्थं वाक्यार्थ इति भाष्यं

पराभिमतधात्वर्थोद्देशेनान्यविधिनिरासेन विशिष्टभावनाविध्यभिप्रायत्वेन व्याचष्टे * वाक्यार्थ इति*यथैवं तर्हि वाक्याद्भविष्यतीति भाष्यं विशिष्टभावनाशयं तथैतदपीत्यर्थः।तस्मादिति सिद्धान्तोपसंहारभाष्यमुपक्रमभाष्यव्याख्यया व्याख्यातमप्यनन्तरोक्तवाक्यार्थविध्यालोचनेन भ्रान्त्यापादकत्वाद्व्याचष्टे * तस्मादिति * केवलगुणविध्यसम्भवाद्वाक्यान्तरतो ऽप्याघारणहवनरूपकर्मान्तरव्यावृत्तरूपाप्रतीतेः संज्ञोपबन्धासम्भवस्योक्तस्य केवलगुणविधिव्युत्पादनात्परिहारसिद्धेर्भाष्यकृतोपेक्षितं परिहारं स्वयमाह * जुहोतीति*ननु सजातीयकर्मान्तरव्यावृत्तिर्न जुहोत्याघारयतिभ्यां सेत्स्यतीत्याशङ्क्याह * इहेति * विधिस्वभावात्सर्वतो व्यावृत्तेः संज्ञोपबन्धोपपत्तिरित्यर्थः । अप्रकृतत्वाच्चेति सूत्रोक्तं प्राकरणिकवाक्यान्तरतो ऽपि रूपालाभं परिहरति * प्रकरणाच्चेति * यत्त्वज्ञातरूपस्य कर्मणो विध्यसम्भवात्फलकरणत्वानवगतेरुत्पत्तिवाक्ये कथंभावात्मकं प्रकरणं नास्तीत्युक्तम्। तद्वाक्यान्तरतो रूपलाभसम्भवे स्वभावात् ज्ञातरूपस्यापि कर्मणो विधिसम्भवादेव कर्मान्तरव्यावृत्तिसिद्धेर्विधिसम्भवादुत्पत्तिवाक्ये ऽपि सामान्यतः फलकारणत्वावगतेः प्रकरणं सम्भवतीत्येवं परिहरति * न चेति * ननु प्रकारविशेषाकाङ्क्षात्मकत्वात्कथम्भावस्य फलविशेषान्वयोत्तरकालत्वाच्च प्रकारविशेषाकाङ्क्षाया नोत्पत्तिवाक्ये कथम्भावोपपत्तिरित्याशङ्क्याह * फलेति * निर्विशेषसामान्याभावादुत्पत्तिवाक्ये ऽप्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफलविशेषान्वयोत्तरकालं कथम्भावोपपत्तिरित्याशङ्क्याह * फलेति * निर्विशेषसामान्याभावादुत्पत्तिवाक्ये ऽप्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफविशेषान्वयोत्तरकालं कथम्भावोपपत्तिरित्याशयः।या चालभिज्ञातरूपस्य फले विधातुमशक्यतोक्ता साप्ययुक्तेत्याह * न चेति * ५००।१
होममात्ररूपेण फले विहितस्य कर्मणो द्रव्यादिग्रहणे विरोधाभावादित्यर्थः । विशेषतो ऽत्र द्रव्यादेर्वाक्यग्राह्यत्वेन प्रकरणानपेक्षणात्सन्निधिमात्रेण च कर्मानुवादोपपत्तेः कथम्भावाभावे ऽप्यविरोध इत्याह * इष्यते चेति * वाक्यान्तरप्राप्तं च कर्मानूद्य वाक्यान्तरेण रूपग्रहणसम्भवे स्ववाक्याज्ञातरूपस्यापि कर्मणो वाक्यान्तरतो रूपलाभाद्विधिनिर्वाहोपपत्तेर्विध्ययोगाभिप्रायेणाघारप्रकरणनिरासायोगात्परप्रकरणपाठमात्रेण तन्निरासो वाच्यः। स चाभिक्रमाधिकरणे निराकरिष्यमाणत्वादयुक्त इत्याशयेनाह * न चेति * एतदेवोपसंहरति * तेनेति * यदुक्तमित्यादिभाष्यमप्याघारप्र-

करणसद्भावाभिधानार्थमित्यनेन सूचितम् । तण्डुलोदूर्ध्वादिवाक्यानां कर्मविधित्वे कर्मबहुत्वात्तदनुनिष्पाद्यपूर्वबहुत्वकल्पनापद्येतेत्याह * बहूनि चेति * अथानेकादृष्टकल्पनापत्तावपि रूपवत्त्वेनैषां विधित्वमिष्यते तदपि नास्तीत्याह * न चेति * तण्डुलादियुक्तानां होमानां देवता नास्ति ऊर्ध्वादियुक्तानां चाघाराणां यथा देवता नास्त्येवं द्रव्यमपीत्युभयाभावाभिप्रायं यदग्नये चेति देवतायुक्ते होमे द्रव्याभावस्तस्याघारामिन्द्र ऊर्ध्वो ऽध्वर इति वाक्यविहिते चाघारे ऽन्यतराभावश्चकारेण सूचितः । कर्मान्तरविधेश्च कर्मान्तरे गुणसमर्पकत्वायोगान्न वाक्यान्तराद्देवतादिलाभ इत्याह * सर्वे चेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तत इति * ननु वाक्यान्तराद्रूपलाभसम्भवाभिधानेनाद्यसञ्ज्ञोपबन्धव्याख्यायां परिहारसिद्धावपि द्वितीयव्याख्यायां परिहारानभिधानान्नोपसंहारो युक्त इत्याशङ्क्यानुभाषणपूर्वं परिहरति * यस्त्विति * प्रयत्नरूपभावनासाध्यत्वे ऽपि होमादिधात्वर्थस्य करणभूतधात्वर्थानवच्छिन्नाया भावनायाः कर्मान्वयायोगात्तदवच्छेदकत्वेन सङ्कल्पादिधात्वर्थोपन्यासो ऽनुष्ठेयहोमादिस्वरूपानुसन्धानं द्रव्यादिकारकसमवायाभिधानं वादिशब्दोपात्तं क्रियात्वे ऽपि धात्वर्थस्य जन्यत्वात्कर्मत्वोपपत्तिः । वस्तुतस्तु धात्वर्थस्य करोत्यर्थरूपक्रियात्वमेव नास्तीत्यपिशब्दार्थः । ननु सङ्कल्पादेरनुपादानान्न तदपेक्षया कर्मत्वनिर्देशोपपत्तिरित्याशङ्क्याह * तेनेति * अनिष्पन्नस्य होमादेः फलकरणत्वायोगात्सङ्कल्पादिनिष्पादितेन होमेन फलं भावयेदिति शास्त्रार्थो ऽवसीयतइत्याशयः । ननु दध्यादिवाक्यानां कर्मविधित्वाभावे ऽप्यग्निसूर्यवाक्ययोरनेकगुणविधानात्कर्मविधित्वावगतेरग्निहोत्रवाक्यस्य तद्वाक्यविहितसायम्प्रातर्होमद्वयसमुदायानुवादत्वं भविष्यतीत्याशङ्कते * ननु चेति * कर्मविधानं यदनेनोक्तं तदापद्यतइत्यर्थः । अत्र कैश्चिद्भाष्यमनादृत्योत्सूत्रं पूर्वपक्षं कृत्वाद्यसूत्रत्रयेण समुदायानुवादत्वासिद्धान्तमुपवर्ण्याग्निहोत्रे देवतायाः प्रकरणादप्यप्राप्तेर्विधित्वासम्भवस्य प्रकृतत्वाच्चेत्ति सिद्धान्तसूत्रोक्तस्याग्निसूर्यवाक्याभ्यां देवताप्राप्तेरनुपपत्तिमाशङ्क्याग्निसूर्यवाक्ययोः कर्मविधित्वं चोदना वा शब्दार्थस्य प्रयोगभूतत्वादिति सूत्रावयवेनानेकगुणविधानान्यथानुपपत्त्योक्ताग्निसूर्यवाक्ययोरपि द्रव्याभावात्कर्मविधित्वानुपपत्तिमाशङ्क्य दध्यादिवाक्यैर्द्रव्यप्राप्तिरुत्तरावयवेनोक्तेत्युक्तं तेषां मतं दूषयितुमुपन्यस्यति * तथा नामेति * अत्रैव परोक्तामुपपत्तिमाह * एवं चेति * आहु-

ती इति द्वित्वसंख्यायाः पृथक्त्वनिवेशाद्भेदव्यवहारः व्यपदेशभेदः स्पृष्टः धर्मभेदो ऽपि भेदापादकत्वाद्भेदं व्यवहारयतीत्यादिशब्देनोक्तः । नन्वभ्यासविषयाभेदे व्यवहारा भविष्यन्तीत्याशङ्क्याह * न चात्रेति * एकस्मिन्नभ्यासे सकलो ज्योतिष्टोम इति प्रतीत्यभावाद्युक्तं ज्योतिष्टोमावयवत्वमिह त्वेकैकस्मिन्सकलमग्निहोत्रमिति प्रतीतेर्नाग्निहोत्रावयवतेत्यर्थः । उभयत्र च समस्तेतिकर्त्तव्यतावृत्तिर्भेदापादिकेत्याह * एवञ्चेति * ननु कर्मैक्ये ऽपि कालभेदादितिकर्त्तव्यतावृत्तिर्युक्तेत्याशङ्क्याह * अन्यथात्विति * एकादशे दर्शपूर्णमासाख्ययोः समुदाययोः राजसूयाख्यानामिष्टिपशुसोमयागानां चातुर्मास्याख्यानां च वैश्वदेवादिपर्वणां कालभेदादङ्गावृत्तौ सिद्धान्तितायां सवनीयपशौ च या पशुपुरोडाशाङ्गप्रचाराणां कालभेदे ऽप्यङ्गानावृत्तिवदिहाप्यनावृत्तिरित्याशङ्क्यैकस्य कर्मणः प्रक्रमात्प्रभृत्यासमाप्तेरेककालत्वात्सवनीयपशोश्चैककर्म्यात्प्रयोगाख्यस्य तन्त्रस्य विप्रकृष्टकालत्वे ऽप्यङ्गानावृत्तिर्युक्तेति वैषम्यं वक्ष्यमाणं दृष्टान्तितम् । दध्यादिवाक्यानां च कर्मविधित्वे दध्यादीनां भिन्नकर्मविषयत्वात्समुच्चये सति सम्प्रतिपन्नदेवतात्वात्सहप्रदानापत्तेर्विकल्पसिद्ध्यर्थं कर्मैक्यायाग्निहोत्रवाक्यस्य विधायकत्वं सिद्धान्तयितव्यं सूर्याग्निवाक्ययोस्तु कर्मविधित्वे पक्षद्वये ऽपि दध्यादिविकल्पसिद्धेर्विचारो ऽनर्थकः स्यादित्याशयेनाह * न चेति * परमतमुपसंहरति * तस्मादिति * सूर्याग्निवाक्ययोः कर्मविधित्वे सत्येककर्मासम्भविदेवताद्वयरूपगुणभेदितस्यैकैकवाक्यविहितस्य कर्मद्वयस्यैक्यमुपचर्यापराग्निकहोमानां चाग्निहोत्रवाक्यात्पश्चाद्विहितत्वेनानुवादायोगमभिप्रेत्य सायम्प्रातराहवनीयहोमाविवक्षयाहुत्योरित्युक्तं परमतमुपन्यस्तं दूषयन्समुदायानुवादमेव तावन्निष्प्रयोजनत्वेन दूषयति * उच्यतइति * दर्शपूर्णमासाभ्यामिति द्विवचनस्य समुदायानुवादाव्यतिरेकणासिद्धेर्विद्धवाक्ययोः समुदायानुवादो ऽर्थवान् अग्निहोत्रमिति वैकवचनस्य राजसूयेनेत्येकवचनवत् समुदायानुवादं विना ऽप्यसमुदायीकृतानामेव प्रकृतानां कर्मणामेकफलान्वयात्समुदायसिद्धौ सत्यां तदुगतैकत्वद्वारा सिद्धेः समुदायानुवादो ऽनर्थक इत्याशयः । नन्वग्निहोत्रशब्दविशेषितेन धातुना फलान्वयावगमात्ततः प्रागेव समुदायत्वसिद्ध्यर्थं समुदायानुवादो ऽर्थवानित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे यथैव हीति* अनवगतफलानामपि कर्मणामेकप्रकरणविधानलक्षणैकधर्मान्वयाख्यात्प्रचयात्साहित्याख्यः समुदायः सेत्स्यतीत्याशङ्का-

निरासाशयः । प्राक्फलान्वयात्समुदायासिद्धावप्राप्तत्वान्नानुवादो ऽपि सिद्ध्येदिति सूचनार्थो दृष्टान्तः। समुदायसिद्ध्यै वैकवचनालम्बनैकत्वसिद्धिर्न तत्सिद्ध्यर्थो ऽप्यनुवादो युक्त इति सूचनायैकत्वशब्दः । एवमग्निहोत्रं जुहुयात्स्वर्गकाम इति प्रयोगवाक्यगतमग्निहोत्रपदमपि प्रचयशिष्टसमुदायैकत्वद्वारेण भविष्यतीत्यध्याहारेण योज्यं यथा चेति श्लोकव्याख्या नन्वग्निहोत्रशब्दस्यैकप्रकरणविधानलक्षणप्रचयकृतसमुदायनिमित्तत्वे सति गार्हपत्यान्वाहार्यपचनहोमानामपि प्रकृतत्वाविशेषात् ग्रहणेन फलान्वयापत्तेर्दर्शपूर्णमासादौ च सर्वत्र गार्हपत्यान्वाहार्यपचनयोः प्रधानकर्माधिकरणत्वाभावव्याप्तेरग्निहोत्रद्रव्यस्य च चतुरुन्नयनविधानाच्चतुरुन्नयनसंस्कृतस्यैव प्रधानहोमार्थत्वावगमात्तस्य चाहवनीयहोममात्रार्थत्वादाहवनीयाधिकरणहोमविधायकाग्निसूर्यवाक्यानन्तर्याच्चाग्निहोत्रं जुहोतीति समुदायानुवादस्थस्याग्निहोत्रशब्दस्याहवनीयाहोममात्रविषयत्वेन तन्मात्रस्य फलान्वयावगतेर्नैकप्रकरणविधानापादितसमुदायनिमित्तताग्निहोत्रशब्दस्य सम्भवतीत्येतद्वाक्याभावे ऽग्निसूर्यवाक्यविहितहोममात्रसमुदायासिद्धेस्तत्सिद्ध्यर्थः समुदायानुवादो ऽर्थवानित्याशयेनाशङ्कते * नन्विति * प्रकृतत्वाविशेषेण जुहोतेः सर्वहोमग्राहित्वावसायाद्वैदिके चार्थे ऽनुमानाप्रवृत्तेः पिण्डपितृयज्ञादेश्चातिप्रणीताग्नौ विहितस्याहवनीयानधिकरणत्वे ऽपि प्राधान्यदर्शनात्संस्कारव्यवस्थामात्रेण च प्राधान्यव्यवस्थानुपपत्तेरानन्तर्यस्य च पञ्चमक्रमात्मकप्रमाणत्वेन प्रकरणेन बाधाद्राजसूयशब्दवत्प्रकृतमात्रग्राहिजुहोतिसामानाधिकरण्येनाग्निहोत्रशब्दस्य सूर्यप्रकृतहोमविषयत्वावसायान्नाहवनीयहोममात्रासिद्ध्यर्थत्वं समुदायानुवादस्य सम्भवतीत्याशयेन परिहरति * समुदायेति * ननु बहुव्रीहेः सर्वनामार्थवृत्तित्वात्सन्निहिताहवनीयहोमविषयत्वावगतेरापराग्निकेभ्यो व्यवच्छेदो भविष्यतीत्याशयेन शङ्कते*नन्विति * पाश्चात्ये ऽप्यथैष ज्योतिरित्यादौ सर्वनामप्रयोगदर्शनेन प्राक्भावमनादृत्य सन्निधिमात्रापेक्षणादापराग्निकहोमानामपि चैकप्रकरणगतत्वेन सन्निध्यविशेषादत्यन्तसन्निधेश्च द्वयोरप्यसम्भवात्सन्निहितार्थवृत्तित्वेन विशेषणत्वानुपपत्तेरग्निदेवत्यहोमाभिधायित्वेन विशेषणत्वं वाच्यं तच्चापराग्निकनामप्यग्निदेवत्यत्वान्न सम्भवतीत्यापाद्योक्त्या परिहरति *नेति * अग्निदेवत्यत्वे च विशेषणे सति प्रातर्होमस्यापि प्राधान्यं न स्यादित्याह * अपि चेति* अतः समुदायानुवादाभाववत्समुदायानुवादे ऽपि सर्वेषां प्राधान्यात्समुदायानु-

५०१।२

वादो ऽनर्थक इत्युपसंहरति * तस्मादिति * नन्वग्निहोत्रवाक्यस्य विधित्वे सर्वाग्निष्वभ्यस्तस्य कर्मणो भेदाभावात्प्राधान्याविशेषे ऽप्यग्निसूर्यादिवाक्यानां कर्मविधित्वे ऽग्निहोत्रवाक्यास्यानन्यप्रयोजनत्वात्समुदायानुवादार्थत्वावगतेः प्रकृतमात्रग्रहणे च समुदायानुवादानर्थक्यापत्तेः प्राग्विहिताहवनीयहोममात्रानुवादावसायादापराग्निकानामङ्गत्वं भविष्यतीत्याशङ्क्याह * तथेति * सूर्याग्न्यादिवाक्यानां कर्मविधित्वाभावे ऽपि गुणार्थतयार्थवत्त्वोपपत्तेर्न तेषां कर्मविधित्वाभ्युपगमेनाग्निहोत्रवाक्यस्य समुदायानुवादताभ्युपगन्तुं युक्तेत्याशयः। शाखान्तरे च द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रो ऽन्वाहार्यपचने दश सम्पद्यते दशाक्षरा विराट् य एवं विद्वान् विराट् सम्पन्नमग्निहोत्रं जुहोतीति. सर्वहोमविषयत्वेताग्निहोत्रशब्दप्रयोगात्सर्वविषतयैवाग्निहोत्रशब्दस्य निश्चीयत इत्याह * तथा चेति * विराट्शब्दस्य दशाकाख्यत्वादापराग्निकहोमाग्रहणे च दशकासम्पत्तेः सर्वविषयत्वलिङ्गेन विराट्सम्पत्युपन्यासः अतः समुदायानुवादानर्थक्याद् गुणविधित्वस्य च तत्प्रख्याधिकरणे निरस्तत्वात्कर्मविधितैवाग्निहोत्रवाक्यस्य युक्तेत्याह * तस्मादिति * नन्वेवमपि गार्हपत्यादिवाक्येषु संख्याधिकरणारूपानेकगुणविधानात्कर्मविधिप्रतीतेः कर्मभेदे सति कर्मैक्यं न सिध्यतीत्याशङ्क्याह * ततश्चेति * यदाहवनीये जुहोतीत्यनारभ्यवादेन सर्वहोमानामाहवनीयाधिकरणत्वप्राप्तेराहवनीये द्व इत्यस्याहुत्यन्तरपरिसंख्यार्थत्वादष्टानामाहुतीनामधिकरणापेक्षायां गार्हपत्यान्वाहार्यपचनाधिकरणत्वविधौ समं स्यादश्रुतित्वादित्यनेन न्यायेनैकैकत्र चतुष्ट्वस्य प्राप्तस्यानुवादाद् गार्हपत्ये जुहोत्यन्वाहार्यपचने जुहोतीति वाक्यान्तराभ्यां वा गार्हपत्यान्वाहार्यपचनप्राप्तेश्चतुरावृत्तिलक्षणगुणमात्रविधानार्थत्वात्तत्संयोगस्याहवनीयसंयोगस्य च द्विरावृत्तिलक्षणगुणमात्रविधानार्थत्वान्न वाक्यभेदापत्तिरित्याशयः। ननु कर्मैक्ये सत्यग्नीनां विकल्पापत्तेस्तत्संयोगेन विहितानामावृत्तीनामपि विकल्पप्रसङ्गाद्विराट्सम्पत्त्यनुवादो न युज्येतेत्याशयेनाशङ्कते * कस्मात्पुनरिति * केषां चित्परिहारं दूषयितुमुपन्यस्यति * के चिदिति * प्रक्षेप्यस्य द्रव्यस्य क्व चित्प्रतिष्ठां विनाप्याधारासिद्धयोजनमात्रेण प्रक्षेपसिद्धेरग्निसंयोगस्यादृष्टार्थत्वेनैक्यार्थ्ये प्रमाणाभावान्न विकल्प इत्यर्थः।अदृष्टार्थत्वे सति वैकल्पिकबाधायोगादविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यादिति दशमाधिकरणविरोधः स्यादिति दूषण-

माह * एवं त्विति * तत्राङ्गानुरोधेनाश्रुतावृत्त्ययोगाद् बाधसम्भवे ऽपीहावृत्तिश्रवणाद्विकल्पानुपपत्तिरित्याशयेनाशङ्कते * अथेति * द्विरावृत्त्यादिश्रवणे ऽपि दशकृत्वा आवृत्त्यश्रवणाद्विराट्श्रुतेश्चानुवादसरूपत्वात्साम्यमित्याशयेन परिहरति * इहापीति * स्वमतेनानुवादसरूपत्वमन्यतः प्राप्त्यभावाद्विधित्वे सति द्वादशाधिकरणन्यायेन समुच्चयसिद्धिरिति परिहरति * तस्मादिति * विराट्सम्पत्त्यविधाने त्वदृष्टार्थत्वे ऽप्याहवनीयादिसंयोगस्य प्रत्येकमाहुतीनां स्थानविशेषनियमात्स्थानान्तरपाते च प्रायश्चित्ताम्नानात्कर्ममध्ये चानुगते ऽग्नौ लौकिकाग्निब्राह्मणपाण्यादौ होमविधिदर्शनात्सप्तमीश्रुतेश्चाधारणत्वद्वारैवादृष्टार्थत्वावसायान्न देवताग्निशब्दक्रियमित्यत्र वाग्निप्रतिनिधिनिरासस्य प्रत्यक्षदृश्याग्निरूपस्य दृष्टार्थत्वे ऽप्याहवनीयादिरूपस्यादृष्टार्थत्वेनान्यत्र तदवयवानुवृत्तौ प्रमाणाभावादुपपत्तेरन्योन्यनिरपेक्षस्य च विभक्तिश्रुत्याधारत्व-

५०२।२ प्रतीतेर्विकल्प एव स्यादित्याह * अन्यथा हीति * श्लोकं व्याचष्टे * सत्यपीति * ननु विद्वद्वाक्यस्य विधित्वाभ्युपगमे द्विचतुर्दशकृत्व आवृत्तिलक्षणानेकगुणविधानात्कर्मोत्पादकत्वापत्तेरुत्पत्तिस्थया संख्यया कर्मभेदः स्यादित्याशयेनाशङ्कते * कस्मात्पुनरिति * अग्निहोत्रवाक्यस्यानन्यप्रयोजनत्वेन कर्मोत्पादकत्वावसायाद्विरावृत्त्यादिवाक्यानां च विभागेनैकैकगुणविधायकत्वोपपत्तेरनुत्पत्तिस्थत्वान्नेयं संख्या भेदिकेत्याशयेन परिहरति * नेति * नन्वनुत्पत्तिस्थापि संख्या कस्मान्न भेदिकेत्याशङ्क्याह * उत्पत्तिस्था हीति * उत्पत्तिवाक्यावधारितसंख्ये कर्मणि संख्यान्तरानिवेशादावृत्त्यापि च संख्यान्तरसम्पादनोपपत्तेर्नास्वरूपभेदकत्वं सम्भवतीत्याशयः । अग्निहोत्रवाक्यस्य कर्मविधित्वे कर्मैक्यसिद्धिमुपपादितामुपसंहरति * तेनेति * परोक्तं समुदायानुवादत्वं निष्प्रयोजनत्वेन दूषयित्वाग्निसूर्यवाक्ययोर्गुणविधित्वे वाक्यभेदापत्तेः । कर्मविधित्वमाशङ्कितमनुभाषणपूर्वकं दूषयति * यत्त्विति * चशब्दात्समुच्चितस्य देवताद्वयस्य सकृच्छ्रुतेन प्रत्ययेन विधानोत्पत्तेः कालदेवतारूपाणामेकार्थविधानाद्वाक्यभेदो वाच्यः स चात्र कालानुवादान्नास्तीत्याशयः । नन्वनेकार्थविधिलक्षणवाक्यभेदाभावे ऽपि विशिष्टानुवादलक्षणो वाक्यभेदः स्यादित्याशङ्कते * नन्विति * कालमात्रानुवादात्परिहरति * नेति * जुहोतेस्तर्हि का गतिरित्याशङ्क्य प्रकरणलभ्यकर्मानुवादतोक्ता ननु कालस्य देवतान्वयो न सम्भवतीत्याशङ्क्य द्वेधा परिहरति * स त्विति * प्राकरणिकाद्वा-

क्यान्तरात्कालस्य कर्मान्वयावगतेस्तद्वारा देवतान्वय इत्येकः परिहारः। विधीयमानया सम्प्रदानभूतया देवतयाकाङ्क्षितत्वात्प्राकरणिकवाक्यान्तरेण च होमस्य कालान्वयितयावगतेस्तल्लक्षणार्थः कालनिर्देश इति द्वितीयः। ननु प्रत्यक्षश्रुतत्वाद्धोमस्य कालेन लक्षणा न युक्तेत्याशङ्क्याह * न चेति * वाक्यभेदापत्तेः श्रुतस्य होमस्य कालेन विशेष्टुमशक्यात्प्रत्ययानुग्राहकत्वेन च धात्वर्थानर्थक्यपरिहारोपपत्तेर्लक्षणयैव लाभो ऽभ्युपगन्तव्य इत्याशयः। ननु कालेन होमलक्षणायामनया यो हि कालस्येत्यनेन न्यायेनैककाललक्षितहोमस्य कालान्तरे ऽप्यनपायादग्नीषोमलक्षितोपांशुयाजे विधीयमानस्य पौर्णमासीकालस्य देवतान्तरयुक्ते ऽपि प्राप्तिवदेककाललक्षिते होमे विधीयमानाया देवतायाः कालान्तरयुक्ते ऽपि प्राप्तेर्व्यवस्थापरत्वोक्तिर्न युज्येतेत्याशङ्क्याह * न चेति * कर्मस्वरूपमात्रलक्षणे सत्येकैकेनैव तत्सिद्धेः कालद्वयोपादानानर्थक्यप्रसङ्गात्स्वानुरक्तकर्मलक्षणे कालान्तरयुक्ते कर्मण्यप्राप्तेर्नोपांशुयाजतुल्यतेत्याशयः। अतो ऽग्निसूर्यवाक्ययोर्व्यवस्थापरता युक्तेत्याह * तेनेति * व्यवस्थायाः सूर्याग्निमात्रविषयत्वे ऽपीतरेतरयुक्तदेवताद्वयविधेः प्रत्येकव्यापाराभावे वाच्यभेदसूचनार्थौ द्वन्द्वनिर्देशौ द्वन्द्वानिर्देशसूचितमपि वाक्यभेदपरिहारमजानतां वाक्यभेदोक्त्याशयमाशङ्कते * नन्विति * चशब्दाद्देवताद्वयसमुच्चयस्य सकृच्छ्रुतेन प्रत्ययेन विधानावगतेर्वाक्यभेदाभावे ऽपि वाक्यभेदमाशङ्कमानेनाग्नेयपदोपात्तद्रव्यदेवतरूपानेककारकवदग्निप्रजापत्योरनेककारकत्वं वाच्यं तच्च नास्तीत्यनेककारकत्वं परानभिमतमप्यापाद्यान्येषां परिहारं दूषयितुमुपन्यस्यति *नेति* प्रतिपदं च यावत्किं चित् द्रव्याश्रितं जातिलिङ्गसंख्यादीत्यादिपौर्णमास्यधिकरणवार्त्तिकोक्तं परामृष्टं पृथक्चतुर्थीनिर्देशादग्नीषोमवत् समुच्चितयोः कारकत्वाप्रतीतेः कारकयोस्तु समुच्चये कारकभेदापत्तेरग्नये दात्रइत्यादिवद्विशेषणविशेष्यभावात्त्वेककारकत्वे च शब्दानुपपतिप्रसङ्गात्सत्यपि वा विशेषणविशेष्यभावेनैककारकत्वे भिन्नकारकविभक्त्युपात्तयोररुणयैकहायन्यादिवत्क्रियान्वयं विना परस्परविशेषणविशेष्यभावायोगाद्यज्जहोति तदग्नये तच्च प्रजापतित्वंगुणविशिष्टाय जुहोतीति प्रत्येकविधिव्यापारापत्तेरपरिहार्यो वाक्यभेद इत्याशयेन दूषयति*अत्रेति * अग्नये दात्रइति वद्विशेषणविशेष्यत्वाङ्गीकरणेन प्रजापतित्वगुणविशिष्टस्याग्नेः कारकत्वाद्यद्यप्येकं कारकं तथाप्यनेककारकपदोपात्तयोः कारक-

५०३।१

विभक्तिश्रुत्या क्रियान्वयावगतेः क्रियान्वयात्प्राग्विशेषणविशेष्यत्वाप्रतीतेः प्रत्येकं विधिव्यापाराद्विधायकप्रत्ययावृत्तिः स्याद्वस्तुतस्तु प्रजापतेः स्वतन्त्रदेवतात्वप्रसिद्धेर्विशेषणत्वाभावेन कारकैक्यं नास्तीति यद्यपि शब्दार्थः श्लोकं व्याचष्टे * विभक्त्या हीति * समासस्यैकपद्यात्सकृच्छ्रुतप्रत्ययान्वयो युक्तः अग्नये च प्रजापतये चेत्यत्र समासाभावेनेतरेतरयुक्तस्याग्नीषोमवत्कारकत्वाभावाद्विशेषणत्वविशेष्यत्वाप्रतीतेश्च विशिष्टस्य कारकत्वाभावात्परमार्थतस्तावन्नैकं कारकं यद्यप्येकं तथाप्यनेकपदोपादानात्प्रत्ययावृत्त्यापत्तिरित्यपि शब्दार्थः । ननु सम्प्रदानत्वमात्ररूपेण कारकैक्योक्तिः सम्भवति सामान्यस्याविधेयत्वाद्विभक्तिभेदे च कारकविभक्त्यैक्यायोगादावृत्त्युपपादनार्थं प्रत्ययस्य क्रियैकविषयत्वेन क्रियान्वयं विना चार्थस्य विषयीकरणरूपालोचनायोगात्कारकत्वं च विना क्रियान्वयायोगाद्विभक्तिप्रयुक्तस्य प्रत्ययस्य नामार्थालोचनतोक्ता भिन्नयोरपि कारकयोश्चशब्देनेतरेतरयुक्तयोर्विषयत्वावगमात्प्रत्येकं विधिव्यापाराभावाद्भिन्नयोरपि विधेयत्वे विषयाभेदाद्वाक्यभेदपरिहारसम्भवे ऽपि यद्यवश्यमेकार्थविधिरेव वाक्यभेदपरिहाराय वाच्य इत्याग्रहस्ततो देवताद्वयविधौ कारकैक्यसम्भवात्सामान्यरूपेणैक्यसम्भवे ऽप्यनेकपदोपात्तयोरितरेतरयोगाविवक्षायामनेकविधेयत्वापत्तेस्त्वदुक्तपरिहारायोगाद्वरमेकदेवताविधानाभ्युपगमेन वाक्यभेदः परिहर्त्तव्य इत्याह * तस्मादिति * प्रजापतिमात्रविधौ व्यवस्थानुपपत्तेः सायम्प्रातःशब्दयोरविवक्षितार्थत्वादेकेनैव वाक्येन कालद्वये ऽपि कर्मैक्यात्प्रजापतिप्राप्तेर्वाक्यान्तरानर्थक्यप्रसङ्गाद्विधेयस्य प्रजापत्तेर्देवतान्तरसाहित्येन स्तुत्यर्थं पुनः प्रजापतिसङ्कीर्त्तनमित्यभ्युपगमे विध्यर्थवादयोरेकवाक्यत्वाद्वाक्यद्वयव्यवस्थानुपपत्तेर्यथाग्नाई पत्नीवान्निति मन्त्रवर्णाद्देवताभूताग्निप्राप्तेस्तद्विशेषणमात्रं पात्नीवतं गृह्णातीति तद्धितेन विधीयते तथात्राप्यग्निसूर्ययोः प्रजापतित्वविशेषणं सायमग्नेः प्रजापतित्वं विशेषणं प्रातः सूर्यस्येत्येवं व्यवस्थया विधीयतइत्येवं व्याख्येयं नाग्नेः सूर्यस्य वा शुद्धस्य देवतात्वं किं तु प्रजापतित्वविशेषणमपि देवतात्वान्तर्गतमित्यभिधानार्थत्वाभ्युपगमेन च शब्दानर्थक्यं परिहार्य्यमित्याशयः । विशेष्ययोर्देवताभूतयोरग्निसूर्ययोः कुतः प्राप्तिरित्याशङ्क्याह * अग्नीति * अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति वाक्यान्तरविहितमन्त्रवशाद्विशेष्यप्राप्तिरित्य-

र्थः। प्रजापतेः स्वतन्त्रदेवतात्वे गुणवृत्त्यैन्द्रीवन्मन्त्रयोः प्रजापतिप्रकाशकत्वोपपत्तेर्देवताकल्पकत्वायोगान्न मूर्द्धाग्निसूर्यप्राप्त्यर्थो ऽयं ग्रन्थः। नन्वग्निसूर्ययोरन्यतः प्राप्तत्वे प्रजापतिविधौ कीर्त्तनं किमर्थमित्याशङ्क्याह * ताभ्यामेव चेति * स्तुतिशब्दस्य गुणवत्त्वाभिधानवाचित्वाद्विधीयमानप्रजापतित्वलक्षणगुणापेक्षितगुणिसमर्पणायोपादानमित्यर्थः। ननु प्रजापतिशब्दस्य देवताविशेषे रूढत्वात्प्रजापालनगुणवाचिता न युक्तेत्याशङ्क्यागत्या गुणवाचित्वाङ्गीकरणौचित्याभिधानाय * औचित्येनेत्युक्तम् * नन्वेवं सति तत्प्रख्याधिकरणे * यदग्नये चेत्यने * नाग्निप्राप्त्यभिधानं न युज्येतेत्याशङ्क्याह * यदपि चेति * मन्त्रतो प्राप्तस्याग्नेर्विशेष्यत्वेनानुवादायोगान्मन्त्रस्याग्निप्रापकत्वालिङ्गतयेदं तत्रोदाहृतमित्यर्थः। नन्वग्निप्रजापत्योर्विशेषणविशेष्यभावे ऽग्नेः पूर्वाहुतिः प्रजापतेरुत्तरेत्यादिविरोधेनापि पक्षस्यानभिमतत्वात्केन विशेषणोपन्यास इत्याशङ्क्य * आहैवं चेति * ब्राह्मणेनाग्निसूर्ययोरविधाने लिङ्गात्तद्देवत्यमन्त्राप्राप्तेर्मन्त्रविषययोर्विध्योर्नानर्थक्यापात्तिरित्यर्थः। ननु लिङ्गात्केवलदेवत्यमन्त्रप्राप्तावप्यग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोतीति मिश्रदेवत्यमन्त्रविधानात्पर्युदस्तयोः प्रतिप्रसवार्थत्वेनानर्थक्यं परिहर्तुं शक्यमित्याशङ्क्याह * अन्यथेति * परिह्रियते अनेनेति करणे परिहारशब्दं व्युत्पाद्य परिहारश्च तत्प्रयोजनं चेति कर्मधारयो विग्राह्यः तदर्थशास्त्रत्वलक्षणस्य दोषस्य परिहारकं यत्प्रयोजनं मन्त्राधिकरणे गुणविधिरूपं परिसंख्यारूपमर्थवादरूपं चोक्तं तत्तावन्न सम्भवति यत्त्वादिशब्दोक्तं पर्युदस्तमन्त्रप्रतिप्रसवरूपमिहाभिमतं प्रयोजनं तस्मिन्कल्प्यमाने ऽति क्लेशः स्यादिति कल्प्यमानपदाध्याहारेण व्याख्येयम्। नन्वतिक्लेशापत्तावप्यग्नेः पूर्वाहुतिः प्रजापतिरुत्तरेत्यादिश्रुतिविरुद्धविशेषणविशेष्यत्वकल्पना न युक्तेत्याशङ्क्याह * तस्मादिति * एकार्थविधिं विना वाक्यभेदपरिहारासम्भवाभिमानिनं प्रत्येकार्थविध्युपपादनार्थं मन्त्रवर्णप्राप्तयोरग्निसूर्ययोः प्रजापतित्वलक्षणविशेषणरूपैकार्थविधिरनभिमतो ऽप्युक्तो न पारमार्थिक इत्याशयः। कस्तर्हि पारमार्थिको वाक्यभेदपरिहार इत्याशङ्क्याह * एतीति * येन कारणेन पारमार्थिको वाक्यभेदपरिहारो भवति तत्प्रागेवाग्निप्रजापती सूर्यप्रजापती इति चेतरेतरसाहित्यवाचिद्वन्द्वनिर्देशात्सूचितमित्यर्थः * अयमाशयः * यथा गावश्चाश्वाश्चाश्वतराश्च गर्दभाश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च

माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्ये चशब्देनेतरेतरसहितस्य गवादिशब्दस्य दक्षिणाशब्दान्वयावगमात्समुदितानां गवादीनामेकदक्षिणात्वावगतेर्द्धेनुर्दक्षिणेति विकृतौ विहिताया धेनोः समस्तदक्षिणाविकारत्वं दशमे वक्ष्यते तथेहापि यज्जुहोति तदग्नये च प्रजापतये चेति चशब्दात्समुच्चितयोरेवाग्निप्रजापतिशब्दयोर्विधायकान्वयप्रतीतेः प्रतिपदं विधेरपर्यवसानेन विधिव्यापारभेदाभावात्पृथक् चतुर्थीनिर्देशात्कारकभेदप्रतीतेर्भिन्नयोरपि विधेयत्वे प्रत्ययावृत्त्यप्रसक्तेः समुदितरूपस्य च विधेयत्वेन विधेयभेदाभावादनेकार्थत्वाप्रसक्तेर्देवताद्वयविधावपि न वाक्यभेदापत्तिरिति प्रपञ्चितं चैतत्तन्त्रसारे वाजपेयाधिकरणे ऽत्रापि तत्प्रख्याधिकरणे ऽस्माभिरुपपादितमिति ग्रन्थगौरवभयान्न बहुप्रपञ्च्यते । यत्तु ग्रहाभ्यासेषु ज्योतिष्टोमावयवबुद्धिवत्सायम्प्रातर्होमयोरग्निहोत्रावयवबुद्ध्या भावेन तद्भेदव्यवहारस्यावयवविषयत्वायोगाद्भेदोपपादकत्वमुक्तं तदप्यनुभाषणपूर्वं दूषयति * यत्त्विति * यथा दर्शपूर्णमासावृत्त्यात्मके दाक्षायणयज्ञे सकलयोर्दर्शपूर्णमासयोर्द्विरावृत्तेर्नावृत्तावयवबुद्धिस्तथाग्निहोत्रस्यापि सकलस्य विराड्वाक्याद्दशकृत्वो ऽभ्यस्तस्य द्वे आहवनीये द्वे गार्हपत्ये द्वे अन्वाहार्यपचनइति वाक्यात्षड्कृत्वो ऽभ्यस्तस्य तस्य वा एतस्याग्निहोत्रस्य स च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्त वा एव शतानि विंशतिश्च संवत्सरे प्रातराहुतय इति वाक्यान्तरालोचनया वा द्विरभ्यस्तस्य सायम्प्रातःकालयोरावृत्तेर्नावृत्तावयवबुद्धिरित्यर्थः । नन्वेकस्मिन्काले ऽग्निहोत्रसाकल्ये सति दाक्षायणयज्ञवदावृत्त्यविधानात्प्रयोगसमाप्तेः कालद्वये ऽनुष्ठानप्रमाणाभावादाचारविरोधः स्यात्सूर्याग्निवाक्यविहितयोस्तु कर्मणोरग्निहोत्रवाक्येन समुदायानुवादे प्रयोगवाक्यस्थेनाग्निहोत्रशब्देन कर्मद्वयग्रहणात्कालद्वये ऽनुष्ठानोपपत्तिरित्याशयेन स एव पूर्वपक्षी प्रत्यवतिष्ठते * नन्विति * एकैकस्मिन्काले प्रयोगसमाप्तावपि सायं जुहोति प्रातर्जुहोतीति वाक्यान्तरप्राप्तयोः कालयोः प्रयोगापेक्षितत्वेन तच्छेषत्वावगतेर्यावज्जीवं सायम्प्रातर्जुहुयादिति प्रयोगशास्त्रार्थावधारणादङ्गत्वे ऽपि कालस्यानुपादेयत्वसाम्येनार्थान्निमित्तभूतजीवनविशेषणत्वावगतेः कालावच्छिन्नस्य जीवनस्य निमित्तत्वात्प्रतिनिमित्तं च नैमित्तिकानुष्ठानस्य षष्ठे वक्ष्यमाणत्वान्नैमित्तिकहोमकरणं तावदेकस्मिन्काले प्रयोगसमाप्तावपि यावज्जीवचोदनया भविष्यतीत्यनुष्ठानाविरोध इत्याशयेनैकदेशिनः परिहारं दूषयितुमुपन्यस्यति *

नेति * उभयत्रानुष्ठानस्यानेन प्रकारेण सिद्धावपि सायं होमे कृते ५०४।१
यजमानापद्यप्यूर्तिविगद्वारा प्रातर्होमो ऽवश्यकार्यत्वाचारविरोधः प्रयोगभेदपक्षे दुष्परिहर इति दूषणमाह * सत्यमिति * अस्याचारस्यैकप्रयोगपक्षे न्यायमूलत्वप्रदर्शनार्थम् * प्रक्रान्तेत्युक्तम् * काम्यप्रयोगे वोभयत्रानुष्ठानविरोधो ऽपि दुष्परिहर इत्याह * किंचेति * नन्वेकस्मिन्काले ऽनुष्ठानात्फलसिद्धावपि कालान्तरे नैमित्तिकानुष्ठानोपपत्तेर्नाचारविरोध इत्याशङ्क्य * सर्वाङ्गसंयुक्तः फलार्थिना चेत्युक्तम् * कालद्वये सर्वाङ्गादरः फलप्रार्थनं च विरुध्येतेत्याशयः। प्रयोगैक्ये ऽत्वविरोध इत्याह * अभ्यस्तेति * एकदेशिपरिहारं दूषयित्वा स्वमतेन प्रश्नपूर्वं परिहरति * कथं पुनरिति * तिस्र एव साह्नस्योपसद इत्यादिवाक्यपर्यालोचनया पूर्वाह्णपराह्णोपसत्प्रयोगैक्यावसायात्पुरस्तादुपसदां प्रवर्ग्येण चरन्तीत्युपसत्पूर्वं प्रयोज्यत्वविधानेन प्रवर्ग्यस्यापि पूर्वाह्णापराह्णान्तस्यैकप्रयोगगतत्वावगतेस्तदुपमानेनाग्निहोत्रस्य कालद्वये ऽभ्यस्तस्यैकप्रयोगत्वं द्रढयितुं प्रवर्ग्ये ऽपि माप्रक्रमोपन्यासः। ननु सायम्प्रातर्होमयोर्भिन्नकर्मत्वे ऽग्निहोत्रवाक्ये समुदायानुवादस्यार्थवत्त्वाय समुदितयोः फलसाधनत्वावगमात्तत्समुच्चयसिद्धेर्नास्य वै शब्दयोगादनुवादसरूपस्य वचनत्वकल्पनापद्यते कर्मैक्ये तु वचनं विना कालद्वयसमुच्चयासिद्धेर्वचनत्वक्लेशापत्तिरित्याशङ्क्याह * भेदेति * विराड्वाक्याद्यालोचनेन दशकृत्वः षट्कृत्वो द्विर्द्विर्वैकस्मिन्काले ऽभ्यस्तस्याग्निहोत्रशब्दवाच्यत्वावगतेः कालद्वयाभ्यस्तकर्मसमुदायानुवादायोगाद्भेदपक्षे ऽपि वचनं विना समुच्चयो न सिद्ध्यतीत्याशयश्चशब्दादेव समुच्चयो न वाक्यादित्यर्थः। नन्वेवमपि कालयोगिनश्चशब्दात्कालसाहित्यावगतेः परस्परसहिते कालद्वये सकृदनुष्ठानापत्तेर्नाभ्याससिद्धिरित्याशङ्क्याह * न चेति * अनुपादेयत्वेन कालसाहित्यस्याशक्यसम्पादत्वाभ्यासेनैव कालद्वयान्वयः सम्पाद्य इत्यर्थः। ननु कालयोः कर्मण्युद्देश्यत्वात्समुच्चयस्य चोपादेयत्वात्समुच्चयविशिष्टकालविध्यनुपपत्तेः। स्वातन्त्र्येण कालसमुच्चयरूपानेकार्थविशिष्टविधौ वाक्यभेदः स्यादित्याशङ्क्याह * प्राप्तयोश्चेति * अतः सायम्प्रातरभ्यस्तमेकं कर्मेत्युपसंहरति * तस्मादिति * कर्मैक्ये ऽङ्गावृत्त्ययोगमाशङ्कितमनुभाषणपूर्वं परिहरति * यत्त्विति * प्रयोगवेलायां कालापेक्षत्वादनुत्पत्तिवाक्यस्थत्वाच्चोपांशुयाजाङ्गभूतकालवदुत्पत्तिशेषत्वानवगतेः कालस्य प्रयोगाङ्गत्वेन विध्यवधारणात्प्रयोगस्य च साङ्गप्रधानविषयत्वात्प्रयोगवि-

धौ प्रधानस्याङ्गसाहित्येन विशेषणस्तस्य चोपादेयविशेषणत्वेन विवक्षितत्वात्कालद्वयान्वयेन साङ्गस्य द्विः प्रयोगो ऽवसीयते सवनीयपशौ तु प्रयोगैकदेशभूतानां वपाप्रचारादीनामनेककालान्वये ऽपि प्रयोगावच्छेदककालभेदाभावान्नेतिकर्त्तव्यतापत्तिरित्याशयः । प्रधानैक्ये ऽपि प्रयोगावयवभूतयोरभ्यासयोः सायम्प्रातः कालान्वयात्सायन्तनस्य प्रातस्तनस्येति व्यपदेशौ यद्प्यग्निसूर्यवाक्ययोः कर्मविधायित्वं निराकृत्य कर्मैक्यसिद्धये ऽग्निहोत्रवाक्यस्य कर्मविधायित्वं सिद्धान्तितम् * निष्प्रयोजनमित्युक्तम् * तदप्यनुभाषणपूर्वं परिहरति * यस्त्विति * दध्यादीनां विकल्पाविशेषे ऽपि अग्निसूर्यवाक्ययोः कर्मविधित्वे कर्मभेदाद्विकृतावेककर्मणि विकल्पो विभागो हि चोदनैकत्वादित्यष्टमाधिकरणन्यायेन सायम्प्रातर्होमाङ्गयोर्विकल्पेन प्राप्तेः । कौण्डपायिनां होमः सायम्प्रातर्वा कालाध्वनोरत्यन्तसंयोगइत्यत्यन्तसंयोगे द्वितीयास्मृतेरहरहर्वा चोदितत्वादिति सङ्कर्षे वक्ष्यमाणन्यायेन प्रत्यहं सकृत्कार्यः । सिद्धान्ते तु कर्मैक्यात्सायं प्रातः प्राकृतः प्रकृतिवदभ्यसितव्य इत्यभ्यासप्रयोजनवान् सिद्धान्त इत्यर्थः । दध्यादिवाक्यानां तु कर्मविधित्वपूर्वपक्षे दध्यादिद्रव्यकेषु दशसु कर्मसु यदग्नये चेत्यादिवाक्यैर्देवताविधानात्सम्प्रतिपन्नदेवतात्वेन दध्यादिद्रव्याणां सान्नाय्यद्वयवत्सहप्रदानं सिद्धान्ते तु विकल्प इति स्पष्टं प्रयोजनम् ।आघारे तु कर्मैक्ये ऽप्यूर्ध्वत्वादीनां भिन्नार्थत्वात्समुच्चयाविशेषे ऽपि कर्मभेदे ऽपि च समुदायीकरणार्थवत्त्वाय प्रयोगतन्त्रत्वाविशेषे ऽपि कर्मभेदे सत्यूर्ध्वत्वादीनां मध्ये यस्यान्तरायस्तद्युक्तं कर्मावर्त्तनीयं कर्मैक्ये तु गुणलोपे प्रायश्चित्तं नावृत्तिरिति प्रयोजनमद्रव्यसंयोगाच्चोदनापशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणो ऽर्थेन नन्वाघाराग्निहोत्रयोरङ्गाङ्गिसम्बन्धाभावेनाभ्यर्हितं पूर्वं निपततीत्यस्याविषयत्वादल्पाच्तरत्वेनाघारशब्दस्य पूर्वनिपातो युक्तः। इह तु पशुशब्दस्य घ्यन्तत्वे ऽपि लक्षणहेत्वोः क्रियाया इत्यादौ घ्यन्तस्य पूर्वनिपातव्यभिचारात्सोमस्य प्राधान्येनाभ्यर्हितत्वात्पशोः पूर्वतराभिधानमयुक्तमित्याशङ्क्याह * पशोरिति * न्यायनिष्ठे शास्त्रे न्यायव्युत्पादनादरविषयस्याभ्यर्हितत्वात्पशोश्च पूर्वपक्षस्य क्लिष्टत्वेन न्यायव्युत्पादनादरविषयत्वात् पूर्वनिपातो युक्त इत्याशयः । सूत्रे च पशुमात्रग्रहणे ऽपि दैक्षस्य चेतरेष्विति दैक्षस्य सर्वपशुप्रकृतित्वेन वक्ष्यमाणत्वादग्नीषोमीयस्यैव वरुणपाशाभ्यां वा एषो ऽभिधीयते यो दीक्षित इति दीक्षोपक्रमविधानेन दैक्षशब्दवाच्यत्वात्स

पवोदाहर्त्तव्य इति सूचयितुं भाष्ये ऽर्थवादावयवोदाहरणं हृदया-
दींस्तु पशुशब्देनानुवदति * सोमशब्देन च रसमिति * पूर्वपक्ष-
भाष्ये पशुसोमशब्दयोरप्यनुवादत्वाभिधानाच्छब्दद्वयस्य सन्देहवि-
षयत्वमाह * द्वौ चेति * पशावपि यज्यनुवादेन पूर्वपक्षवचनव्य-
क्तिं परमतेन दर्शयितुं तस्मिन्पक्षे हृदयादिवाक्येष्वेव यज्यनुमा-
नात्पशुवाक्ये यजेरभावान्न शङ्का युक्तेत्याशङ्क्य देवतान्वयान्यथानुप-
पत्त्या यत्पशुना यजेत तदग्नीषोमीयेणेति प्राप्तेष्वपि यागेषु *
यज्यनुमानं युक्तमित्युक्तम् * सन्देहस्वरूपमाह * तत्रेति * कथं
तर्हि भाष्यकृताधातुमात्रानुवादनावद्यतिगृह्णात्यभिहितकर्मविषयता-
चोक्तेत्याशङ्क्याह * किमवद्यतीति * गृह्णात्यवद्यत्योर्यागानभिधाय-
कत्वाद्यजतिचोदनादुपायिचोदनादित्यादावभिधानार्थत्वेन दृष्टस्या-
पि चोदयतेरिहाभिधानार्थत्वानुपपत्तेराक्षेपापरपर्यायकल्पनावा-
चित्वमङ्गीकृत्यावद्यतेर्यागीयद्रव्यसंस्कारार्थावदानवाचित्वेन याग-
कल्पत्वविवक्षयावद्यतिसम्बन्धानुमितानामित्येवं व्याख्याते गृह्णा-
तावेतद्व्याख्यानासम्भवेनापरितोषाद्विधिवाचित्वमङ्गीकृत्यावद्यति-
गृह्णातिशब्दयोः प्रत्ययलक्षणार्थत्वाभ्युपगमेन व्याख्यान्तरं कृतं हृद-
यादिरससमुदायवाचिनौ पशुसोमशब्दावित्यप्यनेन भाष्येणोपल-
क्षितमिति प्रदर्शनशब्देनोक्तम् । ननूभयत्र यजेरनुवादकतायामालभ-
तिशब्दो न युज्येतेत्याशङ्क्याह * आलभतिरपि चेति * अस्यां पूर्व-
पक्षवचनव्यक्तौ भाष्यानार्जवापत्तेरवद्यतिगृह्णात्याक्षिप्तानां स्पर्श-
नयागकर्मणां समुदायस्यालभतियजती वदितारावििति यथाश्रुतं
भाष्यं व्याख्यातुं स्वमतेन पशावालभत्यनुवादपूर्वपक्षवचनव्यक्ति-
मङ्गीकृत्य सन्देहस्वरूपमाह * अथ वेति * अवद्यतियुक्तेषु वाक्येषु
यागविध्यप्रतीतेः पशुवाक्ये यागानुवादायोगद्योतनाय *अवद्यता-
वित्युक्तम् * नन्वेवं सति पूर्वपक्षे ऽपि पशुवाक्ये यागविध्यापत्तेः
कः पूर्वोत्तरपक्षयोर्विशेष इत्याशङ्क्य यत्पशुशब्दलक्षितं हृदयाद्याल-
भतेस्तदग्नीषोमीयं कुर्यादिति हृदयाद्यालम्भानुवादद्वारेणैकादशाना-
मवदानानां प्रत्येकं देवतान्वयादेकादशयागाः पूर्वपक्षे सिद्धान्ते च
पशुद्रव्यैक्येन देवतानन्वयैक्यादेको याग इति विशेषो ऽभिहितः ।
लक्षणसङ्गतिश्चानेन भेदाभेदफलत्वात्सूचिता अनन्तरसङ्गतिस्त्वा-
घाराग्निहोत्रवाक्यविहितयोः कर्मणोर्दध्यूदूर्ध्वादिवाक्यानां गुणवि-
धित्वोपपत्तेकर्मविधित्वाभावात्प्रकृतकर्माभावेन समुदायानुवादे नि-
रस्ते हृदयैन्द्रवायवादिवाक्यानां पशुसोमवाक्यविहितयोः कर्मणो-
र्गुणविधित्वायोगात्कर्मविधित्वापत्तेः प्रकृतकर्मसद्भावात्पशुसोमवा-

क्ययोः समुदायानुवादत्वं भविष्यतीत्याशङ्कानिरासार्थत्वात्स्पष्टा न-न्ववद्यतिना स्पर्शनाक्षेपे ऽपि गृह्णातिना यागानाक्षेपान्नेयं व्याख्या युक्तेत्याशङ्क्य यथावद्यतौ स्पर्शनाक्षेपस्तथा सोमे ऽपि यागाक्षेप इत्युक्ते तदुपपादनाय * अयमेवेत्युक्तम् * ग्रहणस्य यागपर्यन्तत्वं विना देवता-न्वयायोगाद्यागपर्यन्तत्वं सामानाधिकरण्योक्त्या विवक्षितं।यद्वा यथा पशौ पूर्वपक्षे बहवो यागाः सिद्धान्ते त्वेकस्तथा सोमे ऽपीत्युक्ते त-दुपपादनार्थं पूर्वपक्षे ग्रहणवाक्येष्वेव यागकल्पनाभिधानायायमे-वेत्युक्तं भाष्याञ्चस्यादालभत्यनुवादव्याख्यैव युक्ता न यज्यनुवाद-व्याख्येत्याह * तथा सतीति * भाष्यकृद्व्याख्याने ऽपि पूर्वपक्षस्य सौत्रत्वसिद्ध्यर्थमुपांशुयाजाधिकरणपूर्वपक्षसूत्रस्थेन पौर्णमासीव-च्छब्देनेहापि पूर्वपक्षाभिधानं सूचयत्पूर्वपक्षमारभते * तत्रेति * नन्विह रूपश्रवणात्कथं पौर्णमासीतुल्यतेत्याशङ्क्य सोमवाक्ये देव-तानवगतेरैन्द्रवाक्यानां च यागानुमानात्प्रागपर्यवसानेन वाक्या-न्तरानन्वयाद्देवतासमर्पकत्वानुपपत्तेर्यागानां च रूपत्वाभावादरूप-त्वमुपपादयति * तथा हीति * श्लोकं व्याचष्टे * न हीति * ननु दध्यादिवाक्यवदैन्द्रवायवादिवाक्येष्वपि विधिगौरवापत्तेः क-र्मविधित्वाभ्युपगमो न युक्त इत्याशङ्क्याह * यश्चेति * सिद्धान्ते चैन्द्रवायवादिवाक्येष्वपि देवताविशिष्टग्रहणविध्यभ्युपगमादुभ-यत्र गौरवापत्तिरित्याह * अपि चेति * तत्सन्निधेर्गुणार्थेन पुनः श्रुतिरित्यत्र चोपपदश्रुतौ सम्भवदनुवादस्य कर्मणो विधेयत्वनिषे-धान्न सोमवाक्ये यागविधिरित्याह * किं चेति * सम्भवदनुवा-दत्वं यादृशशब्देनोक्तं पूर्वपक्षे सोमशब्दस्याप्यनुवादत्वात् * भवा-नित्युक्तम् * श्लोकं व्याचष्टे * एकत्रैवेति * सत्याङ्गतावेकत्रैव विधिशक्त्यभ्युपगमस्य न्याय्यत्वात्सम्भवेदनुवादे कर्मणि सति गुणे विधिशक्तिः संक्रामतीत्यग्निहोत्राधिकरणे ऽभिहित-मित्यर्थः। किं तावदित्यादिभाष्येणालभतियजत्योरनुवादत्वे ऽभिहि-ते हृदयादिरसद्रव्यकेषु यागेषु पशुसोमशब्दयोरप्राप्तार्थत्वेनानुवा-दायोगादुत्पत्तिशिष्टगुणावरोधेन च विध्ययोगादानर्थक्यमाशङ्क्य हृदयादींस्त्वित्यनेन लक्षणया हृदयादिरसानुवादकतोक्ता तत्र पशु-वाक्ये देवताविध्यभ्युपगमाद्वाक्यभेदापत्तेर्द्रव्यविध्ययोगे ऽपि सो-मवाक्ये अथैन्द्रवायवादिवाक्येषु लता विधीयतइति भाष्ये द्रव्यवि-धेराशङ्किष्यमाणत्वात्पक्षद्वयमाह * तत्रेति * ननु पशुशब्देन हृ-दयाद्यनुवादो देवतान्वयायार्थवान्सोमशब्देन तु रसानुवादो ऽन-र्थक इत्याशङ्क्य लक्षितलक्षणया नामधेयत्वेनोपयोगमाह * ततश्चे-

ति * द्रव्ये रूढत्वाद्यागनामत्वेनावभासमानमप्यानर्थक्यपरिहारार्थं नामधेयं भवतीति च्विप्रत्ययार्थः । नामान्तरसद्भावान्नामानर्थक्यमाशङ्क्यते * नन्विति * स एष यज्ञः पञ्चविधो ऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादौ सोमशब्देनापि व्यवहारान्नानर्थक्यमिति परिहरति * यदीति * नन्वेवं सति समस्तवाक्यानुवादो ऽनर्थकः स्यादित्याशङ्क्याह * समस्तेति * यत्पौर्णमासीवाक्ये प्रयोगवाक्यगतसंख्योपजननं प्रयोजनमुक्तं तदेवात्राप्रीत्यर्थसोमशब्दस्यानुवादत्वमुक्तमुपसंहरति * तस्मादिति * नन्वैन्द्रवायवादिवाक्येषु द्रव्यदेवतान्वयाद्यागकल्पनोपपत्तेः क्रयादिवाक्येभ्यश्च सोमरसावगतेः सोमवाक्ये पूर्वपक्षसम्भवे ऽपि हृदयादिवाक्येषु देवताविरहाद्यागकल्पनानुपपत्तेर्हृदयादेश्च पशुप्रकृतित्वस्यान्यतो ऽनवगतेः पशुवाक्ये पूर्वपक्षो न सम्भवतीत्याशङ्कते * भवेदिति * पशुशब्देन हृदयाद्यनुवादं तावदुपपादयति * उच्यतइति* षष्ठान्त्यवक्ष्यमाणो दृष्टान्तः उत्तरार्द्धं व्याचष्टे * हृदयादिभिरिति * नन्वेवमपि यागानुवादो न सम्भवतीत्याशङ्क्याह * तत्र त्विति * आलम्भानुवादेनेह पूर्वपक्षो न यागानुवादेनेत्याशयः। यागानुवादमपि प्रौढ्योपपादयति *अथ वेति* पशुसान्नाय्ययोः पशुप्रभवत्वसाम्येन द्रव्यसारूप्यात्पशुयागस्याष्टमे सान्नाय्ययागविकारत्वाभिधानात्तेनैव न्यायेन हृदयाद्यवदानस्य द्रव्यसारूप्यात्सान्नाय्यावदानप्रकृतिकत्वावगतेः सान्नाय्यावदानस्य च यागीयद्रव्यसंस्कारार्थत्वेनास्यापि तथात्वावसायाद् हृदयादीनां संस्कार्यत्वान्यथानुपपत्त्या पूतीकफलचमसवद्यागान्वयप्रतीतेः प्रत्यवदानं यागकल्पनात्पशुवाक्ये यागसमुदायानुवादोपपत्तिरित्यर्थः । परमतत्वद्योतनायोत्प्रेक्ष्यमाणशब्दः । यच्च सोमवाक्ये प्रत्यक्षयजिसद्भावादैन्द्रवायवादिवाक्येषु तत्कल्पना युक्तेति दूषणं तदिहोभयत्राप्यानुमानिकत्वाविशेषान्नाशङ्क्यमित्याह * साधारणश्चेति * दश गृह्णातीति ग्रहणसमुच्चयदर्शनात्तस्य च यागार्थत्वाद्यागसमुच्चयप्रतीतेर्दशमो गृह्यते तृतीयो हूतय इति च द्वयोरपि क्रमदर्शनाद्यागैक्ये च दध्यादिवद्देवताविकल्पापत्तेः क्रमसमुच्चयानुपपत्तिप्रसङ्गाद्यागभेदार्थमपि ऐन्द्रवायवादिवाक्यानामेव यागविधिताश्रयणीयेत्यभिप्रायार्थमपि चेति भाष्यं व्याचष्टे *सोमेति* एतदेव संस्कारस्तु न भिद्येतेति सूत्रे खादिरतादिवैषम्यस्य वक्ष्यमाणत्वात्तद्दृष्टान्तेनोपपादयति * पश्येति * ननु भेदपक्षे ऽपि ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति प्रत्येकं ज्योतिःशब्दवाच्यस्तोमयोगनि-

मित्तज्योतिष्टोमशब्दवाच्यत्वात्प्रत्येकं फलान्वयेन यागविकल्पाप्तेः क्रमसमुच्चयदर्शनानुपपत्तिरित्याशङ्क्य समुदायानुवादबलात्समुदितानां फलान्वयावगत्यभिधानार्थमथ पुनरिति भाष्यं व्याचष्टे * मम त्विति * पशौ क्रमसमुच्चयदर्शनानुपन्यासस्याशयमाह * पशाविति * एतदेव विवृणोति * न हीति * ननु हृदयादिसमुच्चये ऽपि लोहितं निरस्यतीत्यादिवाक्यान्तरवशेन केषां चित्पश्ववयवानामपनयान्न सर्वेण पशुनेष्टं स्यादित्याशङ्क्याह * यन्मात्रमिति * किं चिदपनयेति बाहुल्यात् सामस्त्यव्यवहारोपपत्तिरित्याशयः । नन्वेवं सत्यनिषिद्धेन हृदयाद्येकादशावदानातिरिक्तेनापि यागापत्तेरेकादशभ्य एव हृदयादिभ्यो ऽवदेयमिति दशमाधिकरणसिद्धान्तो विरुध्येतेत्याशङ्क्याह * एतीति * न्यायात्सर्वप्राप्तावप्येकादशपशोरवदानानित्यस्यानन्यप्रयोजनत्वादवयवान्तरपरिसंख्यार्थत्वेन तत्रत्यः सिद्धान्त इत्याशयः । समुच्चयांशेन त्वनुवादकत्वादिह लिङ्गत्वेनोपन्यासः । ननु सोमस्यापि दशमुष्टेस्त्रिपर्वणो बहूदकादिषु तस्य प्रादेशमात्रेण पात्रेण समस्तस्य ग्रहीतुमशक्यत्वात्सोमयागैक्ये ऽपि समस्तसोमसाधनकत्वादेव क्रमसमुच्चयदर्शनोपपत्तिरित्याशङ्क्याह *सोमे त्विति* उत्पत्तिवाक्ये सोमस्य समस्तचोदनाभावात्पशुवैषम्यं भाष्यकृतो ऽभिमतमित्याशयः । तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे*तस्मादिति*सूत्रे चोदनेत्येकवचनप्रयोगे ऽपि पशुसोमयोरिति सप्तमीद्विवचनेनोदाहरणद्वयपरिग्रहात्कर्मणोश्चोदने इति द्विवचनान्तेन व्याख्याय शुद्धकर्मचोदनाशङ्कानिरासार्थं प्रकारवाचिविधानशब्दप्रयोगेण विशिष्टचोदनात्वमुक्तं तत्स्पष्टत्वादव्याख्यायापूर्वद्रव्यसंयोगादित्येकं द्रव्यसंयोगलक्षणहेतुव्याख्यानार्थस्य कुत इत्यादिभाष्यस्य तात्पर्यं व्याचष्टे * इतीति * श्लोकं व्याचष्टे * यदि हीति * एवं विद्वानित्येवंशब्देन प्रकृताशेषरूपपरामर्शादशेषरूपप्रत्यभिज्ञाने ऽभिहिते विद्वच्छब्दान्वयेनैवंशब्दस्य यज्यनन्वयाद्यागरूपापरामर्शकत्वे तु द्रव्यं संयोगमात्रमनेनैव भाष्येणोक्तमिति सूचयितुम् * यदि वेत्युक्तम् * पशुविकारस्य हृदयादेर्लक्षणया पशुशब्देनाभिधानात्सोमविकारस्य च रसस्य सोमशब्देनाभिधानान्न पूर्वद्रव्यसंयोगो ऽस्तीत्याशङ्कानिरासार्थत्वेन प्रकरणे ह्यनर्थको द्रव्यसंयोग इति सूत्रावयवस्य पशुसोमाख्यं द्रव्यं यागे संयोजयतीति व्युत्पत्त्या द्रव्यसंयोगशब्दोक्तः । पशुशब्दः सोमशब्दश्च प्रक्रियतइति व्युत्पत्त्या प्रकृते हृदयादौ रसे च मुख्यार्थत्यागापत्तेर्न प्रवर्त्ततइत्येवं व्याख्यानार्थं नन्वित्याशङ्का-

भाष्यं तावद्व्याचष्टे * तत्रेति * नैतदित्यादिव्याख्याभाष्यं व्याचष्टे * तत्रेति * किं लक्षणाश्रयणे कारणं यदिह नास्तीत्यपेक्षायामाह * विरूपष्टे हीति*मञ्चाः क्रोशन्तीतिवत्परशब्दसामानाधिकरण्याभावे ऽपि गङ्गायां घोष इत्यादौ लक्षणां विना पदान्तरान्वयासम्भवे लक्षणादर्शनाद् *अनन्यथासम्भवे वेत्युक्तम्* ननूत्पत्तिशिष्टरसहृदयाद्यवरुद्धयोर्यागयोर्लताप्राणिविध्ययोगात्पशुशब्दस्य च प्रकृतहृदयाद्यनिवेशे देवताविधिपरे वाक्ये द्रव्यविध्ययोगेनानर्थक्यापत्तेरस्त्यनन्यथा सम्भव इत्याशङ्क्याह * शक्यं हीति * यागान्तरविध्यभ्युपगमान्नैको ऽपि दोष इत्याशयः। अपूर्वयोः कर्मणोरिति सिद्धान्तोपक्रमस्थमपूर्वशब्दं उपांशुयाजाघाराग्निहोत्राधिकरणसिद्धान्तोपक्रमभाष्यस्थकर्मान्तरशब्दवदभ्युपेत्यवादत्वेन व्याचक्षाणः तस्मादित्युपसंहारभाष्यं तदनुसारितया व्याचष्टे * तेनेति * न हि तस्य गुणार्थेनेति सूत्रावयवं प्रकृतेषु यागेष्वनर्थको द्रव्यसंयोग इत्येवमर्थावृत्तपूर्वावयवसहितमाशङ्कोत्तरत्वेन व्याख्यातुमथेत्यात्याशङ्काभाष्यमुत्पत्तिशिष्टरसावरुद्धे यागे प्रदेयतया लताविध्याशङ्कानुपपत्तेरयुक्तमाशङ्क्य प्रदेयप्रकृतित्वेन लताविध्याशङ्कार्थतया व्याचष्टे * कस्मादिति * भाष्यानारूढपशुग्रहणेन सिद्धान्ते द्वयोरपि प्रदेशप्रकृतित्वेन विधिः सूचितः। न सेति भाष्यं मध्यप्रतीकेनोत्तरतयावतारयति * तत्राहेति*प्रदेयप्रकृतित्वेनापि विधौ शङ्किते गृह्णादिवाक्येष्वरव्या धारया गृह्णातीति प्राकरणिकवाक्यान्तरालोचनेन धाराग्रहणयोग्यद्रव्यप्रतीतावपि स्वाभाविकद्रवत्वयुक्तस्योदकादेरपि धाराग्रहणोपपत्तेर्विकारद्रव्यानवगमेन सोममभिषुणोतीत्यादिवाक्यालोचनाद्विकारद्रव्यावगमाभ्युपगमे तु प्रकृतिद्रव्यस्याप्यवगमे प्रकृत्यनपेक्षणात्प्रदेयतयैव विधेयत्वं शङ्कनीयमित्यापाद्य श्रौतरसावरुद्धेषु यागेषु वाक्येन लताविध्यनुपपत्त्याभिधानार्थत्वेन भाष्यं व्याचिख्यासुरवद्यतिवाक्येषु हृदयादिविकारद्रव्यप्रतीतेस्तत्प्रकृतित्वेन पशुविध्याशङ्कापरिहारौ कस्मान्नोपन्यस्ताविस्याशङ्कानिरासपूर्वं व्याचष्टे * पशुस्तावदिति * ननु तद्धितश्रुत्यनुपात्तत्वान्न रसस्य लतातो बलीयस्त्वं प्रत्युत प्रकरणलभ्यत्वाद्दौर्बल्यमित्याशङ्कते * कथं पुनरिति * सास्य देवतेति सन्निहितविशेषवाचिसर्वनामास्य शब्दार्थे तद्धितस्मृतेः श्रौतत्वमाहोच्यत इति नन्वनुपात्तस्य द्रव्यविशेषस्य देवतान्वयो न सम्भवतीत्याशङ्क्याह* अधिकारेणेति* सन्निहितत्वोपलक्षितस्य द्रव्यविशेषस्य तद्धितश्रुत्या देवतान्वये कृते कस्येति निर्द्धारणापेक्षायां प्रकरणान्निर्द्धार्यत इ-

५०९॥१

त्यर्थः । एतच्च तद्धितनिर्देशे श्रुत्येति गुणाधिकरणभाष्यव्याख्यावेलायां देवतासङ्गतिः श्रुत्या तद्धितान्तात्प्रतीयतइत्यादिवार्तिकेनोपपादयिष्याम इत्याह * गुणाश्चेति * वैश्वदेवाधिकरणव्युत्पादितोत्पत्त्युत्पन्नशिष्टबलाबलाभिधानार्थं चैतद्भाष्यमिति सूचयितुं युक्त्यन्तरमाह * किं चेति * दुर्बलतरत्वसूचनार्थं प्रवृत्तापेक्षत्वं वाक्यान्तरस्य विशेषणम् । लतायाश्च दौर्बल्याद्रसावरुद्धेषु यागेषु विधातुमशक्यत्वे सति न केवलं प्रकृतप्रत्यभिज्ञानानुवादायोगाद्यागस्य विधेयत्वापत्तेः पुनर्विधानलक्षणादभ्यासाद्भेदः किं तु गुणादपीत्याह * ततश्चेति * व्याख्यातं भाष्यं दूषयितुमारभते * शक्येति * प्रकृतेषु यागेषु रसविरोधात्प्रदेयतया लताविध्ययोगे ऽपि व्रीहिवत्प्रदेयप्रकृतितया विध्युपपत्तेः शक्यपरिहारं भाष्योक्तं दूषणमित्याशयः । नन्वष्टाकपालादिशब्दानां संस्कृततद्धितान्तत्वात्ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यन्नित्याग्नेयवाक्यशेषाच्चाष्टाकपालशब्दस्य पुरोडाशविषयत्वावगमाद्विकारद्रव्यप्रतीतेः प्रकृत्यपेक्षायां युक्तः प्रकृतित्वेन व्रीहिविधिरैन्द्रवायवादिवाक्येषु तु धारावाक्याद्द्रवद्रव्यावगमे ऽपि विकारद्रव्यत्वानवगतेरभिषवादिवाक्यालोचने तु प्रकृतिद्रव्यस्याप्यवगतेर्न लतायाः प्रकृतित्वेन विधिर्युक्त इत्याशयेन पृच्छति * कुत इति * विकारद्रव्यत्वाभावे ऽपि धानादिवत्कपालसंस्कार्यत्वोपपत्तेर्वाक्यशेषस्य च विष्णुरुपांशु यष्टव्य इत्यादिवदूर्जो ऽवरुध्या इत्यादिवच्च स्तुतिमात्रोपयुक्तस्य विध्युद्देशापेक्षितार्थसमर्पकत्वायोगादश्वशफमात्रः पुरोडाशो भवतीत्यादिविध्यन्तरालोचनाच्च पुरोडाशप्रतीत्या विध्युद्देशपर्यवसानोपपत्तौ स्तुत्युपयुक्तस्य रात्रिसत्रवत्परावृत्त्याविधित्वकल्पनानुपपत्तेरष्टाकपालादौ प्रकरणानालोचने प्रकृतिविकारद्रव्ययोर्द्वयोरप्यप्रतीतेस्तदालोचने च द्वयोरपि प्रतीतेः किं प्रकृतिको ऽसावित्यनपेक्षायामपि किं पुरोडाशप्रकृतिभूता व्रीहयस्तन्निष्पत्तौ व्यापारयितव्याः किं वा नो वासोजाघनीवद्यथा कथं चिन्निष्पन्नं व्रीहिमयपुरोडाशस्वरूपमात्रं व्यापारयितव्यमित्यपेक्षायां निर्वापावघातपेषणसंयवनापिण्डकरणादिनिष्पादकविधिदर्शनेन प्रयोगकाले निष्पादनावगमादसम्भवे ऽपि निष्पादकविध्यनालोचने च पर्णमयी जुहुर्भवतीत्यादिवत्प्रकृतिद्रव्यविधाने ऽपि यथा कथं चिद्विशिष्टद्रव्यलाभेनापि प्रयोगोपपत्तेः प्रयोगकाले निष्पादनानाक्षेपापत्तेर्यथा व्रीहीणामविधानेसक्तुवदसंस्कार्यत्वापत्तेर्निर्वापादिविधीनामारादुपकारित्वप्रसङ्गाद्यागाङ्गत्वेनैव विहितेषु व्रीहिषु योग्यतया

पुरोडाशप्रकृतित्वेनाविरोधोपपत्तौ विरोधापादकसाक्षाद्यागसाधन-त्वाङ्गीकरणानौचित्यात्प्रकृतितावसीयते तथा सोमे ऽपीत्याशयेनो-त्तरमाह * यथैवेति * श्लोकं व्याचष्टे * विधीयमानं हीति * लताविशिष्टयागविधिपक्षे ऽपि चाभिषवेण लतास्वरूपनाशात्प्रदेय-प्रकृतित्वेनैव यागाङ्गता तुल्येत्याह * अपि चेति * रसलतयोश्च ५१०।५ विरोधाभ्युपगमे रसस्योत्पत्तिशिष्टत्वपक्षे लताया दौर्बल्यात्तदानुगु-ण्येन प्रवृत्तेस्तदापेक्षितप्रकृतित्वाङ्गीकरणेन विरोधः शक्यपरिहारः लतायास्तूत्पत्तिशिष्टत्वे दुष्परिहर इत्याह * अपि चेति * श्लोकं व्याचष्टे * रसस्येति * का तर्ह्यैन्द्रवायवादिष्वित्यादेर्भाष्यस्य गतिरित्यपेक्षायामुत्पत्तिशिष्टरसावरोधात्प्रदेयत्वेन लताविध्याश-ङ्कानुपपत्तेः प्रदेयप्रकृतित्वाशङ्कायाश्च निराकर्तुमशक्यत्वादुपेक्षणी-यत्वं वक्तुमाह * तस्मादिति * पशुसोमाख्यगुणस्य प्रदेयप्रकृति-त्वेन विधिरित्याशङ्का नोद्घाटनीयेति वाच्ये तन्निरासार्थस्य न हीति सूत्रावयवस्याप्युपेक्षणीयत्वसूचनायानुदृत्यास्यैवोत्तरं सूत्रं प्रस्ताव्य-मिति त्वपि प्रयुक्ते ऽवयवदोषेण सकलसूत्रापेक्षां प्रसज्यमानां नि-राकर्तुं समुदायेत्युक्ते गुणविधित्वाशङ्कायामनिरस्तायां कथं कर्मविधित्वसिद्धान्तसिद्धिरित्याशङ्क्य पशाविल्युक्तं प्राप्ते कर्मण्य-नेकगुणविध्ययोगादेव तत्राशङ्का नोत्तिष्ठतीत्याशयः। सोमे कथं सिद्धान्तसिद्धिरित्यपेक्षायामुत्तरसूत्रेण गृह्णातिवाक्यानां कर्मवि-धित्वनिरासादिति सोमे त्वित्यनेनोक्तमिति योज्यम्। समुदायानुवा-दत्वमात्रं निराकृत्यमिति सुगमः पाठः। एवं तु सूत्रभाष्यकृतोर्द्वयोर-प्यबुद्धिपूर्वकारित्वापत्तेः पूर्वत्रापरितोषेणोत्पत्तिशिष्टरसावरोधा-दैन्द्रवायवादिवाक्याविहितेषु यागेषु लता विधातुं शक्येति पूर्वसू-त्रावयवोक्तामुपपत्तिं चकारेणोत्पत्तिशिष्टरसावरोधे ऽपि तत्प्रकृति-त्वेन लताविधिसम्भवरूपनिराकरणहेतुसूचनपूर्वमुत्तरसूत्रेणैन्द्रवा-यवादिवाक्यानां कर्मविधायित्वाभावान्न रसस्योत्पत्तिशिष्टतेत्येवं निराकृत्यैन्द्रवायवादिवाक्यानां कर्मविधित्वाभावलक्षणयैवोपपत्त्या सोमवाक्यस्य कर्मविधित्वं निर्णेतव्यमिति पक्षान्तरमाह * अथ वेति * निराकार्योपपत्त्युपन्यासस्यापि मन्दप्रयोजनत्वेनेहाप्यपरि-तोषात्स्वयमन्यथा सूत्रव्याख्यामारभते * पूर्वेति * पशुसोमवा-क्योदाहरणे ऽस्य सूत्रस्य पूर्वपक्षोक्त्यशक्तिमाशङ्कते * कथं पुन-रिति * गृह्णात्यवद्यतिवाक्योदाहरणाङ्गीकरणेन पूर्वपक्षे सूत्रं यो-जयितुं सन्देहस्वरूपं तावदाह * उच्यते इति * योजयति * कि-मिति * पशुसोमवाक्ययोरुत्पत्तिचोदनात्वे सति प्रकरणापेक्षा

गृह्णात्यवद्यतिवाक्येषु रसहृदयादिद्रव्यसंयोगो विधीयमानो न यागाङ्गत्वं प्रतिपद्येतेति मध्यमावयवे व्याख्याते ऽवदानग्रहणयोः पशुसोमसंस्कारार्थत्वेनाविरोधशङ्कानिरासार्थतयाशङ्क्य स्वरूपनाशकत्वात्संस्कारार्थत्वायोगाभिधानार्थत्वेन न हीति सूत्रावयवं व्याख्याय प्रदेयप्रकृतित्वेनाविरोधाशङ्कानिरासार्थतया तस्योत्पत्तिवाक्यैः प्रदेयत्वेन प्रकृतस्य रसहृदयादेः प्रकृतित्वलक्षणगुणार्थेन पशुसोमयोः संस्कारवाक्यैरेव सोमं क्रीणातीत्यादिवार्त्तिकोक्तेन न्यायेन सिद्धतया विध्ययोगात्प्रकृतेरसहृदयादौ प्रकृतित्वेन पशुसोमद्रव्यसंयोगो ऽनर्थक इति व्याख्यान्तरे ऽथ वेत्यनेन कृते मम त्वित्य-
५११।८ नेन पूर्वपक्षे ऽर्थवत्तोक्ता पूर्वपक्षसूत्रार्थमुपसंहरति * तस्मादिति *

अचोदकाश्च संस्काराः ॥ १८ ॥

पूर्वसूत्रसमर्थनार्थं गृह्णात्यवद्यतिवाक्यानां कर्मविधित्वपूर्वपक्षकरणे ऽप्यधिकरणत्रयस्य समुदायानुवादापवादार्थत्वेन पशुसोमवाक्ययोः समुदायानुवादपूर्वपक्षस्यैव विवक्षितत्वात्तन्निवृत्त्यर्थत्वेन तुशब्दस्थाने वाशब्दं व्याचष्टे * नैवेति * पशुसोमवाक्यस्थयोराख्यातशब्दयोः समुदायानुवादत्वनिराससाध्ये ऽवद्यतिगृह्णातिपराणां प्रत्ययानां यागाचोदकत्वस्य साक्षादहेतुत्वात्पूर्वाधिकरणसिद्धान्तहेतोश्च शब्दार्थस्य प्रयोगभूतत्वादित्यस्य निर्गुणाख्यातश्रुतिविषयत्वेनेहाभावात्तत्पूर्वाधिकरणसिद्धान्तहेतोरप्रकृतत्वादित्यस्य पूर्वाधिकरणे ऽपि प्रकृतकर्मसद्भावे निर्गुणश्रुतावपि पौर्णमासीवत्समुदायानुवादापत्तेरपेक्षितत्वेनानुषक्तस्यात्राप्यनुषङ्गं करोति * चोदना चेति * अप्रकृतत्वोपपादनार्थत्वेन प्रश्नपूर्वं सूत्रं योजयति * कथमिति * संस्कारविधिष्वपि यागकल्पनं पूर्वपक्षोक्तं निराकर्त्तुमारभते * तन्मात्रेति * ऐन्द्रवायवादिवाक्येषु तावत्सोमेन यजेतेति श्रुतयागप्रत्यभिज्ञानात्कल्पनानुपपत्ति * माहैवं हीति * भाष्यमप्यनेन व्याख्यातं भवति यागानुमानात्प्रागाग्नेयादिवाक्यवत्स्वार्थपर्यवसानं पूर्वपक्षोक्तमनुभाषणपूर्वं परिहरति* यदुक्तमिति * अतो ऽत्र नियोगापरपर्यायविधिविषयभूतपुंव्यापारलाभाद्वाक्यस्य सङ्गतार्थत्वं पर्यवसानमस्तीत्यर्थः । तल्लाभे पूर्णत्वात्
५१२।२ वाक्यान्तरसङ्गतिर्युक्तेति वा योज्यम् । श्लोकं व्याचष्टे*आग्नेय इति* समाप्यते शब्देन सङ्गतिशब्दस्य समाप्त्यर्थत्वं व्याख्यातम् । ननु ग्रहणभावनालाभे ऽपि यागं विना देवतान्वयासिद्धेः कथं वाक्यसमा-

प्तिरित्याशङ्क्याह * इदं त्विति * स्वकार्याक्षमत्वनिबन्धनत्वेनासमा-
प्तेर्विधिविषयलाभमात्राद्विधानाख्ये कार्ये विधिवाक्यस्य क्षमत्व-
सिद्धेः सापेक्षत्वे ऽपि समाप्त्युपपत्तिरित्याशयः । सापेक्षत्वनि-
बन्धनया त्वसमाप्त्या वाक्यान्तरानन्वयेन कस्य चिद्वाक्यस्य वा-
क्यान्तरानन्वयः स्यादिति दर्शयितुमाह * सर्वमेव हीति*समाप्त्य-
भिधानस्य प्रकृतोपयोगं दर्शयन्वाक्यान्तरान्वयार्थत्वेन सङ्गतिशब्दं
व्याचष्टे * तेनेति * न सापेक्षस्यापि वाक्यान्तरान्वये सत्याग्ने-
यादिवाक्यस्यापि कस्मान्न स्यादित्याशङ्क्य विधिविषयालाभादि-
त्याह*आग्नेय इति * पूर्वपक्षसूत्रस्थचोदनाशब्दसूचितं यागानुमा-
नात् प्रागपर्यवसानं परिहृत्यावदानग्रहणयोः पशुसोमस्वरूपनाशक-
त्वेनोत्पत्तिशिष्टस्य पशुसोमद्रव्यस्य संस्कारलक्षणगुणार्थेन विध्य-
योगात्प्रकरणे विधीयमानो हृदयादिरसः संयुक्तो ऽवदानग्रहणा-
ख्यः पदार्थो ऽनर्थकः स्यादिति प्रकरणे हीत्यादिसूत्रावयवोक्तं सि-
द्धान्तदूषणमनुभाषणपूर्वं परिहरति * अथेति * सूत्रोक्तस्य दोषस्य
सूत्रेणापरिहारे सूत्रकृतः शून्यहृदयत्वापत्तेश्चोदयतेः प्रेरणे स्मर-
णेन नुदिसमानार्थत्वान्नुदेश्चापनयनाख्ये बाधे प्रयोगाच्चोदकशब्द-
स्य बाधकवाचित्वमङ्गीकृत्यावदानग्रहणपदार्थाः संस्कारत्वात्पशु-
सोमयोरबाधका इत्येवमस्मिन्परिहारे सूत्रं योज्यम् ।विशसनाभिष-
वादिना पशुसोमयोर्विनाशात्साधनत्वासम्भवाशङ्का द्वारशब्देन नि-
रस्ता प्रदेयप्रकृतित्वेनैव पशुसोमयोः साधनतेत्याशयः । श्लोकं व्या-
चष्टे * यदीति * ननु न हि द्रव्यकथम्भावादतिदेशो ऽत्र कल्प्य-
तइति संख्याधिकरणवार्त्तिके द्रव्यस्येतिकर्त्तव्यताकाङ्क्षाया निराक-
रिष्यमाणत्वान्न पशुसोमयोरितिकर्त्तव्यतान्वयः सम्भवतीत्याश-
ङ्क्याह * पश्विति * संख्याधिकरणपूर्वपक्षे सप्तदशानां पशूनामे-
कसाधनत्वेन प्रत्येकं साधनत्वाभावादितिकर्त्तव्यतानाकाङ्क्षत्वे
ऽपीह साधनत्वसद्भावाद्युक्तेतिकर्त्तव्यताकाङ्क्षेत्याशयः।संस्कारवा-
क्येभ्य एव पशुसोमयोः प्रदेयप्रकृतित्वेन प्राप्त्युपपत्तेः प्रकृतित्वल-
क्षणगुणार्थत्वेन विध्ययोगात्प्रकृते हृदयादौ रसे पशुसोमद्रव्यसं-
योगो ऽनर्थकः स्यादित्येवमर्थाङ्गीकरणेन प्रकरणे हीत्यादिसू-
त्रावयवोक्तं दूषणमनुभाषणपूर्वं परिहरति * यत्त्विति * उत्प- ५१३।१
त्तिशिष्टविरोधोत्तरस्यापि सौत्रतापिशब्देनोक्ता पशुसोमयोरविनि-
योगे क्रमोपकरणादिवाक्यानां सक्तुहोमादिवाक्यवदारादुपकारि-
कर्मविधायित्वापत्तेर्न पशुसोमाक्षेपशक्तिरस्तीत्याशयः ।या च हृद-
यादिभिः प्रकृतिद्रव्यापेक्षिते छागस्य वपाया मेदसो ऽनुब्रूहीति म-

न्त्रवर्णेन छागलाभात्तदन्तर्गतपशुत्वप्राप्तिरुक्ता सास्य मन्त्रस्य सूक्तवाकादिवद्बहुरुत्यविनियुक्तत्वेनात्यन्ताप्राप्तार्थप्रापणाशक्तेर्विनियोजकस्य लिङ्गस्य सामर्थ्यलक्षणत्वात्तस्य च वाक्यशेषवत्सन्दिग्धार्थनिर्णायकत्वेनार्थाद्वा कल्पनैकदेशत्वादित्यत्र स्थितत्वादयुक्तेत्याह * न चेति * कथं तर्हि षष्ठान्त्ये छागप्राप्त्यभिधानमित्याशङ्क्याह *पशिवति * अनेनैव यथैव पशुसामान्यइति वार्त्तिकोक्तस्य पूर्वपक्षस्य निरस्तत्वात्प्रसङ्गेनाथ वा सान्नाय्यं वा तत्प्रभवत्वादित्यनेन न्यायेनेत्यादिवार्तिकोक्तं पूर्वपक्षं निरस्यति * न चेति * ततश्च साधारणश्चायं तवाप्यानुमानिकयागाभ्युपगम इति यदुक्तं तदप्ययुक्तमित्याह * द्रव्येति * या च सान्नाय्यावदानप्रकृतित्वेन हृदयाद्यवदानानां यागीयद्रव्यसंस्कारार्थत्वाद्यागानुमापकतोक्ता सापि सान्नाय्यावदानस्य चतुरवत्तहोमविधिनार्थगृहीतत्वेनाविधेयत्वाद्विधेयानि हृदयाद्यवदानानि प्रतिप्रकृतित्वानुपपत्तेः संस्कारार्थत्वस्य चानङ्गत्वेनानतिदेश्यत्वादयुक्तेत्याह * न चेति * नन्वतिदेशाभावे ऽप्यवदानत्वेन हेतुना यागीयद्रव्यसंस्कारार्थतानुमास्यते ऽत आह * न चेति * पूतीकानभिषुणुयात्तमस्मै भक्षं प्रयच्छेदित्यनयोस्तु प्रकृताभिषवभक्षप्रत्यभिज्ञानाद्यदि सोमं न विन्देत यदि सोमं बिभक्षयिषेदित्येकवाक्यत्वाच्च यागद्रव्यार्थत्वविज्ञानं युक्तमिति दृष्टान्तवैषम्यमाह * प्रतीकेति * प्रसङ्गाद्यश्चात्र पक्षे विशिष्टविध्याश्रयणे दोष इति वार्त्तिकोक्तं सोमवाक्ये विशिष्टविधितुल्यत्वं निरस्यति * सोम इति * नन्वैन्द्रवायवादिवाक्येषु यागविध्यभावे देवताया ग्रहणानन्वयाद्विशेषणविशेष्यत्वशून्ययोर्देवताग्रहणयोर्विधेयत्वापत्तेर्वाक्यभेदप्रसङ्गादालभतिवत्प्रकृतिवल्लिङ्गद्योतनाय गृह्णातिपरप्रत्ययेनैन्द्रवायवं कुर्यादिति वचनव्यक्त्याश्रयणेन विशिष्टयागविधिरवसीयतइत्याशङ्क्याह * न चेति * सोमरसमिन्द्रवायुदेवत्यं कर्त्तुं पात्रे गृह्णीयादिति विहिते यागसम्पाद्यत्वाद् द्रव्यदेवतान्वयस्य ग्रहणमात्रेणासिद्धावपि प्रकरणलभ्ययागान्वयासिद्ध्युपपत्तेर्न वाक्यभेद इत्याशयेन प्रश्नपूर्वमुपपादयति * कुत* इति देवताग्रहणं चेत्यनेन रूपेण विधेयानेकभावे ऽपि प्रकरणलभ्ययागाख्यक्रियान्तरप्रसादेन देवताविशिष्टग्रहणविधिसम्भव इत्यर्थः । श्लोकं व्याचष्टे * शक्यते हीति * ग्रहैर्जुहोतीतिविध्यर्थस्य ग्रहणपात्रेषु ग्रहणमन्तरेणानिष्पत्तेरर्थप्राप्तग्रहणानुवादसम्भवाद्विशिष्टविधिगौरवमपि नास्तीत्यर्थप्राप्त्यभिधानेनोक्तं समासेत्यनेन देवताद्वयनिमित्तवाक्यभेदाशङ्का निरस्ता यागान्वयं विना

ग्रहणस्य देवतान्वयानुपपत्त्या शङ्कानिरासार्थत्वेन क्रियान्तरप्रसादेनेति व्याख्यातुम् * प्रकरणेत्युक्तम् * देवताग्रहणयोर्यागगुणत्वात्परस्परानपेक्षत्वे ऽपि यागद्वारा परस्परान्वयोपपत्तेर्देवताविशिष्टग्रहणविधिसम्भवाभिधानार्थम् * गुणेत्युक्तम् * यादृशं द्रव्यसम्बद्धमित्येतद्वार्त्तिकोक्तं प्रकृतयागसद्भावात्सोमवाक्ये यागविध्यसम्भवं परिहर्त्तुमाह * तस्मादिति * सोमवाक्यस्य यागविधित्वे गुणत्रयमाह * एवं च सतीति * समुदायानुवादाभावे ऽपि राज- ५१४।२ सूयवत्प्रयोगवाक्यस्यैकत्वसिद्धेर्ज्योतिष्टोमशब्दस्य च सोमद्रव्यकयागवाचित्वाद्दीक्षणीयादिव्यावृत्तिसिद्धेरानर्थक्यमित्याशयः । आद्यसूत्रोक्ताया युक्तेः सिद्धान्ते ऽनुपपत्तेः पूर्वपक्षे तद्योजितं पशुसोमवाक्ययोस्तु विधित्वसिद्धान्तो ऽतो युक्त एवेति सूचयन्सिद्धान्तमुपसंहरति * तेनेति *

तद्भेदात्कर्मणो ऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्यात् भेदो द्रव्यगुणीभावात् ॥ १९ ॥

पशुविषयायाश्चिन्तायाः पर्यवसितत्वं भाष्योक्तमुपपादयति * क्रमेति * क्वाधिकरणे कीदृशी वोद्भविष्यतीत्यपेक्षायामाह * पशोरिति * अग्नीषोमीयं पशुमालभेतेति तद्धितेनाष्टाकपालादिवत्समस्तपशोर्देवतान्वयात्प्रदेयत्वलक्षणहविष्ट्वावगतेः समस्तादवदाने पशोरेकहविष्ट्वं समस्तचोदितत्वादिति सूत्रेण पूर्वपक्षिते प्रत्यङ्गं वा ग्रहणवदङ्गानां पृथक्प्रकल्पनत्वादिति सूत्रेण पशुस्वरूपस्य विशसनेन नाशितत्वात्प्रदेयत्वानुपपत्तेः पृथक्कल्पितेभ्यश्च हृदयादिभ्यो ऽवदानविधानात्तद्धितोक्तस्य देवतान्वयस्य साक्षादसम्भवादगत्या व्यवहितविषयत्वावगतेः प्रत्यङ्गं हविष्ट्वेनावदानस्य सिद्धान्तयिष्यमाणत्वात्प्रत्येकमङ्गानां हविष्ट्वविवक्षयोत प्रत्यङ्गमित्युतशब्दं पूर्वाक्षिपाल्य साङ्गानां हविष्ट्वे सिद्धे तद्विशेषचिन्तासां सर्वाङ्गविवक्षया प्रत्यङ्गमुतैकस्मादित्यावृत्त्या योज्यं हृदयजिव्हावक्षोयकृद्वृक्कौ सव्यन्दोरुभे पार्श्वे दक्षिणाश्रोणिगुदं तृतीयमित्येकादशदैवतान्यवदानानि परिगणितानि।सोम इति परिहारप्रतिज्ञाभाष्यं व्याचष्टे *सोमे त्विति * इन्द्रवाय्वा इति परिहारभाष्यं व्याचष्टे * वाक्येनेति * ततो विकल्पिष्यन्ते इत्यन्ध्याहारेण यदि शब्दान्वयः वाक्यव्यतिरेकवाचिना तु शब्देन प्रकरणसूचनात्प्रकरणेन तु यागसङ्गतत्वात्सर्वासां समुच्चय इति सर्व्वशब्देन समुच्चये सूचिते प्रकरणेनाप्यन्वये तुल्यार्थत्वाद् द्विकल्पः कस्मान्न भवतीत्याशङ्क्यान्योन्यनैरपेक्ष्येणान्व-

थाभावाद्विकल्पानापत्त्यभिधानार्थम् * युगपदित्युक्तम् * वाक्येनान्वये समुच्चयः कस्मान्न भवतीत्याशङ्क्य यत्र दध्ना जुहोतीत्यादौ वाक्येनान्वयश्चोद्यते तत्र तुल्यार्थत्वादसमुच्चय इत्युक्ते प्रकरणेनाप्यन्वये तुल्यार्थत्वाविशेषमाशङ्क्यान्योन्यसापेक्षतुल्यार्थत्वाभावात्समुच्चयानापत्त्यभिधानार्थं निरपेक्षेणेत्यनेन पृथक्शब्दोक्तं नैरपेक्ष्यं व्याख्यातम्। आद्यं श्लोकं व्याचष्टे *यदीति * य इमाः पुनरित्यादियुगपदेव सम्बन्ध्यन्तइत्यनेन सर्वास्त्विति श्लोकावयवो व्याख्यातः देवतानामक्रियात्मकत्वात् प्रकरणग्रहणानुपपत्तिमाशङ्क्य सर्वेत्यनेन ग्रहणाख्यक्रियाद्वारा तदुपपादितं द्वितीयं श्लोकं व्याचष्टे * तत्र नामेति *एतदेव प्रश्नपूर्वकमुपपादयति * किमिति * नन्विन्द्रवाय्वादीनां देवतात्वेनैव सामर्थ्यात्प्रत्येकं च देवतात्वावगतेः प्रत्येकमेव सामर्थ्यमवसीयतइत्याशङ्क्याह * नन्विति * ननु त्यज्यमानद्रव्योद्देश्यत्वमात्रेण देवताया यागनिष्पादकत्वात्प्रत्येकमेव चोद्देश्यत्वप्रतीतेरेकैकया देवतयास्त्वेव यागसिद्धिरित्याशङ्क्याह * सत्यपि चेति * यागरूपनिष्पत्तावपि यागाभ्यासात्मकज्योतिष्टोमरूपनिष्पादनसामर्थ्यस्य शब्दैकसमधिगम्यत्वाद्देवताविनियोजकशब्दकल्पनायाश्च प्रकरणाधीनत्वात्तस्य चापर्यायप्रवृत्तित्वान्न प्रत्येकं सामर्थ्ये प्रमाणमस्तीत्याशयः। नन्वेकार्थास्तु विकल्पेरन्समुच्चये ह्यावृत्तिः स्यात्प्रधानस्येति द्वादशाधिकरणे तुल्यार्थत्वमात्रेण विकल्पस्य वक्ष्यमाणत्वात् प्रत्येकत्वविशेषणमयुक्तमाशङ्क्याह * प्रत्येकमिति * दधिमधुपयोघृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमिति चित्रेष्टिद्रव्याणां तुल्यार्थत्वेऽप्यन्योन्यसापेक्षत्वेन विकल्पाभावाद्विशेषणार्थवत्त्वेत्याशयः। दृष्टान्ते ऽन्योन्यनैरपेक्ष्यमुपपादयति * वाक्येति * ननु ग्रहणद्वारा देवतानां यागान्वयात्तत्र च वाक्येन प्रत्येकमेव विनियोगात्प्रत्येकं तुल्यार्थतावसीयत इत्याशङ्कानिरासार्थं भाष्यकारस्यादृष्टसंस्काराभिधानमितिसूचयितुमाशङ्कां तावदाह * नन्विति * ग्रहणासंस्कारस्यादृष्टार्थत्वेन प्रमाणान्तरतो भेदाभेदानवधारणान्न तादर्थ्येन विहितानां भिन्नानां देवतानामैकार्थ्ये प्रमाणमस्तीत्याशङ्कानिरानिरासार्थमथ पुनरित्याद्येवमपरेष्वपि ग्रहणेष्वित्यन्तं भाष्यं ग्रहपात्रे सोमग्रहणं विना ग्रहैर्जुहोतीतिविध्यर्थानिष्पत्तेर्ग्रहणस्य दृष्टार्थत्वादयुक्तमाशङ्क्योद्देश्यत्वेन देवताया ग्रहणसाधनत्वाद्यागवच्च ग्रहणस्य देवतोद्देशाधीननिष्पत्तित्वाभावेन ग्रहणं देवतोद्देशस्यादृष्टार्थत्वात्तद्विशिष्टरूपेण ग्रहणस्यादृष्टार्थताभिप्रेतेति सूचयन्परिहरति * सत्यमिति *

५।२५।४

विज्ञप्तिः ।

१ अस्यां चौखम्बासंस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।

२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयैर्ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

६ कालान्तरे प्रतिस्तबकं " " १ " ०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः— मुद्रिताः स्तबकाः

(१)	संस्काररत्नमाला । गोपीनाथभट्टकृता	(संस्कारः)	२
(२)	शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः	(व्याकरणम्)	१०
(३)	श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत–न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् ।	(मीमांसा)	१०
(४)	भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । सम्पूर्णः ।	(वेदान्तः)	२
(५)	करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः	(ज्योतिषः)	१
(६)	भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः	(मीमांसा)	२
(७)	न्यायरत्नमाला–श्रीपार्थसारथिमिश्र विरचिता सम्पूर्णः ।	(मीमांसा)	२
(८)	ब्रह्मसूत्र भाष्यम्–वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । सम्पूर्णः ।	(वेदान्तः)	६

(९) स्याद्वादमञ्जरी—मल्लिषेणनिर्मिता सम्पूर्णम्।	(जैनदर्शनम्)	२
(१०) सिद्धित्रयम्—विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम्। सं०	(वेदान्तः)	१
(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः	(वेदान्तः)	१
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः। सम्पूर्णः	(न्यायः)	५
(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् सम्पूर्णम्	(मीमांसा)	२
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता।	(मीमांसा)	८
(१५) शिवस्तोत्रावली। उत्पलदेवविरचिता। श्रीक्षेमराजविरचितवृत्तिसमेता।	(वेदान्त)	१

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखम्बा-संस्कृत पुस्तकालय
बनारस सिटी।